श्रीमदन्नम्भट्टविरचितः

तर्कसंग्रहः

आलोकव्याख्या-टिप्पणीभ्यां संवलितः

श्रीमदन्नंभट्टविरचितः

तर्कसंग्रहः

'आलोक' व्याख्या-टिप्पणीभ्यां संवलितः

व्याख्याता

महामहोपाध्यायः, पण्डितरत्नम्

नव्यमङ्गल्लाभिजनः वरदाचार्यः

आर्षग्रन्थप्रकाशनम्

2842, पम्पापतिवीथी, जयनगरम्,

महीशूरपुरी - 570 014

2007

Tarkasamgraha of Annambhatta -- With a commentary '**Aloka**' and '**Tippani**' by **Mahamahopadhyaya Panditaratnam K.S.Varadacharya; Demi 1/8th; Pages: xxxii + 232**

© The Publisher

First Edition:	2001
Revised Second Edition:	2008
No. of Copies:	2000
Price:	Rs. 150/-

Publishers:
Arsha Grantha Prakashana
No 2842, Pampapati Road,
Jayanagar,
MYSORE -- 570 014
Ph: (0821)2567536; 94489-38493
Email: samskrti@hotmail.com

Copies available with Publishers

Photography and Cover Design:
Sri K. Lokesh, B.F.A., Mysore
Tel: 98451-29296

Printed At:
Tech Prints,
1057, 'Park View' Vishnuvardhana Road,
Chamarajapuram, Mysore - 570 008
Ph: (0821) 2330380, 4259380, 4269380.
Email: techprints@rediffmail.com

PREFACE TO THE FIRST EDITION

"Tarka Sangraha" is a very famous work in the field of Sastraic literature. It is not an exaggeration to say that no other Sastra has the benefit of this Tarka Sastra due to the authoring of this work. This is due to the fact that, for beginners who want to learn the basics of any Sastra, a concise text is very much necessary. However not all Sastras were as lucky as Tarka Sastra. The reason for this is this work titled "Tarka Sangraha". To author such a concise, small text is definitely a difficult task ! This work has been authored by a great scholar called Annam Bhatta in a magnificient manner, who has thus become the recepient of the gratefulness of all those who study the Sastras.

Initially, we had no plans of publishing this work. We are grateful to Sadhu Nirmaldas, who was instrumental in the publication of this work. If he had not initially recorded the lessons, even if in a crude manner, this work could not have been published. This work "Tarka Sangraha" is not only useful to students, but to teachers as well, because it has been authored in such a beautiful manner.

Regarding the actual publication, it is well known, how difficult it is to publish books these days. Especially this applies to Sanskrit works, and that too books dealing with the Sastras. Prices of paper and printing have shot up. So, it is a real test to those who publish these types of books. So, the price of this book might be slightly higher

than expected. We hope that those who are interested in the study of Sastras will recieve this book with honour. We also hope that this book would be welcomed in the scholarly world.

Mysore
18-8-2000

Publisher
Arsha Grantha Prakashana

PREFACE TO THE SECOND EDITION

The second edition of this important work was long overdue. However, the delay was due to certain other pre-occupations. As per the request of many students many important basic concepts have been described in a concise and precise manner in this edition in the form of ' Tippani ' for the benefit of seekers of knowledge.

Many people have assisted in the preperation of this edition. Important among them are **Vid. Sri Raghunatha Sastry, Sri Jagannathacharya, Sri M.A.Alwar, Sri M.Dinesh Pandey and Sri S.Manivannan**. We request the Supreme Lord to shower his grace on all these persons. Similarly, the students of **Sri Vedantha Desika Sanskrit Gurukula** have provided financial assistance for printing this edition. We pray the Supreme Lord to bestow His blessings on them also.

The scholarly world is requested to delve deep into the basic concepts of Tarka shastra and concentrate on these concepts which will be beneficial to one and all, rather than harp on the word-formations alone that are exclusive to Navya-Nyaya.

Mysore
1-1-2008

Publisher
Arsha Grantha Prakashana

प्रथममुद्रणनिवेदनम्

अघटितघटनापटीयसो भगवतोऽद्भुतं घटनासामर्थ्यं ज्ञातुं कः प्रभवत्यल्पप्रज्ञः कश्चिन्मानवः। सर्वथैतादृशग्रन्थरचनादिविमुखस्यापि मम गत्यन्तराभावादिदमवश्यकर्तव्यं संवृत्तमन्ते । तर्कसंग्रहमिमं बहुवारं जिज्ञासुभ्योऽध्यापयतो मम मुखादवशाद्बहिरभूदुद्गारः कश्चित् 'कति वारं पाठयेयमिमं ग्रन्थं पुनःपुनः' इति । तदा पार्श्वस्थेनाप्तेनोक्तम् - 'गुजरातीयेन निर्मलदासनाम्ना सुहृदा भवतस्सकाशादध्ययनवेलायामेव, यद्यदुक्तं भवद्भिः, तत्सर्वं तथैव लिखित्वा स्थापितमस्ति । तस्य प्रकाशनेन भवतां श्रमो दूरीभवेत्' इति। मयापि भारदूरीभावचापल्येन 'क्रियतां तर्हि तथैव' इत्यङ्गीकृतं परिणाममविचार्यैव । उपक्रान्तं च कार्यं क्रमशस्तदैव । अनन्तरं तु पश्यामि 'तेन लिखितं पुस्तकरूपेण प्रकटयितुमत्यन्तापर्याप्तमि'ति । इदानीं किं कर्तव्यमिति चिन्ता तु समजनि । अन्ते

'अनारंभो मनुष्याणां प्रथमं बुद्धिलक्षणम् ।

आरब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ।।' इति न्यायमनुस्मरता कथञ्चित् ग्रन्थरूपतामनायि तदीयं लेखनम् । कियान्वा मम श्रमोऽनेन परिहृतो भविष्यतीत्यस्योत्तरं कालेनैव देयम् ।।

यद्यप्यस्य ग्रन्थस्य सन्ति बहूनि व्याख्यानानि प्राचीनान्यर्वाचीनानि च । किं बहुना! एतन्मूलकर्त्रैव रचिता प्रसिद्धास्ति दीपिकानाम्नी । परन्तु नव्यतर्कशास्त्रं प्रविविक्षूणां तानि न पर्याप्तानीति प्रायो मन्यन्तेऽनेके । तत्रापि विशिष्य प्रवक्तारो मन्यन्ते। इयमपि निरीक्षा कियद्वानेन निर्वर्त्येतित्येतदपि कालेनैव समाधेयम् ।।

तर्कसंग्रहकर्तायं चतुश्शास्त्रप्रवीण इति प्रसिद्धावपि तदीयं चरित्रादिकं नाधिकं लभ्यत इत्यस्माभिरत्र नाकारि परिश्रमः मार्गसूचनालाभात् । चतुश्शास्त्रप्रवीणस्याप्यस्य कीर्तिस्तु अतिलघीयसोऽप्येतस्मादेव तर्कसंग्रहादिति न तिरोहितं संस्कृतवाङ्मयपरिशीलन-

चतुराणां विदुषाम् । नव्यतर्कशास्त्रं स्वमूलाद्बहुदूरमागतमित्यस्य सत्यत्वेऽपि पदार्थानां विश्लेषणप्रक्रियया मूलभूता निरूप्यनिरूपकभावप्रक्रियाऽत्यन्तमुपकारिणी सर्वेषामप्यनन्तरकालिकशास्त्रकाराणामित्ययं सत्यांशोऽपि नागेशखण्डदेवब्रह्मानन्दादिभिः अनेकैरनेकधा न्यरूपीति च प्रथितमेव विदुषाम्।।

एवं नव्यतर्कप्रक्रियायाः प्राणभूतस्य निरूप्यनिरूपकभावस्य लेशतः परिचयायैव परिश्रमः कृतोऽग्रिमेण प्रस्तावनाभागेन । तत्रापि दिक्सूचीमात्रमलमिति मत्वा विस्तरो नातीवाकारि । यद्येनेन केषाञ्चिदुपकारो भवेत् तावतैव श्रमं सार्थकं मन्यते व्याख्याकारः —

नव्यमङ्गल्लाभिजनः वरदाचार्यः

(K.S.Varadacharya)

द्वितीयमुद्रणप्रास्ताविकम्

बहुदिनेभ्यः पूर्वमेव निर्वर्तनीयनमासीदिदं द्वितीय मुद्रणम् । कार्यगौरवाद्विलम्बोऽनिवार्यो बभूव । न्यायशास्त्रप्रधानप्रमेयाणामेकत्र सौलभ्यदृष्ट्या, आप्तानां वचसा बहवो विषया अत्र संयोजिता जिज्ञासूनामुपकाराय ।

एतन्मुद्रणसज्जीकरणे सहकृतवद्भ्यः **श्रीजगन्नाथाचार्यः, रघुनाथशास्त्री, आळवार्, दिनेशपाण्डे, मणिवण्णन्** इत्येतेभ्यः मङ्गळमनुगृह्णातु भगवानित्याशास्यते । तथैव धनसहायं दत्तवते **वेदान्तदेशिकसंस्कृतगुरुकुलाय** च मङ्गलमाशास्यते ।

विद्वल्लोकः पिष्टपेषणं परित्यज्य, शब्दमात्रपरायणतां विहाय प्रमेयजिज्ञासुर्भवेत्, स्वस्यान्येषाञ्च हितायेति प्रार्थयते —

नव्यमङ्गल्लाभिजनः वरदाचार्यः

(K.S.Varadacharya)

प्रस्तावना

'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इतीदं वचनं को वा न जानाति संस्कृतज्ञः । **'नामरूपे व्याकरवाणि' 'नामरूपे व्याकरोत्' 'संज्ञामूर्तिक्लृप्तिस्तु...'** इत्यादिश्रुतिस्मृती नामरूपसंयोजनमेव सृष्टिरिति प्रतिपादयतः । तत्रापि स्थूलं जगदिदं तु नामरूपात्मकमिति किञ्चिदालोचने स्पष्टं ज्ञायेत । तत्र नामव्याकरणं पाणिनीयं शास्त्रं चेत्, रूपव्याकरणं काणादबादरायणीये । अत्रापि काणादं बाह्यस्थूलजगत्संबन्धि, बादरायणीयम् आन्तरसूक्ष्मात्मादिवस्तुविषयमिति विषयव्यवस्थापि स्पष्टा। एवं काणादमिदं रूपव्याकरणमिति **'पदार्थधर्मसंग्रहः'** इति प्रशस्तपादीया एतच्छास्त्रसंज्ञैव स्पष्टयति । बाह्यमिदं हि जगत् पदात्मकम् अर्थात्मकं च । अत एव **'...द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां...'** (वै.सू.१-१-४)इति निरदेशि महर्षिकणादेन । तत्र पदशास्त्रं व्याकरणम्, अर्थशास्त्रं वैशेषिकम् ॥

चतुर्विधानि पदनामानि — (१) **द्रव्य**वाचीनि, (२) **गुण**वाचीनि, (३) **क्रिया**वाचीनि, (४)**जाति**वाचीनीति । पदानां चतुर्विधत्वात् पदार्थाः प्रथमं द्रव्यगुणकर्मसामान्यभेदाच्चत्वारः। एवं विभागस्य भेदमूलकत्वात्, भेदस्य चान्ते 'विशेष'मूलकत्वात् पञ्चमः पदार्थो (५) **विशेष**ोऽप्यावश्यकः। एवं गुणगुण्यादिभेदे सिद्धे संबन्धस्यावश्यकत्वात् (६) **समवाय**ोऽप्यावश्यकः। (७) **अभाव**स्तु न पदार्थः, किन्तु वाक्यार्थः । वेदान्तिनां समवायनिराकरणादिकं त्वभिप्रायान्तरेण । शास्त्रान्तरं हि तत् । पदार्थशास्त्रे तु स आवश्यक एव। आद्याश्चत्वारः सार्वजनीनाः । इतरौ द्वौ तु शास्त्रीयौ ॥

एवं **षट्पदार्थात्मकमिदं जगत्परस्परसापेक्षमेव** । प्रधानाप्रधानादिविभागोऽपि सापेक्ष एव । एवं परस्परसापेक्षत्वेऽवर्जनीये, अपेक्षाणामपि बहुविधत्वमनिवार्यम् । अयं च सापेक्षतावादः (**Theory of relativity**) विज्ञानलोके यथाऽनिवार्यस्तथा बाह्ये स्थूले जगत्य-प्यनिवार्यः। पदार्थानां परस्परसापेक्षत्वस्य समानत्वेऽपि तत्तद्वस्त्वनुगुणमपेक्षाणामनेकत्वात्सापेक्षत्वं विशेषे पर्यवस्येदेव । एकस्मिन् गृहे वसतां मनुजानां परस्परसापेक्षत्वेऽपि तत्तदपेक्षाः किल परस्परं भिद्येरन्नेव । **एक एव गृहयजमानः खलु एकस्याः पतिः, अपरस्य पिता, अपरस्य भ्राता, अन्यस्य मातुलः, अपरस्य स्वामी** इत्येवं खलु परस्परं संबन्धो वर्तते । एतत्सर्वमेकस्मिन् निरूपकभेदादेव किल वर्तते । निरूप्यनिरूपकभावः किल धर्ममूलकः । पत्नीनिरूपितं पतित्वम्, पुत्रनिरूपितं पितृत्वम्, भृत्यनिरूपितं स्वामित्वमित्यादि दृष्टमेव । अतश्च सर्वं निरूप्यनिरूपकभावापन्नम्, अत एव धर्मधर्मिभावापन्नं च । **एवं विश्लेषणं यदि न ज्ञायेत, तदा साङ्कर्यमप्यनिवार्यमेव ।** एकैव किल स्त्री पत्न्यपि भवति, मातापि भवति, सहोदर्यपि भवति निरूप्यनिरूपकभेदात् । यथा एकैव सीता, रामनिरूपितपत्नीत्ववती, लवकुशनिरूपितमातृत्ववती, ऊर्मिलानिरूपितसहोदरीत्ववती भवति । एतादृशरीत्या **पदार्थविश्लेषणाभ्यास एव तर्कशास्त्रस्य प्रधानो विषयः, विशेषतो नवीनतर्कशास्त्रस्य ।।**

ते च पदार्थानां परस्परं संबन्धा बहुविधाः । यथा—

अवच्छेद्यावच्छेदकभावः	आधाराधेयभावः	उद्देश्यविधेयभावः
उपादानोपादेयभावः	कार्यकारणभावः	गुरुशिष्यभावः
नियाम्यनियामकभावः	नियोज्यनियोजकभावः	पतिपत्नीभावः
निरूप्यनिरूपकभावः	प्रकारप्रकारिभावः	पितृपुत्रभावः
प्रतिपाद्यप्रतिपादकभावः	प्रतियोग्यनुयोगिभावः	भ्रातृभगिनीभावः

प्रयोज्यप्रयोजकभावः	लक्ष्यलक्षणभावः	वाच्यवाचकभावः
विषयविषयिभावः	विशेषणविशेष्यभावः	वन्द्यवन्दकभावः
व्याप्यव्यापकभावः	सेव्यसेवकभावः	स्वस्वामिभावः
स्वामिभृत्यभावः	शेषशेषिभावः	जन्यजनकभावः
धर्मधर्मिभावः	भोग्यभोक्तृभावः	नम्यनन्तृभावः

... ... इत्यादयः पदार्थानां संबन्धा अनन्ता दृश्यन्ते ।।

यथा **'भूतले घटः'** इति यदोच्यते, तदा घटभूतलयोराधाराधेयभावरूपसंबन्धः प्रतीयते । आधाराधेयभावो नाम आधारता, आधेयता च । **आधारोऽधिकरणमिति** पर्यायौ । तथा च तत्र भूतलनिष्ठा(वृत्तिः) अधिकरणता। घटनिष्ठा(वृत्तिः) आधेयता, आधेयत्वाधिकरणत्वयोः निरूप्यनिरूपकभावः संबन्धः । **भूतलनिष्ठाधिकरणतानिरूपिताधेयतावान् घटो भवति** अथवा **घटनिष्ठाधेयतानिरूपिताधिकरणतावत् भूतलं भवति** ।।

एवं **घटस्य कारणं दण्ड** इत्यत्र, दण्डनिष्ठा कारणता । घटनिष्ठा कार्यता । **घटनिष्ठ(वृत्ति)कारणतानिरूपितकारणतावान् दण्डः** अथवा **दण्डनिष्ठ(वृत्ति) कारणतानिरूपितकार्यतावान् घटो** भवति ।।

एवञ्चैतदुक्तं भवति-- पदार्थानां परस्परं संबन्धः साक्षात् वस्तुस्वरूपयोर्न भवति, सर्ववस्तूनामनेकधर्मखचितत्वेन सांकर्यप्रसङ्गात्। किन्तु तत्तदपेक्षानुगुणं तत्तद्धर्ममूलक एव भवति । आधारस्याधेयापेक्षा, आधेयस्याधारापेक्षा । कार्यस्य कारणापेक्षा, कारणस्य कार्यापेक्षा । एवञ्च भूतले घट इत्यत्र, घटापेक्षया भूतलमाधारः । घटगतरूपाद्यपेक्षया तु घटोऽप्याधारः । घटे आधेयतापि वर्तते, आधारतापि वर्तते । एकस्यैवाधारत्वमाधेयत्वं चापाततो विरुद्धे । किन्तु निरूपकभेदादविरुद्धे । रूपनिष्ठाधेयतानिरूपितमाधारत्वम्, भूतलनिष्ठाधिकरणतानिरूपितमाधेयत्वम् ।।

एवं पदार्थानां विश्लेषणाऽभ्यासवशात्, निशिता बुद्धि-

स्तत्त्वक्षेत्रेऽप्यसंकीर्णतया सर्वं विवेत्तुं प्रभवति । एतदेव एतन्नवीनतर्कशास्त्रशैल्याः परमं प्रयोजनम् । एतदतीत्य पुनः पुनश्शब्दानां वर्धने नूनमर्था हस्ताद् (अनुभवात्) भ्रष्टा भवेयुरित्यत्र न संशयलेशोऽपि ।।

एवं पदार्थानां परस्परं निरूप्यनिरूपकभावापन्नत्वं प्रथमं ज्ञेयम्। अनन्तरं किंप्रयुक्तो निरूप्यनिरूपकभावः? किम् आधाराधेयभावप्रयुक्तः, उत कार्यकारणभावप्रयुक्तः, उत पितृपुत्रभावप्रयुक्तः? इति विशिष्याप्यवधेयम् । एवं पदार्थानां स्वरूपे, तेषां धर्मे, संबन्धे चावगते निरूप्यनिरूपकभावोऽपि सुगमः । एवं प्रमेयनिष्कर्षे जाते, ततश्शाब्दबोधोऽपि सुनिरूपः ।।

यथा **'भूतले घटः'** इति व्यधिकरणवाक्ये प्रयुक्ते, घटभूतलयोः आधाराधेयभावः स्पष्टः । **प्रायः प्रथमान्तमुख्यविशेष्यक एव शाब्दबोधः**। सप्तम्या अधिकरणत्वमर्थः। प्रकृत्यर्थस्य वृत्तिता(आधेयता) संबन्धेन अन्वयः। आधेयता च वृत्तितैव । वृत्तित्वम्, निष्ठत्वमिति पर्यायौ । भूतलवृत्तिः अथवा भूतलनिष्ठा आधारता इति 'भूतले' इति पदाद्बोधः । आधारतायाः स्वनिरूपिताधेयताश्रयत्वसंबन्धेन घटेऽन्वयः। तथा च

(१)-**भूतलनिष्ठाधारतानिरूपिताधेयताश्रयो घट** इति बोधः ।

अथवा आधारताया निरूपकतासंबन्धेन घटेऽन्वयः । तथा च

(२)- **भूतलनिष्ठाधारतानिरूपको घट** इति बोधः।

अथवा सप्तम्या आधेयत्वमर्थः । प्रकृत्यर्थस्य स्वनिष्ठाधिकरणतानिरूपितत्वसंबन्धेन सप्तम्यर्थाधेयतायामन्वयः । आधेयताया आश्रयतासंबन्धेन घटेऽन्वयः । **भूतलनिष्ठाधिकरणतानिरूपिताधेयताश्रयो घट** इति बोधः।

अथवा भूतलपदार्थस्य निरूपितत्वसंबन्धेन सप्तम्यर्थाधेयतायामन्वयः ।

(३) **भूतलनिरूपिताधेयताश्रयो घट** इति बोधः ।।

एवम् - **'भूतले घटः'** इति व्यधिकरणवाक्यात् —
(पूर्णः-१) **भूतलनिष्ठाधिकरणतानिरूपिताधेयता(श्रयः)वान् घट** इति,
(संग्रहः-२)— **भूतलनिष्ठाधिकरणतानिरूपको घट** इति ,
(संग्रहः-३) **भूतलनिरूपिताधेयता(श्रयः)वान् घट** इति वा घटविशेष्यकशाब्दबोधः ।।



एवं **'घटवत् भूतलम्'** इति समानाधिकरणवाक्यात् यथाश्रुते **'घटवदभिन्नं भूतलम्'** इति बोधेऽपि, प्रमेयदृष्ट्या, घटो विशेषणम्, भूतलं च विशेष्यम्। मतुप्प्रत्ययस्तु घटस्य विशेषणत्वसूचकः । अतश्च एतस्मात् वाक्यात्तु -
(पूर्णः—१)- **घटनिष्ठाधेयतानिरूपिताधिकरणता(श्रयः)वत् भूतलम्** इति, (संग्रहः-२) - **घटनिष्ठाधेयतानिरूपकं भूतलम्** इति, (संग्रहः-३)-**घटनिरूपिताधिकरणता(श्रयः)वत् भूतलम्** - इति वा भूतलविशेष्यकशाब्दबोधः ।



अधिकरणम् — आधेयतानिरूपकम् । आधेयः— अधिकरणतानिरूपकः। एवमितरत्रापि ।।

एवं विशेषणविशेष्यभावः शब्दविपर्यासकृतः । तावता अर्थविपर्यासो न भवति । भूतलमेव आधारः, घट एवाधेयः । एवमेकत्र निरूप्यनिरूपकभावनिर्णये जातेऽन्यत्र सर्वत्रापीयमेव सरणिस्सुगमा ।।

एवमेव **दण्डजन्यो घट** इत्यत्र —

(१) **दण्डनिष्ठकारणतानिरूपितकार्यतावान् घट** इति,

(२) **दण्डनिष्ठकारणतानिरूपको घट** इति,

(३) **दण्डनिरूपितकार्यतावान् घट** इति वा घटविशेष्यकशाब्दबोधः।।

घटस्य कारणं दण्ड इत्यत्र तु —

(१) **घटनिष्ठकार्यतानिरूपितकारणतावान् दण्ड** इति,

(२) **घटनिरूपितकारणतावान् दण्ड** इति,

(३) **घटनिष्ठकार्यतानिरूपको दण्ड** इति वा दण्डविशेष्यकशाब्दबोधोऽपि इदानीं सुगमः ।।

(१) **'दण्डजन्यो घटः'** इति वाक्यस्य दण्डात् जन्यः- दण्डजन्य इति विग्रहः । जन्य इत्यस्य कार्यतावान् अर्थः । दण्डात् इत्यत्र पञ्चम्याः कारणत्वमर्थः । प्रकृत्यर्थस्याधेयता(निष्ठत्व)संबन्धेनान्वयः । कारणत्वस्य निरूपितत्वसंबन्धेन कार्यतायामन्वयः। तथा च दण्डनिष्ठकारणतानिरूपितकार्यतावान् घट इति बोधः ।।

(२) **दण्डाद्घट** इति वाक्ये प्रयुक्ते तु पञ्चम्याः कारणत्वमर्थः । प्रकृत्यर्थस्य आधेयता(निष्ठत्व)संबन्धेनान्वयः । दण्डनिष्ठा - कारणता इत्यासीत् । कारणताया निरूपकत्वसंबन्धेन, स्वनिरूपितकार्यताश्रयत्वसंबन्धेन वा घटेऽन्वयः। दण्डनिष्ठकारणतानिरूपको घट इति वा, दण्डनिष्ठकारणतानिरूपितकार्यताश्रयो घट इति वा बोधः ।।

(३) **दण्डाद्घटो भवति** इत्यत्र तु एतद्वाक्यस्य दण्डाद्घटो जायते इति

वाक्यतुल्यत्वात्, भूधातोः भवनमर्थः । भवनञ्च कार्यत्वमेव प्रकृते। आख्यातस्याश्रयत्वमर्थः । दण्डात् इत्यत्र पञ्चम्याः कारणत्वमर्थः । प्रकृत्यर्थस्याधेयतासंबन्धेनान्वयः । कारणताया निरूपितत्वसंबन्धेन कार्यतायामन्वयः । तथा च दण्डनिष्ठकारणतानिरूपितकार्यताश्रयो घट इति बोधः ।। **जायते** इति धातुसमभिव्याहारे पञ्चम्या उपादानत्वम् स्वरसम् । अतो **मृदः(मृत्तिकातः) घटो जायते** इति प्रयोग एव गरीयान् ।।

प्रतियोग्यनुयोगिभावस्तु — अभावस्थले — यथा **घटाभावो** नाम —

१. घटनिष्ठप्रतियोगितानिरूपितानुयोगितावान् अभावः ।

२. घटनिष्ठप्रतियोगितानिरूपकः अभावः ।

३. अभावनिष्ठानुयोगितानिरूपिकः घटः । इति ।

अत एव अभावत्वम् अनुयोगितविशेषरूपम् । अनुयोगिपदं कुत्रचिदधिकरणपर्यायमपि प्रयुज्यते । यथा **चन्द्र इव मुखम्** इत्यादौ **चन्द्रप्रतियोगिकसादृश्यानुयोगि मुखम्** इति बोधः ।

एकस्मात् वाक्यात् यादृशोऽन्वयबोधो विवक्षितः, तदनुगुणतया प्रत्ययानामर्थो वर्णनीयः। भूतले घटः, भूतले घटोऽस्ति इति वाक्यद्वयादपि भूतलघटयोराधाराधेयभावः प्रतीयत इति तु निश्चयः । विभक्त्यर्थस्योत्तरत्रान्वयवेलायां **वृत्तिनियामकसंबन्धेनैव अन्वयो वाच्यः**। यथा - भूतले इत्यत्र सप्तम्याः अधिकरणत्वं यद्यर्थः, तर्हि तस्योत्तरत्र घटे निरूपकतासंबन्धेन, स्वनिरूपिताधेयताश्रयत्वसंबन्धेन वान्वयो वाच्यः। द्वयमपि वृत्त्यनियामकसंबन्धः । अतः सप्तम्या आधेयत्वमर्थः । प्रकृत्यर्थस्य निरूपितत्वसंबन्धेन, स्वनिष्ठाधिकरणतानिरूपितत्वसंबन्धेन वान्वयः । तथा च भूतलनिरूपिताधेयताश्रय इति वा, भूतलनिष्ठाधिकरण-तानिरूपिताधेयताश्रय इति वा बोधः । बोधद्वयमपि समानार्थकमेव, शब्दतस्संग्रहविस्तररूपम् ।।

'अस्ति' इति धातुसमभिव्याहारे तु असधातोराधेयत्वमर्थः,

आख्यातस्याश्रयत्वमर्थः । सप्तम्या अधिकरणत्वमर्थः। अधिकरणत्वस्य निरूपितत्वसंबन्धेन धात्वर्थेऽन्वयः । प्रकृत्यर्थस्याधेयतासंबन्धेनान्वयः। तथा च भूतलनिष्ठाधिकरणतानिरूपिताधेयताश्रयो घट इति बोधः । वृत्तिनियामकसंबन्धेनैवान्वयो वक्तव्यश्चेत्, सप्तम्या निरूपितत्वमर्थः । असधातोराधेयत्वमर्थः । आख्यातस्याश्रयत्वमर्थः । सप्तम्यर्थनिरूपितत्वस्य धात्वर्थे आश्रयतासंबन्धेनान्वयः। भूतलनिरूपिताधेयताश्रयो घट इति बोधः। अर्थस्तु समान एव । आहत्य तु **लोकानुभवस्वारस्यानुरोधेन वोधवर्णनं स्वरसम्** ।।

तथा च पदार्थानां परस्परं साक्षान्न कोऽपि संबन्धः, किन्तु तन्निष्ठधर्म-द्वारैव । यथा आधारत्वाधेयत्वे, कार्यत्वकारणत्वे, विषयत्वविषयित्व इत्यादिधर्ममूलक एव पदार्थानां संबन्धः। **धर्मयोस्तु परस्परं निरूपितत्वमेव संवन्धः, न तु निरूपकत्वम्** । यथा आधारतानिरूपिता आधेयता, आधेयतानिरूपिता आधारता, कार्यतानिरूपिता कारणता, कारणतानिरूपिता कार्यता इत्येवमेव । **तत्तद्धर्माणां तत्तद्धर्मिभिः सहाश्रयत्वमेव सम्वन्धः**। यथा आधेयताश्रयः- आधेयः(घटादिः) । अधिकरणताश्रयः- अधिकरणम् (भूतलादिकम्) । **एकवस्तुनिष्ठधर्मस्य अन्यवस्तुना धर्मिणा सह साक्षात्सम्वन्धस्तु निरूपकत्वम्** । यथा आधेयतानिरूपकम् — अधिकरणम्, अधिकरणतानिरूपकः —आधेयः । कार्यतानिरूपकं—कारणम्, कारणतानिरूपकं—कार्यम् । विषयतानिरूपकं— विषयि (ज्ञानम्), विषयितानिरूपकः -- विषयो घटादिः इत्यादि । इदं सर्वं व्यस्तपदप्रयोगे।।

समस्तपदप्रयोगे तु तत्तसमासानुरोधेन नियमाः प्रदर्शिताः व्युत्पत्ति-वादादिषु । तदनुरोधेन शाब्दबोधो वर्णनीयः । विग्रहवाक्यसमास-वाक्यजन्यबोधयोः समानविषयकत्वं तु समासघटकपदार्थदृष्ट्या, न तु संबन्धदृष्ट्या । यथा **राज्ञः पुरुष** इति वाक्यात् **राजनिरूपितस्वत्ववान् पुरुष** इति बोधः । **राजपुरुष** इति **समासात्तु राजनिरूपितस्वत्ववदभिन्नः**

पुरुष इति बोध इत्यादिकं तु विस्तरभयान्नात्रोच्यते।।

एवं सर्वेषां वाक्यानां शाब्दबोधस्य वक्तुं शक्यत्वेऽपि शास्त्रप्रविविक्षूणां भारोऽधिको मा भवत्विति दृष्ट्या ग्रन्थेऽस्मिन् न प्रादर्शि सर्वेषां बोधप्रकारः । लक्षणवाक्यानां तु उत्तरपरिष्कारानुकूल्यार्थं शाब्दबोधोऽवर्णि । यथा - गन्धनिष्ठाधेयतायां समवायसंबन्धावच्छिन्नत्वं निवेशनीयम् इत्युक्ते, कुत्रास्ति आधेयता ? इति जिज्ञासा स्यात् । अतो गन्धवती इत्यादिपदानां विशिष्य बोध आवश्यकः । तदर्थं लक्षणवाक्यानां शाब्दबोधोऽवर्णि ।।

एवं पदार्थानां तत्तद्धर्ममूलकसंबन्धानभिधाने व्यवहारः साङ्कर्यमयः स्यात् । **'दशरथस्य पुत्रो रामः,लवस्य तु पिता'** इति व्यवहारे रामे पुत्रत्वं पितृत्वं च निरूपकभेदाद्वक्तव्यं चेत्, पुत्रत्वपितृत्वधर्मभेदेनैव वक्तव्यम्। तथैव **सीता रामस्य पत्नी, ऊर्मिलायास्सहोदरी** । सीतायां पत्नीत्वं सहोदरीत्वं चेत्युभयं निरूपकभेदान्मिलितं भवति । निरूपकभेदाभावे सांकर्यं स्पष्टम् ।।

'भूतले संयोगेन घटोऽस्ति' इति वाक्ये 'संयोगेन' इत्यस्यान्वयो वक्तव्यश्चेत्, नव्यतर्कदृष्ट्या पदार्थविश्लेषणे कृत एवान्वयबोधः सुगमः। घटनिष्ठाधेयतायां खलु 'संयोगेन' इत्युक्तं संयोगसंबन्धावच्छिन्नत्वमन्वेति। एवमन्वये सत्येव लक्षणपरिष्कारादिकं कर्तुं शक्यम् ? एतत्परिचय एतद्ग्रन्थपठने सम्यक्स्यादिति भाव्यते ।।

अन्या च परिष्कारप्रक्रियायाम् **'अनुगमपद्धतिः'** इति । एतत्सूचनापि मार्ग-दर्शनवत् श्रीमता गदाधरभट्टाचार्येणैवाकारि प्रामाण्यवादे — **'एकस्मिन् धर्मिणि परस्परविरुद्धनानाधर्मप्रकारकज्ञानं संशयः'** इत्युक्तसंशयलक्षणस्य **'विषयतावैशिष्ट्यविषयिताशालिज्ञानत्वं संशयत्वम् । वैशिष्ट्यं च स्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकतावच्छेदकत्वस्वसामानाधिकरण्योभयसंवन्धेन'** इति । अनन्तरकाले विवेचन्यां प्रकारतयाप्यनुगमनप्रक्रिया प्रत्यपादि । परन्त्वेतादृशविषयाणां कालो गत एवेति

प्रतिभात्यद्य । केवलं शब्दवर्धनप्रक्रियेयं प्रमेयज्ञानं नाशयेत् । अतो दर्शनप्रक्रियैवात्यन्तं फलाय भवेदस्मिन् काले । केवलमिदं दिग्दर्शनमात्रम्।।

लेशतो वा नवीनतर्कसरणिः परिचिता भवत्वित्यालोच्य लक्षण-परिष्कारा मार्गदर्शनाय वायुलक्षणादौ विशिष्य प्रपञ्चिताः । प्रमेयस्वरूपज्ञानं निष्कृष्टं यदि भवेत्, तर्हि तदनुगुणशब्दयोजनाक्रमोऽपि यदि ज्ञायेत, प्रतिभापि स्याच्चेत्, नवीनतर्कशास्त्रं स्वाधीनमेव । आरम्भकाल एतावदेव पर्याप्तमिति भाव्यते ।।

इदमत्रावधेयम् -- चतुर्दशविद्यास्थानेषु न्यायविस्तरपदवाच्यमिदं न्यायशास्त्रम् तर्कशास्त्रं वेदानामुपाङ्गभूतं मन्यन्ते महर्षयः । न्यायश्च वाक्यानुबन्धी मीमांसापदेनाभिधीयते, अर्थानुबन्धी न्यायविस्तरपदेनोच्यते। **'न्यायविस्तरः'** इति विस्तरपदयोजनया ज्ञायतेऽत्रास्त्यवकाशो शब्दविस्तरणस्य इति । **अर्थस्य तु विस्तारः, शब्दस्य तु विस्तर** इति **'प्रथने वावशब्दे'** (पा.सू.३-३-३३) इति पाणिन्यनुशिष्टम् । निरूप्यनिरूपकभावः धर्मधर्मिभावः, अवच्छेद्यावच्छेदकभाव इति शब्दस्य विस्तरोऽनन्त एव ।।

'गन्धवती पृथिवी' इति पृथिव्या लक्षणबोधकवाक्यम् । **गन्धनिष्ठाधेयता-निरूपिताधिकरणत्वं पृथिव्या लक्षणम्** । गन्धस्य गुणत्वात् 'गुणवान्' इति प्रतीतिमादाय जलादावतिव्याप्तिवारणायाधेयतायां गन्धत्वावच्छिन्नत्वं निवेश्यते । गन्धस्य पृथिव्याश्चाधाराधेयभावः । इदानीं तेन सह गन्धत्वस्य गन्धस्य चाधाराधेयभावः, समवायेन गन्धत्वस्य गन्ध एव आश्रयत्वात् । तावन्मात्रं न गन्धत्वगन्धनिष्ठाधेयत्वयोरवच्छेद्यावच्छेदकभावः। एवं तदुपर्यपि गन्धत्वनिष्ठावच्छेदकता आधेयत्वनिष्ठावच्छेद्यता, तयोर्निरूप्यनिरूपकभावः। तथा च 'गन्धत्वावच्छिन्ना आधेयता' इत्यस्य गन्धत्वनिष्ठावच्छेदकता-निरूपितावच्छिन्नत्ववती आधेयता इत्यर्थः । एवं निरूप्यनिरूपकभावो नाम निरूप्यता, निरूपकता च । तयोरपि 'निरूप्यतानिरूपितनिरूपकतावती' इति वक्तव्यम् । सर्वमिदं नातिरिक्तः पदार्थः ।।

इतोऽपि बहु बहु वक्तुं शक्यम् । पदार्थमन्तरापि शब्दवर्धने शब्दारण्य-निलीनैस्सर्वैरपि भ्रमितव्यमेव । अतः केवलशब्दवर्धनं नूनं प्रमेयनाशाय कुतो न भवेत्? इदं च नवीनतर्कशास्त्राभिवृद्धिक्रमं पश्यतां सुगमम् । **परन्त्विदं सर्वं कुत्र पर्यवसन्नम् ? इत्यपि यथा वक्तुं न शक्यते, तथा केवलशव्दविस्तरः नूनमस्मत्संस्कृतेराघातको जातोऽद्येति न कोऽपि चिन्तयतीत्येवात्याश्चर्यम् । सर्वमपि शास्त्रं नवीनतर्कमयं जातम् ।** अस्ति तु नवीनतर्कप्रक्रियायामुपपादनप्रक्रियाऽसाधारणी । तदभ्यासक्रमस्यात्रोक्तमेव पर्याप्तं मार्गदर्शनमिति वयं भावयामः । अन्यथा हि इदं सर्वं हैतुकत्वापवादाधायकं कुतो न स्यात् ? **'अधीत्य गौतमीं विद्यां सार्गालीं योनिमाप्नुयात्'** इति वचनविषयः कुतो न भवेत् ? इति प्रगाढं चिन्तनीयम् ।।

नवीनतर्कशास्त्रावतरणचरित्राध्ययने अयमंशः स्पष्टं ज्ञायेत । तत्काले हि पण्डितप्रकाण्डानामादर्शभूत आसीत् श्रीहर्ष इति तदीयेन **'ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्'**.. इति वचनेन सुस्पष्टं ज्ञायते । यद्यपि स एवाह- **'यस्साक्षात्कुरुते समाधिषु परव्रह्मप्रमोदार्णवम्'** इत्यपि । परं तु स एवान्यत्राह - **'तच्चिन्तामणिमन्त्रचिन्तनफले'**... इत्यपीति न विस्मर्तव्यम् । चिन्तामणिमन्त्रश्च बौद्धतन्त्र-संबन्धी । एतन्मूलकब्रह्मदर्शनरहस्यम्, **'जन्मौषधिमन्त्रतपस्समाधिजा-स्सिद्धयः'** (पा.यो.सू.४-१) इति योगसूत्रं पश्यताम्, खण्डनखण्डखाद्यं, श्रीहर्षचरितं च विमृशतां सुविशदं ज्ञायेत । तत्कालिका एव गङ्गेशोपा-ध्यायभट्टवादीन्द्रादय इत्यप्यवधेयम् । विद्यारण्यः श्रीहर्षं श्रीशङ्करपराजितं वर्णयतीत्यादिकमत्रावधेयम् । आहत्य **राजसभासु परस्परजिगीषाकु-तूहलमग्नैः पण्डितैस्संवर्धितेयं नवीनतर्कप्रक्रियेति विमर्शकैः स्पष्टं ज्ञायेत । एवं जयपराजयादिपरायणाः पण्डिताः नूतनप्रक्रिया-न्वेषणव्यसनिनोऽभूवन् तदेत्यपि** तत्कालिकस्य गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिग्रन्थादिभिः ज्ञायते ।।

अत एव न्यायवैशेषिकदर्शनयोः साङ्कर्यम्, षोडशपदार्थ-सप्तपदार्थवादादिकं सर्वमेतत्कालिकं नवीनप्रस्थानप्रदर्शनकुतूहलफलम्। अनुगमपरिपाटीवर्धनचरितमस्माभिः साक्षादेव वृद्धानां मुखात् श्रुतम्। **सर्वमिदं परस्य मोहमापाद्य सभासु जयप्राप्त्यर्थमेव। पारमार्थिकजीवनस्य सर्वमिदं छलरूपम्, कुठारप्रायम्**। प्रमेयनिश्चयाय न लेशतोऽपि सहायोऽनेन। प्रत्युत अनया प्रक्रियया प्रमेयपरिचयाघातः कथमभूत्, परस्पर-खण्डनपरायणतादि च कथमवर्धत तदेत्यादिकमपि नवीनतर्कशास्त्रचरिताध्ययनेन ज्ञायते। एतद्रहस्यं बहुभिर्न ज्ञातुं शक्यम्। परन्तु सर्वमेवेदं सत्यमित्यत्र व्युत्पत्तिवादव्याख्यात्रा बद्धा ज्ञा शर्मणा कृता भगवद्गीताटीका साक्षीभवति। प्रत्येकमेवेदं सत्यं विमर्शनीयमितीदानीं विरमामः॥

फलतस्तु - **प्रमेयज्ञानमन्तरा केवलम् एवं निष्प्रयोजन-शब्दविस्तरणम्, तन्मूलकजयपराजयपरायणता चास्मत्संस्कृतेः क्षयहेतुषु मूलभूतं कारणमिति प्रतिभाति**। एतद्दृष्ट्या तु प्राचीनन्यायप्रक्रियैवात्यन्तं गुणकरी इत्यप्यालोचनाय काल आगत इति मन्यामहे। तर्हि प्राचीनन्याये महर्षिणैव छलजातिजल्पवितण्डादीनां कथमुपदेशः कृतः? इति चेत्, एतेषां तत्त्वनिर्णयप्रयोजकत्वाभावः, कदा केन कथं प्रयोज्यानीत्यादिकमपि तैरेवोच्यत इत्याद्यप्रसक्तमत्र विस्तर-भयात्। परन्त्वद्य तु नास्ति तादृशः कालः, सर्वस्यापि क्षयात्। अथापि वासनाया हठात् त्यक्तुमशक्यत्वात्, नवीनसरणावपि निरूप्यनिरूपकभावपरिचयरूपस्य प्रयोजनलेशस्य सत्वाच्च मार्गदर्शनं किञ्चिद्वाऽनेन भवेच्चेदस्माकं श्रमस्सार्थकः स्यादिति शम् —

व्याख्याता

प्राक्कथन

भारतीय संस्कृति की विशेषता यही है कि वह भौतिक साधन मेंही विश्रान्ति न लेकर अतिसूक्ष्म और अतिगहन अध्यात्मतत्त्व पर विश्वास करती है । इसका मूल है वैदिकवाङ्मय और उसके पोषण के लिए हैं -- वेदाङ्ग, उपाङ्ग, आदि ॥

पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

यहाँ पर महर्षियाज्ञवल्क्य ने इन चौदह शास्त्रों को विद्याओं के साथ-साथ धर्म का भी स्थान (आधार) बताते हुए विज्ञान (विद्या) के साथ ही ज्ञान (धर्म) का मूल भी इन्हीं को बताया । इसीको स्पष्ट करते हुए महर्षि कणाद ने भी **यतोऽभ्युदयनिः श्रेयससिद्धिःस धर्मः** (वै.सू.-१-१-२) (जिससे लौकिक अभ्युदय(उत्कर्ष) और अलौकिक(मोक्ष) सिद्ध होता है, वही धर्म है ऐसा कहा है ॥ वेद के उपाङ्ग के रूप मे परिगणित तर्कशास्त्र से वेदानुयायी, तर्कप्रधान न्याय और वैशैषिक दर्शन को ही लिया गया है ।इनमें न्यायदर्शन प्रमाणप्रधान और वैशेषिकदर्शन प्रमेयप्रधान है ।प्रमाण के विना प्रमेय का यर्थाथस्वरूप नहीं जान सकते और प्रमेयों (विषयों)के विना प्रमाण भी अधूरें ही रह जाते हैं । इस प्रकार ये दोनों दर्शन परस्पर सापेक्ष होकर एक दूसरे के पूरक होते हैं । इसीलिए इन दोनों को समानतन्त्र माना जाता है । फिर भी इन्होंने अपनी-अपनी मौलिक विशेषता को कभी नहीं खोया, अतः आज भीये दोनों दर्शन,दार्शनिक-जगत में स्वतन्त्र दर्शन के रूप में ही प्रसिद्ध हैं ॥ **प्रदीपः सर्वविद्यानाम्** ..और **काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्** आदि वचनों से ज्ञात होता है कि - न्याय और

वैशेषिक दर्शन सभी शास्त्रों के तत्त्व जिज्ञासुओं लिए बहुत ही उपकारक हैं। इनदोनों दर्शनों के सूत्र, भाष्य, वार्तिक आदि अतिगहन और विस्तृत ग्रन्थ उत्तर काल में दुर्ज्ञेय होने लगे । अतः इनको सरल और सुगम बनाने के लिए किसी संग्रह और सुबोध ग्रन्थ की आवश्यकता थी । जिसको ध्यान में रखकर दशमी शताब्दी में महातार्किक और तत्त्ववेत्ता श्री उदयनाचार्यजी ने लक्षणावली ग्रन्थ के रूप में बीजारोपण किया । कालान्तर में उसीके आधार पर कई विद्वानों अपनी-अपनी लेखनी चलायी ।जो आज तर्कभाषा, तर्कसंग्रह, तर्कामृतम्, न्यायसिद्धान्तमुक्तावली आदि ग्रन्थों के रूप में प्रसिद्ध हैं । पर उनमें भी अन्नंभट्ट विरचित तर्कसंग्रह प्रारम्भिक जिज्ञासुओं के लिये सबसे अधिक उपयुक्त सिद्ध हुआ है । क्योंकि —इस लघुग्रन्थ में ग्रन्थकर्ता ने उक्त दोनों दर्शनों के सभी मुख्य विषयों को सरल-सुबोध ढंग से समावेश करके **गागर में सागर भरने** का कार्य किया है ।इसीलिए इस छोटे से ग्रन्थ के अनेक भाषाओं में सैकडों व्याख्यायें हो चुकी हैं और आज भी हो रहीं हैं ॥

यद्यपि सभी व्याख्याओं की अपनी अपनी विशेषता होती है, फिर भी हमारे पूज्य **आचार्य श्री के.एस्. वरदाचार्यजी** के द्वारा विरचित इस आलोक व्याख्या उन सभी व्याख्याओं से अलग है,यह ग्रन्थाध्ययन करने वालों को स्वतःही मालूम होगा। आचार्यजी का सम्पूर्ण जीवन दर्शनों के सभी गहन विषयों के शोधनकरने में ही व्यतीत हुआ है,जिससे उन्होंने अतिदुरूह विषयों को भी इदमित्थम् रूपसे निर्णय किया है । प्रायः ऐसा ज्ञान और विज्ञान का संमिश्रण बहुत ही दुर्लभ है । सभी शास्त्रों के मूलपुरुष (महापुरुष) को छोडकर केवल बुद्धिजीवी पण्डितों के द्वारा दर्शनों के मर्यादा-अतिक्रमण से जो दर्शन शास्त्रों में साङ्कर्य आया है,जिससे तटस्थ मतिवाले जज्ञासुओं के लिए इनका यथार्थस्वरूप जानना कठिन सा हुआ है।

अतः इसके लिए तत्तत् शास्त्र के मूलपुरुष के द्वारा देश-काल-अधिकारीयों के भेद से लिखे हुए उन शास्त्रों की मर्यादा सर्वप्रथम निर्धारित करना अत्यावश्यक है । जिससेहमें विषयों के यथार्थस्वरूप ज्ञात होंगे । जैसे — न्याय-वैशेषिक शास्त्र बाह्य स्थूल पदार्थों के ही विवेचन के लिए है, अतः इसकी मर्यादा को यहीं तक निर्धारित करना चाहिये । इसलिए वेदान्तशास्त्र से प्रतिपाद्य आन्तर विषयों (अध्यात्मतत्त्व) के लिए न्याय-वैशेषिक दर्शन को नहीं लाना चाहिये । ऐसे अनेकों विषयों का प्रकाश पूज्य श्री आचार्य जी ने किया है । ये सब, उनके द्वारा प्रतिपादित विषयों को विना पूर्वाग्रह के अध्ययन करने से अवश्य ही जान सकते हैं । लौकिक दृष्टि से ऊपर उठ कर जो केवल आध्यात्मिक दृष्टि से प्रमेयशोधन करते हैं,उनके द्वारा किया हुआ सत्यान्वेषण मानवमात्र के हितार्थ होता है । इसी कारण आचार्यजी द्वारा संशोधित विषयों को **सत्यान्वेषण** नाम दिया गया है । यद्यपि इनके द्वारा रचित सभी ग्रन्थ इसी नाम को सार्थककरते हैं,फिर भी तत्काल में तत्त्वमुक्ताकलाप नामक प्रसिद्ध दार्शनिक ग्रन्थ के उपर **सर्वाङ्कषा** व्याख्या के माध्यम से किया हुआ सत्यान्वेषण, सत्यान्वेषीयों के द्वारा विशेषतः द्रष्टव्य है और अतिशीघ्र प्रकटित होने वाला **सत्यसिद्धि** नामक स्वतन्त्र दार्शनिक ग्रन्थ भी नीरक्षीर विवेकी सत्यान्वेषकों के लिए वरदान सावित होगा, ऐसा हमें विश्वास है ॥

इसी प्रकार प्रस्तुत तर्कसंग्रह के आलोक व्याख्या में भी संक्षिप्त में सरल और सुबोध ढंग से अनेक विषयों को निर्धारित किया है । जिसके अध्ययन से बुद्धि को प्रामाणिकरूप से सुविचारशील बनाकर अतिगहन अध्यात्म की ओर प्रेरित किया जा सकता है । यद्यपि अध्यात्मतत्त्व बुद्धिक्षेत्र से अतीत है फिर भी अनुभवसाक्षिक सद्बुद्धि उस ओर बढने के लिए सहायक तो अवश्य ही बन सकती है । अनुभव विरूद्ध केवल उच्छृङ्खल शुष्कतर्क से तो कोई भी विषय निर्धारित नहीं हो सकता ॥

पदार्थधर्मों को तत्तत्संबन्ध के द्वारा ठीक ढंग विश्लेषण करने से तत्तत्पदार्थों के यथार्थ स्वरूप को असङ्कीर्णरूप से जाना जा सकता है, इसके लिए ही नव्यन्याय उपादेय है । इन सब बातों को ध्यान में रखते हुए प्रारम्भिक शिक्षा के दृष्टि से बहुत लोगों के द्वारा प्रार्थना करने पर आचार्यजी ने यह व्याख्या लिखी । जो इससे पूर्व सन्. २००१ में प्रकाशित हुई थी। ग्रन्थ की उत्कृष्टता इसी से पता चलता है कि — प्रकाशित होते ही ग्रन्थ अतिशीघ्र समाप्त हो गये । अतःबहुत पहले से इसकी पुनर्मुद्रण के लिए लोग कह रह थे । परन्तु कुछ और न्याय दर्शन के महत्त्वपूर्ण विषयों को भी इसी प्रकार सरल-सुबोध ढंग से समाविष्ट करने के लिए विद्वानों के द्वारा आग्रह होने से और अन्य प्राविधिक कारणों से भी पुनर्मुद्रण में बिलम्ब हुआ । फिर भी **प्रतीक्षा का फल मीठा होता है** इस उक्ति को चरितार्थ करते हुए इस पुनर्मुद्रण में न्यायवैशेषिक दर्शन के मङ्गलवाद, ईश्वरानुमान, परमाणुसिद्धि, अवयवातिरिक्त-अवयविसाधन, विभागजविभाग, कार्यकारणभावविचार, प्रामाण्यवाद, विध्यर्थवाद आदि महत्त्वपूर्ण सभी विषयों का सरलीकरण करते हुए समावेश किया है ।जो प्रमेयशोधन करने वालों को अत्यन्त ही उपयुक्त होगा,ऐसा हमें विश्वास है । अन्त में ग्रन्थ को परिमार्जित कर पुनः प्रकाशन कराने में प्रत्यक्षाप्रत्यक्षरूप से सहयोग करने वाले सभी पूज्य जनों के प्रति कृतज्ञता प्रकट करते हुए और पूज्य श्री आचार्यजी के श्रीचरणों में वन्दन करते हुए, अपनी लेखनी को विश्राम देता हूँ ॥

५-११-२००७
मैसूर

आचार्यचरणचञ्चरीक
रघुनाथ शास्त्री

॥ तर्कसंग्रहः ॥

*[1]निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः [1]॥

[6]द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः[6] ।

[9]तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।
रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेह-
शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः[9] ।

[10]उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।
परमपरं चेति द्विविधं सामान्यम्[10]।

[14]नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव [14]।

[15]समवायस्त्वेक एव ।
अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति [15]।

[27]तत्र गन्धवती पृथिवी । सा द्विविधा नित्यानित्या चेति । नित्या परमाणुरूपा। अनित्या कार्यरूपा । पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणम् । तच्च नासाग्रवर्ति । विषयो मृत्पाषाणादिः[27] ।

[37]शीतस्पर्शवत्य आपः[37] । [42]ताश्च द्विविधाः । नित्या अनित्याश्चेति। नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । पुनस्त्रिविधाः शरीरेन्द्रिय-विषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनम् । तच्च जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः [42]।

[43]उष्णस्पर्शवत्तेजः । तद्द्विविधम् । नित्यमनित्यं चेति । नित्यं

---

*अत्र विद्यमानास्संख्याः पुटसंख्यासूचकाः ।

परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रियविषय-भेदात्। शरीरमादित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः। तच्च कृष्णताराग्रवर्ति। विषयश्चतुर्विधः। भौमदिव्यौदर्याकरजभेदात्। तत्र भौमं वह्न्यादि। दिव्यमबिन्धनं विद्युदादि। भुक्तस्य परिणामहेतुरौदर्यम्। आकरजं सुवर्णादि [43]।

[47]रूपरहितस्पर्शवान् वायुः [47]। [57]स द्विविधः। नित्योऽनित्यश्चेति। नित्यः परमाणुरूपः। अनित्यःकार्यरूपः। पुनस्त्रिविधः। शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक्। तच्च सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुर्वायुः, शरीरान्तस्संचारी वायुः प्राणश्च। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।

शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च [57]।

[61]अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च [61]।

[64]प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका विभ्वी नित्या च [64]।

[67]ज्ञानाधिकरणमात्मा [67]। [70]स द्विविधः। जीवात्मा परमात्मा चेति। तत्रेश्वरस्सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च[70]।

[74]सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च [74]।

[76]चक्षुर्मात्रग्राह्यो गुणो रूपम् [76]। [80]तच्च शुक्लनीलपीतरक्तहरितकपिशचित्र-भेदात्सप्तविधम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।

रसनग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव [80]।

[83]घ्राणग्राह्यो गुणो गन्धः। स द्विविधः। सुरभिरसुरभिश्चेति। पृथिवीमात्र-वृत्तिः [83]।

[85]त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः [85]। [88]स त्रिविधः। शीतोष्णानुष्णा-

शीतभेदात् । पृथिव्यप्तेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः ।

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यम् । अन्यत्रापाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ।

एकत्वादिव्यवहारहेतुः संख्या । नवद्रव्यवृत्तिः [88] । [92] एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यगतं नित्यम् । अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्रानित्यमेव। मानव्यवहारासाधारणकारणं परिमाणम् । नवद्रव्यवृत्ति । तच्चतुर्विधम् । अणु महद्दीर्घं ह्रस्वं चेति [92]।

[96] पृथग्व्यहारासाधारणकारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति [96]।

[98] संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः [98]।

[102] संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः [102]।

[108] परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते द्विविधे । दिक्कृते कालकृते चेति । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् [108]।

[112] आद्यपतनासमवायिकारणं गुरुत्वम् । पृथिवीजलवृत्ति [112]।

[114] आद्यस्यन्दनासमवायिकारणं द्रवत्वम् । पृथिवीजलतेजोवृत्ति । तद् द्विविधम्। सांसिद्धिकं नैमित्तिकं चेति । सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम् । तेजसि सुवर्णादौ [114]।

[116] चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः [116]।

[119] श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । स द्विविधः । ध्वन्यात्मको वर्णात्मकश्चेति । ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः [119]।

[121] सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः [121]। [123] सा द्विविधा - स्मृतिरनुभवश्चेति । संस्कारमात्रजन्यं ज्ञानं स्मृतिः [123]। [124] तद्भिन्नं ज्ञानमनुभवः । स द्विविधः - यथार्थोऽयथार्थश्चेति [124]।

[125]तद्वति तत्प्रकारकानुभवो यथार्थः । सैव प्रमेत्युच्यते । यथा रजते इदं रजतम् इति ज्ञानम्[125]।

[131]तदभाववति तत्प्रकारकानुभवोऽयथार्थः । सैवाप्रमेत्युच्यते । (स एव भ्रम इत्युच्यते ।) यथा शुक्तौ इदं रजतम् इति ज्ञानम्[131]।

[140]यथार्थानुभवश्चतुर्विधः । प्रत्यक्षानुमित्युपमितिशाब्दभेदात्[140]।

[141]तत्करणमपि चतुर्विधम् - प्रत्यक्षानुमानोपमानशब्दभेदात् । (व्यापारवत्) असाधारणकारणं करणम्[141]। [144](अनन्यथासिद्धत्वे सति) कार्यनियत-पूर्ववृत्ति कारणम्[144]। [146]कार्यं प्रागभावप्रतियोगि[146]। [148]कारणं त्रिविधम् – समवाय्यसमवायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः[148]। [149]कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत्कारणमसमवायिकारणम् । यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटगतरूपस्य च[149]। [151]तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य[151]। [152]तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्द्विविधम् - निर्विकल्पकं सविकल्पकं चेति । निष्प्रकारकं ज्ञानं निर्विकल्पकम्। सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयं, पाचकोऽयमिति ।

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसंनिकर्षः षड्विधः[152]। [153]संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति । चक्षुषा घटप्रत्यक्षजनने संयोगः संनिकर्षः । घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपस्य समवायात् । रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायःसन्निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतम् । तत्र रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे

समवायः संनिकर्षः। कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वात्। शब्दस्याकाशगुणत्वात् गुणगुणिनोः समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायः संनिकर्षः। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशेषणविशेष्यभावः संनिकर्षः, भूतलं घटाभाववत् इत्यत्र चक्षुःसंयुक्तभूतले घटाभावस्य विशेषणत्वात्[153]।

[154]एवं संनिकर्षजन्यं ज्ञानं प्रत्यक्षम्, तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्[154]॥

इति तर्कसंग्रहे प्रत्यक्षपरिच्छेदः समाप्तः॥

[157]अनुमितिकरणमनुमानम्[157]। [158]परामर्शजन्यं ज्ञानमनुमितिः।

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः। तज्जन्यं 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिः। यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः[154]। [169]व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता। अनुमानं द्विविधम्। स्वार्थं परार्थं चेति। स्वार्थं स्वानुमितिहेतुः। तथा हि - स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ धूमे व्याप्तिं गृहीत्वा पर्वतसमीपं गतः, तद्गते चाग्नौ सन्दिहानः, पर्वते धूमं पश्यन्, व्याप्तिं स्मरति 'यत्र धूमस्तत्राग्निरि'ति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमान् इति अनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्[169]।

[170]यत्तु स्वयमेव धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। यथा पर्वतो वह्निमान् धूमवत्त्वात्, यो यो धूमवान् सोऽग्निमान् यथा महानसः, तथा चायम्, तस्मात्तथा इति। अनेन वाक्येन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमान् इति प्रतिज्ञा। धूमवत्त्वात् इति हेतुः। यो यो धूमवान्

सोऽग्निमान् यथा महानस इत्युदाहरणम्। तथा चायं इत्युपनयः। तस्मात्तथेति निगमनम्[170]। [171]स्वार्थानुमितिपरार्थानुमित्योःलिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्[171]।

[173]लिङ्गं त्रिविधम्। अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्निः यथा महानसः इत्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रदः इति व्यतिरेकव्याप्तिः। अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात् पटवत् इति। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च। व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्। यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलम्। न चेयं तथा। तस्मान्न तथेति[173]। [174]अत्र यद्गन्धवत्तदितरभिन्नम् इत्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात्[174]।

[175]सन्दिग्धसाध्यवान् पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः[175]।

[176]निश्चितसाध्यवान् सपक्षः। यथा तत्रैव महानसः। निश्चितसाध्याभाववान् विपक्षः। यथा तत्रैव महाह्रदः[176]।

[179]सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः[179]।

[180]सव्यभिचारोऽनैकान्तिकः। स त्रिविधः – साधारणासाधारणानुपसंहारिभेदात्। तत्र साध्याभाववद्वृत्तिः साधारणः। यथा पर्वतो वह्निमान् प्रमेयत्वात्। अत्र प्रमेयत्वस्य वह्न्यभाववति (साध्याभाववति) ह्रदे विद्यमानत्वात्। सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः। यथा शब्दो नित्यः शब्दत्वात्। अत्र शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्ति[180]।

[181]अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वात्। अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति। साध्याभावव्याप्तो हेतुर्विरुद्धः।

यथा शब्दो नित्यः कार्यत्वात् (कृतकत्वात्) घटवत्। (अत्र कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्।[181]) [182]यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वात् शब्दोऽनित्यः कार्यत्वात् घटवत्[182]। [183]असिद्धस्त्रिविधः – आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा – गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः। स च नास्त्येव[183]। [184]स्वरूपासिद्धो यथा – शब्दो गुणः चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्। सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधित्वम्। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। (यथा) पर्वतो धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनसंयोग उपाधिः। यत्र धूमः तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता। यत्र वह्निः तत्रार्द्रेन्धनसंयोगो नास्ति, अयोगोलक आर्द्रेन्धनसंयोगाभावात्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्[184]। [186]यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। यथा वह्निरनुष्णः पदार्थत्वात्। अत्रानुष्णत्वं साध्यम्, तदभाव उष्णत्वं त्वाचप्रत्यक्षेण गृह्यत इति बोध्यम्[186]। इति तर्कसंग्रहे अनुमानपरिच्छेदः समाप्तः॥

[190]उपमितिकरणमुपमानम्। संज्ञासंज्ञिसंबन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। तथा हि - कश्चिद्वयशब्दार्थमजानन् कुतश्चिदारण्यकपुरुषात् गोसदृशो गवयः इति श्रुत्वा वनं गतो गोसदृशपिण्डं पश्यन् वाक्यार्थं स्मरति। तदनन्तरमयं गवयपदवाच्यः इत्युपमितिरुत्पद्यते। व्याख्यातमुपमानम्[190]॥ इति तर्कसंग्रहे उपमानपरिच्छेदः समाप्तः।

[192]आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं तु पदसमूहः[192]। [193]शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंङ्केतः शक्तिः[193]। 200

आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः । पदस्य पदान्तरव्यतिरेक-प्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा । अर्थाबाधो योग्यता [200]। [201] पदानामविलम्बेनोच्चारणं सन्निधिः । आकाङ्क्षादिरहितं वाक्यं न प्रमाणम् । यथा गौरश्वः पुरुषो हस्ती इति वाक्यं न प्रमाणम्, आकाङ्क्षाविरहात् । अग्निना सिञ्चतीति वाक्यं न प्रमाणं योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात् [201]। [202] वाक्यं द्विविधं -- वैदिकं लौकिकं चेति । वैदिकमीश्वरोक्तत्वात् सर्वमपि प्रमाणम् । लौकिकं त्वाप्तवाक्यं प्रमाणम् । अन्यदप्रमाणम् [202]। [203] वाक्यार्थज्ञानं शाब्दज्ञानम् । तत्करणं शब्दः [203] ॥ इति तर्कसंग्रहे शब्दपरिच्छेदः समाप्तः ॥

[205]एवं यथार्थानुभवो निरूपितः । अयथार्थानुभवस्त्रिविधः -- संशयविपर्ययतर्कभेदात् । एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वा इति [205]। [206] मिथ्याज्ञानं विपर्ययः । यथा शुक्ताविदं रजतम् इति । व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात् इति [206]। [208] स्मृतिरपि द्विविधा । यथार्थाऽयथार्था चेति । प्रमाजन्या यथार्था । अप्रमाजन्या अयथार्था [208]। [215] सर्वेषामनुकूलतया वेदनीयं सुखम् । प्रतिकूलतया वेदनीयं दुःखम् [215]। [216] इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः । विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः [216]।

[218]बुद्ध्यादयोऽष्टावात्ममात्रगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य । अनित्या जीवस्य । संस्कारस्त्रिविधः । वेगो भावना स्थितस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः ।

अनुभवजन्या स्मृतिहेतुर्भावना [218]। [219] आत्ममात्रवृत्तिः ।

अन्यथाकृतस्य (स्थितस्य) पुनस्तादवस्थ्यापादकः स्थितस्थापकः । कटादिपृथिवीमात्रवृत्तिः [219]।

[220]चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुः उत्क्षेपणम्। अधोदेश-संयोगहेतुरपक्षेपणम्। शरीरसंनिकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्[220]।

[221]नित्यमेकमनेकानुगतं सामान्यं। परं सत्ता। अपरं द्रव्यत्वादि। नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः[221]।

[223]नित्यसंबन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्य एकमविनश्य-दवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति[223]।

[225]अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य[225]।

[226]सादिरनन्तः प्रध्वंसाभावः। उत्पत्तेरनन्तरं कार्यस्य।

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोत्यन्ताभावः। यथा भूतले घटो नास्ति इति[226]। [228] तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः। यथा घटः पटो न भवति इति[228]।

[229]सर्वेषामपि पदार्थानां यथायथम् उक्तेष्वेवान्तर्भावात् सप्तैव पदार्थाः इति सिद्धम्[229]॥

[231]काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः[231]॥

इति तर्कसंग्रहः समाप्तः॥

विषयसूचिका

Preface	iii
निवेदनम्	v
प्रस्तावना	vii
प्राक्कथन	xix
तर्कसंग्रहमूलम्	xxiii
आलोकव्याख्या-दिप्पणीभ्यां संवलितः तर्कसंग्रहः	1 - 232

टिप्पणीस्थविषयाः

मङ्गलवादः	1
जातिबाधकसंग्रहः	10
अभावविचारः	15
साधर्म्यवैधर्म्ये	18
पृथिवीत्वजातिः	33
परमाणुसाधनम्	34
अवयवातिरिक्तावयविसाधनम्	36
ईश्वरानुमानम्	70
संयोगविभागविशेषविचारः	104
अन्यथाख्यातिविचारः	137
अन्यथासिद्धिः	145
अलौकिकसन्निकर्षः	155
अव्याप्यवृत्तिसाध्यकहेतुविचारः	167
पक्षताविचारः	176
शक्तिग्राहकप्रमाणानि	193
शाब्दबोधविचारः	196
प्रामाण्यवादः	209
विध्यर्थः	216

॥ श्रीः ॥

श्रीमदन्नंभट्टविरचितः

तर्कसंग्रहः

नव्यमङ्गलाभिजन-वरदाचार्य-विरचिताभ्यां

'आलोक' व्याख्या-टिप्पणीभ्यां संवलितः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥

आलोक-व्याख्या

श्रीहयास्यं हृदि ध्यात्वा गुरूणां चरणौ तथा ।
आलोकेन तु बालेभ्यो योज्यते तर्कसंग्रहः ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानमस्कारादिगर्भं *मङ्गलमाचरति--**निधायेत्यादि** । **विश्वेशः**=काशीक्षेत्राधिनाथो विश्वनाथः।

टिप्पणी

***मङ्गलवादः** -- मणिग्रन्थादारभ्य मुक्तावलीपर्यन्तेषु प्रायस्सर्वेषु ग्रन्थारम्भे मङ्गलस्य अवश्यकर्तव्यता तस्य समाप्तिं प्रति कारणत्वविचारश्च विस्तरेण दृश्यते। मङ्गलसमाप्त्योःकार्यकारणभावश्च अन्वयव्यतिरेकसहचाराभ्यां समर्थ्यते। यत्सत्त्वे यत्सत्त्वं अन्वयसहचारः, यदभावे यदभावः व्यतिरेकसहचारः । आभ्यां कार्यकारणभावः सिद्ध्यति। यथा मृद्दण्डादिसत्त्वे घटो भवति, मृद्दण्डाभावे घटो न भवेदिति दृष्टान्तः। प्रकृते मङ्गलसत्त्वे समाप्तिसत्त्वं, मङ्गलाभावे समाप्त्यभावश्च बहुलं दर्शनात् तयोः कार्यकारणभावः सिद्ध्यतीति वक्तव्यम् । परन्तु बाणभट्टविरचितायां कादम्बर्यां मङ्गलं

आलोक-व्याख्या

देवं विश्वनाथं **हृदि निधाय**= ध्यात्वेत्यर्थः । 'निधानं =निक्षेप' इत्यर्थमादाय, हृदये विश्वनाथस्य निधानासंभवात् निधानं नाम वृत्तित्वप्रकारकाहार्यज्ञानमिति केचन वदन्ति । आहार्यज्ञानं नाम बलात्कारेण संपाद्यमानं ज्ञानम्, आरोपात्मकम्। बहिर्देवालये विद्यमानाया विश्वनाथार्चामूर्तेः हृदये निधानासंभवाभिप्रायेण तथाभिप्रयन्ति ते । अर्चामूर्तिर्नाम, बाह्यपूजाया आलम्बनीभूता स्थूला मूर्तिः। परन्त्वस्य अतिस्थूलदृष्टित्वात्, निधाय= ध्यात्वा इत्येव वरम् । हृदयम् = चित्तं, मनो वा । परमात्मनो ध्यानस्य हृदयमुत्तमं स्थानमिति ध्यानरहस्यविदः। अतः **'विश्वनाथं हृदि ध्यात्वा'इत्येव स्वरसम्** ।।

टिप्पणी

दृश्यते, समाप्तिस्तु न दृश्यते इत्यन्वयव्यभिचारः। प्राचीनन्यायसूत्रभाष्यादिग्रन्थेषु बहुषु मङ्गलाभावेऽपि समाप्तेर्दर्शनात् व्यतिरेकव्यभिचारश्च स्पष्टः । एवं द्विविधव्यभिचारसत्त्वे कथं तयोः कार्यकारणभावः, कथं वास्तिकैर्मङ्गलाचरणम् ? इति पूर्वपक्ष्याशयः।।

कारणाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वं कार्यस्य अथवा स्वाधिकरण-वृत्त्यत्यन्ताभावाप्रतियोगिकार्यकत्वं कारणस्य अन्वयसहचारस्य लक्षणम् । स्वं कारणं दण्डचक्रकुलालादि , तदधिकरणं देशः । तत्र वर्तते यः अभावः इति चेत्, घटाभावः न भवति, तत्र घटस्य जननात् । अतः पटाद्यभाव एव ग्राह्यः । तत् प्रतियोगी पटः, घटोऽप्रतियोगी भवतीति तादृशकार्यकत्वम् अन्वयसहचारः । अत एव स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगिकार्यकत्वम् अन्वयव्यभिचारः । एवम् कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वं कारणस्य व्यतिरेकव्यभिचारः । यथा -- घटाधिकरणदेशे नियमेन दण्डादेरावश्यकत्वात्, तत्र वर्तमानोऽभावो रासभादेरेव भवति। तत्प्रतियोगि रासभादि । अप्रतियोगित्वं दण्डादेर्भवतीति दण्डादेर्घटकारणत्वं, रासभादेस्तदकारणत्वं च सिद्ध्यति ।।

प्रकृते मङ्गलसमाप्त्योःकार्यकारणभावे वक्तव्ये, कादम्बर्यादौ मङ्गलसत्वेऽपि समाप्तेरदर्शनात् अन्वयव्यभिचारः । स्वं मङ्गलं तदधिकरणं कादम्बरी । तत्र वर्तते समाप्त्यभावः । तत् प्रतियोगि समाप्तिरूपं कार्यम् । तद्विशिष्टत्वरूपं तत्कत्वं मङ्गले

आलोक-व्याख्या

विश्वेशमित्यत्र द्वितीयाया विषयत्वमर्थः । प्रकृत्यर्थस्याधेयता- (वृत्तिता) संबन्धेनान्वयः । विषयताया निरूपकतासंबन्धेन 'ल्यप्'प्रत्ययस्य प्रकृतिभूतधाधात्वर्थध्यानेऽन्वयः। निधायेति 'ल्यप्'प्रत्ययस्य उत्तरकालिकत्वमर्थः। तस्य चाश्रयतासंबन्धेन कृधात्वर्थकृतावन्वयः । हृदि इत्यत्र सप्तम्या अधिकरणत्वमर्थः। तस्य च निरूपकतासंबन्धेन ध्यानेऽन्वयः । तथा च **विश्वनाथनिष्ठविषयतानिरूपकहृदधिकरणक(हृन्निष्ठाधिकरणतानिरूपक) ध्यानोत्तरकालिकी कृतिः** इति विश्वेशं हृदि निधाय इति वाक्याद् बोधः।।

टिप्पणी

वर्तत इति अन्वयव्यभिचारः । तथा कार्यं समाप्तिः । तदधिकरणं नास्तिकग्रन्थः। तत्र मङ्गलाभावो वर्तते। तत् प्रतियोगि मङ्गलमिति व्यतिरेकव्यभिचारः। अतश्च समाप्तिं प्रति मङ्गलं कथं कारणं भवेत् ?।।

न च कादम्बर्यादौ अदृष्टादिकारणवैकल्यात् न समाप्तिः । एवं नास्तिकग्रन्थादौ जन्मान्तरीयादृष्टवशादेव समाप्तिरिति न दोष इति वाच्यम्; मङ्गलसमाप्त्योः कार्यकारणभावविनिश्चये सिद्ध एव तथा वक्तुं शक्यम्। पूर्वोक्तव्यभिचाराभ्यां कार्यकारणभावस्य असिद्धत्वात् तथा वक्तुमशक्यत्वात्, अन्योन्याश्रय एव विश्रान्तेरिति चेत् ; मैवम् , कार्यकारणभावस्य प्रत्यक्षेणैव निर्णेयत्व एव स्यादयं दोषः । प्रत्यक्षेण तदसंभवेऽपि अनुमानेनैव साध्यते। न चान्वयव्यतिरेकव्यभिचारयोः सत्त्वे कथमनुमानेन तत्साधनसंभव इति शङ्क्यम् ; मङ्गले कृतेऽपि समाप्त्यभावस्य अदृष्टविशेषप्रयुक्तत्वात् अन्वयव्यभिचारस्य कारणताग्रहं प्रति न हि प्रतिबन्धकत्वसंभवः । नास्तिकग्रन्थादौ तथैव अदृष्टविशेषवशादेव समाप्तेस्संभवात् नानुमानप्रतिबन्धकत्वसंभवः ।

किञ्च 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि' इति मङ्गलत्रैविध्यस्य च सत्त्वेन मङ्गलाभावस्य निश्चेतुमशक्यत्वेन अन्ततः संशये पर्यवसानात्, संशयस्य च पक्षतारूपत्वेन अनुमितिं प्रति अप्रतिबन्धकत्वेन अनुमानेनैव मङ्गलसमाप्त्योः कार्यकारणभावः साध्यते ।।

'मङ्गलं समाप्तिफलकं, समाप्त्यन्याफलकत्वे सति सफलत्वात्' इति

आलोक-व्याख्या

अथ विद्यागुरूणां वन्दनमाह--**विधायेत्यादिना** । गुरोः वन्दनं =गुरुवन्दनमिति षष्ठीतत्पुरुषः । गुरोरित्यत्र कर्मणि षष्ठी । तस्या विषयत्वमर्थः। विषयत्वस्य च निरूपकतासंबन्धेन वन्दनक्रियायामन्वयः । वन्दनं नाम **स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापार** इति संप्रदायः ।।

टिप्पणी

परिशेषानुमानेन तयोः कार्यकारणभावसिद्धिः। 'मङ्गलं सफलम्, बलवदनिष्टाननुबन्धित्वे सति शिष्टा(प्रामाणिकजना) चारविषयत्वात् , दर्शश्राद्धादिवत् ' इत्यनुमानेन उक्तानुमाने विशेष्यासिद्धिपरिहारः । श्येनादियागादेरपि शिष्टाचारविषयत्वात् , तस्य च नरकादि-हेतुत्वात् , तावन्मात्रेण प्रवृत्तेरसंभवेन सफलत्वसाधनस्यायुक्तत्वात्, तद्वारणाय बलवदनिष्टा-ननुबन्धित्वविशेषणम्। एवं 'मङ्गलं समाप्तिफलकम् , समाप्त्युद्देशेनैवानुष्ठीयमानत्वात् ,यत् यदुद्देशेन अनुष्ठीयते तत् तत्फलकम् , यथा धान्योद्देशेन क्रियमाणं कृष्यादि' इत्यनुमानेन समाप्त्यन्याफलकत्वसिद्ध्या, उक्तपरिशेषानुमानेन मङ्गलसमाप्त्योः कार्यकारणभावस्य सिद्ध्या, कादम्बर्यादौ कारणान्तरेणापि समाप्त्यभावस्य संभवेन नान्वयव्यभिचाररूपदोषः। नास्तिकग्रन्थादौ च सुकृतविशेषवशादेव तत्संभवेन न व्यतिरेकव्यभिचारदोषः । तस्मात् उक्तानुमानेन कार्यकारणभावसिद्धेर्निष्प्रत्यूहत्वात् न दोषः ।।

नव्यास्तु-- मङ्गलस्य विघ्नध्वंसं प्रत्येव कारणत्वम्, न तु समाप्तिं प्रति । समाप्तिं प्रति तु आयुःप्रभृतीनामेव कारणत्वम् । एवञ्च नास्तिकग्रन्थादौ स्वत एव विघ्नाप्रसक्त्या विघ्नध्वंससंभवेऽपि न समाप्तेर्विरोधः। विघ्नध्वंसवत् विघ्नात्यन्ताभावस्य, विघ्नप्रागभावस्य च कारणत्वात्, नास्तिकग्रन्थे विघ्नात्यन्ताभावप्रागभावान्यतरसंभवेन समाप्तेः, जन्मान्तरीयमङ्गलकल्पनादिक्लेशो नास्तीति वदन्ति । परन्तु, प्राचीनमते मङ्गलस्य विघ्नध्वंसद्वारैव समाप्तिजनकत्वात् , द्वारेण द्वारिणोऽन्यथासिद्धौ, यागादेरपि स्वर्गादिसाधनत्वं दुर्वचं स्यादिति वेदप्रामाण्यस्यैव तिलाञ्जलिप्रसङ्गः । अतो मङ्गलं समाप्तिं प्रत्येव कारणम्। दोषस्तु पूर्वोक्तरीत्यैव परिहार्यः ।।

आलोक-व्याख्या

'स्वस्मात् उत्कृष्टो गुरुः' इति ज्ञानात्किल शिष्यो गुरुं वन्दते । उत्कृष्टः= उत्कर्षस्याश्रयः। अत्रोत्कर्षस्य पूर्वावधिः स्वात्मा, उत्तरावधिर्गुरुः । अतः स्वावधिकोत्कृष्टत्वप्रकारकज्ञाने उत्कृष्टत्वं प्रकारः, गुरुः विशेष्यः । यदा शिष्यो गुरुं वन्दते, तदा पार्श्वस्थाः मन्यन्ते, अस्य नन्तुः, नम्ये गुरावुत्कृष्टत्वज्ञानं वर्तते, अतो वन्दत इति । अतः परेषामयं शिष्यः, स्वावधिकोत्कृष्टत्वप्रकारकं ज्ञानं जनयति । अतश्च परेषां तादृशज्ञानप्रयोजकं भवति शिष्यस्य वन्दनम्। एतेन **'गुरुं प्रकाशयेद्धीमान्'** इति शास्त्रार्थः सूचितः ।।

वस्तुतः स्वावधिकोत्कृष्टत्वप्रकारकज्ञानं स्वपदार्थनिष्ठं सत् नमनक्रियां जनयति । अतः 'स्वावधिकोत्कृष्टत्वप्रकारकस्य ज्ञानस्यानुकूलः—प्रयोजको वन्दनरूपव्यापारः' इत्यर्थापेक्षया, **स्वावधिकोत्कृष्टत्व-प्रकारकज्ञानम् अनुकूलम् (प्रयोजकं) यत्र (नमनादिरूपव्यापारे)** इति समासेन, तादृशज्ञानस्य वन्दनप्रयोजकत्वं वाच्यम् । एवं शिष्यस्य स्वावधिकोत्कृष्टत्वप्रकारकज्ञानमेव वन्दनरूपव्यापारस्य प्रयोजकं भवति ।।

अथवा 'तादृशज्ञानानुकूलिव्यापारः' इत्यर्थो वाच्यः । अनुकूलम् (प्रयोजकम्) अस्यास्तीति अनुकूली, प्रयोज्य इत्यर्थः । ज्ञानस्यानुकूली = ज्ञानानुकूली, ज्ञानप्रयोज्यो व्यापारः । ज्ञानमित्यत्र षष्ठ्या निरूपितत्वमर्थः। अनुकूलित्वं प्रयोज्यत्वम् । तथा च स्वावधिकोत्कृष्टत्वप्रकारकज्ञानप्रयोज्यव्यापारो वन्दनमिति स्वरसम् । 'वन्दनं विधाय' इत्यत्रापि, ल्यप उत्तरकालिकत्वमर्थः । तथा च'**गुरुविषयकवन्दनोत्तरकालिकी कृतिः**' इति गुरुवन्दनं विधाय इति वाक्यस्यार्थः ।।

ग्रन्थरचनोद्देशं प्रकटयति--**बालानामित्यादि** । सुखं बोधः, सुखेन वा बोधः- सुखबोध इति समासः । सुखं नाम आयासाभावः, न तु आनन्दविशेषः, तात्पर्यानुसारात् । एतद्ग्रन्थाध्ययनकाले अध्येतुरायासाभावो

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ।

आलोक-व्याख्या

विवक्षितः । बालानामित्यत्र षष्ठ्याः समवेतत्वम् अर्थः । तस्य चाश्रयतासंबन्धेन सुखेऽन्वयः । बोधायेत्यत्र चतुर्थ्याः प्रयोजकत्वमर्थः । तस्याप्याश्रयतासंबन्धेन कृतावन्वयः ॥

'तर्क्यन्ते= प्रतिपाद्यन्ते इति तर्काः= द्रव्यादिपदार्थाः' इति **संप्रदायः** । **वस्तुतस्तु** — तर्कः- तर्कशास्त्रम्, न्यायवैशेषिकशास्त्रयोः अनुगतं नाम । एतयोः समानतन्त्रत्वं सर्वसम्मतम् । **न्यायशास्त्रं प्रमाणविचारप्रधानम् । वैशेषिकशास्त्रं च प्रमेयविचारप्रधानम् ।** उभयोः परस्परसापेक्षत्वं च स्पष्टम् । उभयमपि तर्कप्रधानम् । अतः तर्कसंग्रहः- तर्कशास्त्रसंग्रह इति स्वरसम् । 'मया' इत्यध्याहार्यं कर्तृवाचकं पदम् । अस्मच्छब्दस्य कर्ता अन्नंभट्ट इत्यर्थः । तृतीयायाः समवेतत्वमर्थः। तस्य चाश्रयतासंबन्धेन कृतावन्वयः।। तथा चाहत्य संपूर्णवाक्यबोधः— **विश्वनाथनिष्ठविषयतानिरूपकहृदयाधिकरणकध्यानोत्तरकालिकी , गुरुविषयकस्वावधिकोत्कृष्टत्वप्रकारकज्ञानप्रयोज्यवन्दनोत्तरकालिकी, बालसमवेतानायाससमानाधिकरणबोधप्रयोजिका, अन्नंभट्टसमवेता या कृतिः, तद्विषयस्तर्कशास्त्रसंग्रहो ग्रन्थ इति ।।**

अथ यथाप्रतिज्ञं ग्रन्थमारभते--**द्रव्येत्यादि** । अत्र 'पदार्थाः' इत्यत्र पदानामर्थाः-पदार्था इति विग्रहः । लोके विद्यमानानां सर्वेषामपि पदार्थानाम् एषु सप्तस्वेवान्तर्भावः । पदानि किल द्रव्यवाचीनि, गुणवाचीनि, कर्मवाचीनि, सामान्यवाचीनि इति चतुर्विधानीति महाभाष्यादिषु अभिहितम् । **घटादिपदानि द्रव्यवाचीनि, नीलादिपदानि गुणवाचीनि, पाचकादिपदानि क्रियावाचीनि, गवादिपदानि जातिवाचीनि ।** एवञ्च द्रव्यम्, गुणः, कर्म, सामान्यम् इत्यसङ्कीर्णप्रवृत्तिनिमित्तमूलकानि पदानि चतुर्विधानि ।

आलोक-व्याख्या

द्रव्यवाचिपदान्येव संज्ञापदानि, यदृच्छापदानि, केवलरूढपदानीति चोच्यन्ते। एवं पदानां चतुर्विधत्वात् पदार्था अपि चत्वारः प्रथमं सिद्धाः । एवमपि पदार्थानां भेदस्य अन्ते विशेषाधीनत्वात्, **भेदसिद्ध्यर्थो विशेषः**, भिन्नानां गुणगुण्यादीनां **संबन्धरूपतया समवायश्चेति** द्वौ शास्त्रव्यवहारसिद्धौ मिलित्वा पदार्थाः षट् संपन्नाः । अनन्तरं **निषेधव्यवहारविषयतया अभावाख्यः** सप्तमः पदार्थश्चेति पदार्थाः सप्त इति सिद्धम् । लोके पदार्थश्चेत् कश्चित् प्रामाणिकः, स एषु सप्तस्वन्तर्भवेत्, इति नियमार्थं 'सप्त' इति कीर्तनम् । तथा च **'यत्र यत्र पदार्थत्वम्, तत्र द्रव्यादिसप्तान्यतमत्वम्'** इति व्याप्तिर्ज्ञेया ।।

यथाप्रतिज्ञं प्रमाणप्रमेयस्वरूपं प्रतिपादयितुमुपक्रममाणः प्रथमं प्रमेयपदवाच्यान् पदार्थान् विभजते--**द्रव्येत्यादि** । द्रव्यादिपदं च तत्तत्संज्ञापरम्। सप्तत्वं न संख्यारूपम्, संख्याया गुणत्वेन द्रव्यमात्रे तत्संभवात्; गुणकर्मादिष्वसंभवात् । किन्तु बुद्धिविशेषविषयत्वरूपम् । एवमेव 'चतुर्विंशतिर्गुणाः' इत्यादौ । तथा च पदार्थाः- पदजन्योपस्थितिविषया अर्था द्रव्यगुणकर्मसामान्यविशेषसमवायाभावरूपसप्तसंज्ञान्यतमसंज्ञावन्त इति बोधः । तर्कशास्त्रं प्रविविक्षूणां लक्षणवाक्यव्यतिरिक्तवाक्यानां शाब्दबोधप्रदर्शने वृथायासः, अनतिप्रयोजनञ्चेत्यत्रैवोपरम्यते ।।

एवं पदानां चतुर्विधत्वात् पदार्था अपि द्रव्यगुणकर्मसामान्यानि चत्वारः । एवं भेदसाधकतया विशेषः, संबन्धरूपतया समवाय इति षडेव भावपदार्थाः। भावानां निषेधस्य चतुर्विधत्वात्, अभावश्चतुर्विधोऽपि अभावत्वेनैक एव । अत एव कुत्रचित् **'पदार्थो द्विविधः भावोऽभावश्चेति । भावषड्विधः, अभावस्तु चतुर्विधः'** इत्येवमपि विभागो दृश्यते ।

आलोक-व्याख्या

आहत्य तु पदार्थास्सप्तैव, एतदतिरिक्तस्यासंभवादेव । एतेष्वपि **आद्यानि चत्वारि लोकव्यवहारसिद्धानि, एतेषां निषेधस्यापि लोकव्यवहार-सिद्धत्वादभावोऽपि लोकव्यवहारेणैव सिद्धः । विशेषसमवायौ तु शास्त्रव्यवहारसिद्धाविति ज्ञेयम् ।।**

एवं पदार्थविभागस्य व्यवस्थितत्वादेव शक्तिसादृश्यादीनामतिरिक्त-पदार्थत्वाशङ्कनं समाधानञ्च वृथैव श्रमः । **'निशितः खड्गश्छेदने शक्तः, अनिशितो न शक्तः'** इति खलु दृश्यते । तेन ज्ञायते कारणस्य सामीचीन्यमेव शक्तिपदस्यार्थ इति । एवं बद्धपादः पुरुषो गन्तुं न शक्नोति । किं तत्रातिरिक्ता शक्तिर्दृश्यते ? गमनप्रतिबन्धको बन्धः । प्रतिबन्धकेऽसति गच्छत्येव । किं बहुना ? अबद्धपादोऽपि उपविष्टः पुरुषो न गच्छति । तस्य किं गमने शक्तिरस्ति, उत न ? अबद्धपादो गमने शक्तोऽपि, यदि नेच्छति तदा शक्तस्सन्नपि न गच्छति । तथैव निशितोऽपि खड्गः पुरुषानधिष्ठितो न किञ्चिच्छिनत्ति । किं स खड्गश्छेदने शक्तः, उत न ? क्रियावेशाभावान्न छिनत्तीति चेत्, तर्हि शक्तिपदार्थः कः? न हि शक्तिश्चक्षुषा दृश्यते । दण्डचक्रादिकं हि पुरुषाधिष्ठितं चेत् घटोत्पादने शक्तं भवति । अन्यदा तु न शक्तम् । दण्डः खलु पुरुषाधिष्ठितोऽपि कदाचित् घटं जनयति, कदाचित्तु घटं नाशयति च । किं दण्डो घटजनने शक्तः, उत घटनाशने? परस्परविरुद्धा शक्तिः कथमेकत्र समवेयात् ? **अतस्साधनानां समीचीनतैव शक्तिः । सैव स्वरूपयोग्यतेत्युच्यते । फलोपधानं तु तत्तत्पुरुषकालेश्वरादृष्टा-द्यधीनमिति शक्तिर्नातिरिक्तः पदार्थः ।।**

ननु सादृश्यस्य का गतिरिति चेत्, सद्गतिरेव । तत्तु 'इव' इत्यव्ययद्योत्यम् । अत एव नातिरिक्तपदार्थः । किं तर्हि ? 'सदृश'इति पदमेव ज्ञापयति बुद्धिविशेषविषयत्वरूपं तदिति । द्वे वस्तुनी यन्मूलतया

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।

रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-गुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदु:खेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा-श्चतुर्विंशतिर्गुणाः ।

आलोक-व्याख्या

तोलयति जनः, तदेव किल सादृश्यम् । एवञ्च तद्द्रष्टृपुरुषबुद्ध्यपेक्षाधीनम्, न हि सर्वः सर्वं सदृशतया पश्यति । **यां चन्द्रमुखीं पश्यति कश्चित्, तामेवान्यो वानरमुखीं पश्यतीति** प्रसिद्धं किल लोके । **अतस्सादृश्यम-पेक्षाबुद्धिविशेषविषयत्वरूपमेव ।** अतस्तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वमित्यादिव्यर्थचर्चाया नावकाशः । एतदधिकं तु न न्यायशास्त्रस्य विषय इत्युपरन्तव्यम् ।।

विशिष्य चायं प्रकरणग्रन्थः, न वादग्रन्थः । अथापि निदर्शनार्थमयं विचारः प्रदर्शितः प्रमेयस्वरूपपरिशीलनेन । न्यायवैशेषिके किल तर्कपदवाच्ये। वैशेषिकं पदार्थनिरूपणप्रधानम् । न्यायस्तु प्रमाणनिरूपणप्रधानमिति, न सांकर्यं तयोः शास्त्रयोः।।

प्रथमोद्दिष्टं द्रव्यं विभजते - **तत्रेत्यादिना** । पृथिव्यादिपञ्चभूतानि संप्रतिपन्नानि । एतानि शरीरेन्द्रियविषयभेदात् जीवोपकारकाणि । षष्ठ आत्मा । तेषामात्मोपकारकत्वं कालदेशाधीनमिति कार्यसामान्यकारणतया दिक्कालौ द्वौ । आत्मनां सुखदुःखादिव्यवस्थासिद्ध्यर्थं मन इति नवैव द्रव्याणि । सूर्येऽस्तंगते भूच्छायैव तम इत्यालोकाभाव एव तमः, नातिरिक्तं द्रव्यम् । अतो नवैव द्रव्याणि ।।

गुणान् विभजते - **रूपेत्यादि** । गुणः— गुणनम् , वर्धनम् अथवा पोषणम् । एकमेव द्रव्यं नील इति, महानिति, सुगन्धीति बहुधा व्यवह्रियते। अत एते गुणा इत्युच्यन्ते । अत एव सूत्रकारेण सप्तदशैवोक्ता अपि, औचित्यादितरे योजिता भाष्यकारेण । अस्तु सप्तदशैव, किं अधिकैरिति तु

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।
परमपरं चेति द्विविधं सामान्यम् ।

आलोक-व्याख्या

न मन्तव्यम् । प्रधानभूतः शब्दाख्यो गुणः सूत्रे न पठितः । अतस्सन्त्यन्येऽपि गुणा इत्येव सूत्रकाराशयः। परन्त्वत्र कति गुणा इति निष्कृष्य विचारो वा किमर्थमेतावन्त इत्याक्षेपो वा नाधिकोपयोगी । पदार्थविभागः परमत्यन्तं साधीयान् । एवं द्रव्यविभागोऽपि । इतरविभागस्त्वौचित्यात् । अत एवोत्तरत्र कर्मविभागे नैर्भर्याभावः प्रादर्शि ।।

कर्म विभजते - **उत्क्षेपेत्यादि** । कर्मणां पञ्चत्वे, आधिक्ये वा न नैर्भयम् । गमनवदेव आगमनादिक्रियाणां, हसिततादनतर्जनादिबहुविधानां क्रियाणां वक्तव्यत्वप्रसङ्गात्। यथाकथञ्चिन्निर्वहि--चलनात्मकं कर्मैकमेव । इतरत्सर्वं निदर्शनमात्रमित्यवगन्तव्यम् । एवमत्रासंकीर्णविभागे न तात्पर्यमित्येतत् सामान्यविभागे स्पष्टम् ।।

*सामान्यं विभजते - **परमित्यादि** । परत्वापरत्वे परस्परसापेक्षे, न नियते । पृथिवीत्वं हि घटत्वापेक्षया परम्, द्रव्यत्वापेक्षयाऽपरम् । अथाप्येवं विभागप्रदर्शनं — सामान्यं व्याप्यव्यापकभावापन्नमपि भवति, अनुगतप्रतीतेरपि व्याप्यव्यापकभावापन्नत्वात् । 'प्राणी' इत्यनुगता प्रतीतिः । गौः, अश्वः,

टिप्पणी

***जातिवाधकसंग्रहः**

पृथिव्यप्तेजोवायुषु पृथिवीत्वम्, अप्त्वम्, तेजस्त्वम्, वायुत्वं च तत्तदसाधारणगुणकारणतावच्छेदकतया सिद्ध्यति । गन्धसमवायिकारणं पृथिवी इति सिद्धान्तः। **एवञ्च पृथिवीनिष्ठा गन्धसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, या या कारणता, सा किञ्चिद्धर्मावच्छिन्ना, यथा दण्डनिष्ठा घटकारणता दण्डत्वावच्छिन्ना** इति सामान्यमुखव्याप्त्या पृथिवीत्वादितत्तद्धर्माणां

आलोक-व्याख्या

मनुष्य इत्यननुगता । प्राणित्वं त्रयानुगतम् । गोत्वाश्वत्वादिकं त्वननुगतम् । सामान्ये विद्यमानं व्याप्यव्यापकभावं प्रदर्शयितुमेवोक्तं मूले परमपरं चेति । एतदपि **'जातिसाङ्कर्यं न दोषः, प्राणित्वाश्वत्वयोरेकत्र मेलनात्'** इति वदतां वेदबाह्यानां बौद्धादीनामुत्तरदानाय । जातिसांकर्यं तु प्रकृतिर्नानुमनुत इति विज्ञानिनः । **अश्वगर्दभयोः साङ्कर्येण जाताश्वतरी न प्रसूत** इति स्थितिः । एवमाम्रवृक्षादिष्वपि जातिद्वयसाङ्कर्यं नानुमनुत प्रकृतिरिति स्पष्टम्।

टिप्पणी

सिद्धौ, **सिद्ध्यतो धर्मस्य नित्यत्वे एकत्वे च लाघवम्** इति लाघवतर्कवशात् पृथिवीत्वादीनां नित्यत्वम्, एकत्वं च सिद्ध्यति । ततश्च पृथिवीत्वादेः नित्यत्वे सति, एकत्वे सति, अनेकानुगतत्वरूपजातिलक्षणाक्रान्तत्वात् पृथिवीत्वादीनां जातित्वं सिद्ध्यति। एवमेव अप्त्व-तेजस्त्व-वायुत्वानामपि जातित्वसिद्धिर्ज्ञेया । परन्तु शब्दसमवायिकारणतावच्छेदकतया सिद्धस्य आकाशत्वस्य जातित्वं नाङ्गीक्रियते । कुतः? इति प्रश्ने, आकाशस्यैकत्वेन जातिलक्षणान्तर्गतानेकानुगतत्वरूपविशेषणाभावात् । अनेकानामनुगतव्यवहारार्थं खलु जातिरङ्गीकृता, आकाशस्य एकत्वेन तादृशव्यवहाराभावात्, तन्न जातिरिति भावः, किन्तु शब्दसमवायिकारणत्वम् । अथवा अखण्डोपाधिः। तथा च एकव्यक्तिवृत्तिधर्मो न जातिरित्युक्तं भवति । तेन एकव्यक्तिवृत्तित्वम् आकाशत्वादीनां जातित्वे बाधकमिति सिद्धम् । एवं जातित्वबाधकानि कानि? इति जिज्ञासायां न्यायाचार्यैरुदयनैः किरणावल्यां जातिबाधककारणानि संगृहीतानि ।

व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः।
रूपहानिरसंबन्धो जातिबाधकसंग्रहः॥ इति ॥

(१)व्यक्तेरभेदः (२)तुल्यत्वम् (३)संकरः (४) अनवस्थितिः (५)रूपहानिः (६)असम्बन्धः इत्येतानि जातिबाधकानि इति यथाश्रुतार्थः। जाति इति पदं जातित्व-जातिमत्त्वान्यतरपरं विषयानुरोधेन । आद्यत्रयं जातित्वबाधकम् , अनन्तरत्रयं जातिमत्त्वबाधकम् इति विवेकः।

आलोक-व्याख्या

अतश्च दोष एव सांकर्यं, व्याप्यव्यापकभावानापन्नयोर्जात्योः। व्याप्यव्यापकभावापन्नयोस्त्वेकत्र मेलनं न दोषाय, पृथिवीत्वघटत्वादिवदिति प्रदर्शनाय

टिप्पणी

तथा हि- (१) **व्यक्तेरभेदः**— स्वाश्रयव्यक्तेः अभेदः-एकत्वम्, स्वस्य जातित्वे बाधकम् । यथा—आकाशत्वम् । स्वम्—आकाशत्वम् , तस्य आश्रयः आकाशः। स चैक एव । अत आकाशत्वं न जातिः। एवमेव कालत्वम्, दिक्त्वं च न जातिः॥

(२) **तुल्यत्वम्** समानव्यक्तिवृत्तित्वम् , समनियतत्वम् इत्यर्थः। यथा घटत्वं यदा जातिः, तदा कुम्भत्वम् ,कलशत्वं वा जातिर्न वा इति प्रश्ने, यावत्सु घटत्वं वर्तते तावत्स्वपि कलशत्वं कुम्भत्वं च वर्तत एव । अतश्च समनियतानां भेदे प्रमाणाभावात् कलशत्वादिकं घटत्वापेक्षयातिरिक्ता जातिर्न भवति ॥

(३) **संकरः**— सांकर्यम् । परस्परासमानधिकरणयोरेकत्र समावेशः। यथा भूतत्वमूर्तत्वे। भूतत्वं हि पृथिव्यप्तेजोवायुषु वर्तते । मूर्तत्वञ्च पृथिव्यप्तेजोवायुमनस्सु वर्तते । मनसि भूतत्वं नास्ति, भूतत्वं हि बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । मनसि न कोऽपि विशेषगुणोऽस्ति । आकाशे मूर्तत्वं नास्ति, मूर्तत्वं हि परिच्छिन्नपरिणामवत्त्वम् । तच्चापरिच्छिन्ने विभावाकाशे कथं स्यात्? एवञ्च तावुभौ परस्परासमानाधिकरणधर्मौ । तौ च पृथिव्यादिचतुष्टये वर्तेते । अतस्तौ जाती न भवत इति प्राचीनाः॥ नवीनास्तु साङ्कर्यस्य जातित्वबाधकत्वे प्रमाणाभावात् उभावपि जाती भवत एवेति वदन्ति ॥

वस्तुतस्तु— वर्णाश्रमनाशनार्थमेव सदा यतमानानां नव्यबौद्धानामेवायं वादः। एकस्मिन्नेव वृक्षत्वशिंशपात्वयोः, तथा प्राणित्वगर्दभत्वादेश्च समावेशदर्शनात्, वर्णाश्रमसाङ्कर्यमपि न दोष इति मन्यन्ते ते। परन्तु वृक्षत्वशिंशपात्वादीनां व्याप्यव्यापकभावापन्नत्वेन, द्रव्यत्वपृथिवीत्वघटत्वादीनामिवैकत्र समावेशो न दुष्यति । व्याप्यव्यापकभावानापन्नानां तु एकत्र समावेशे साङ्कर्यं दोष एव । यथा अश्वत्वगर्दभत्वयोः समावेशे, अश्वगर्दभाभ्यां जाते प्राणिनि का जातिः स्यादिति वक्तव्यम् । तस्य तु अश्वतरः, अश्वतरीत्येव व्यवहारः। तयोस्तु संततिर्न भवतीति प्रसिद्धम् । **स्वगर्भोऽश्वतरीमिव** इति श्रीरामा-

आलोक-व्याख्या

'परमपरं चेति द्विविधं सामान्यमि'त्युक्तम्, न त्वसंकीर्णविभाग-परमिदमित्यवगन्तव्यम् ।।

टिप्पणी

यणम् । किं बहुना ! आम्रादिवृक्षसस्यादिजातयः साङ्कर्यं नानुमन्यन्त इति नवीनाः सस्यविज्ञानिनोऽपि वदन्ति । एवमेव गर्दभयोन्यामश्वाज्जाता अश्वतरी यदि गर्भिणी भवति, तदा सा म्रियत एव, न सूते । अतो जातिसांकर्यं महान् दोष एवेति नवीनविज्ञानसिद्धमित्यवधार्यम् ।। भगवद्गीतायां प्रथमाध्याये **सङ्करो नरकायैव** इत्यादिना साङ्कर्यस्य महादोषत्वं विस्तरेण वर्णितम् । अतो नवीनानामदोषत्ववर्णनं परमसाहस-मेवेत्यलम् ।

(४) **अनवस्थितिः**— अनवस्थेत्यर्थः। गवि गोत्ववत्, गोत्वे गोत्वत्वं जातिरङ्गीक्रियते यदि, तर्हि गोत्वत्वेऽपि गोत्वत्वत्वं जातिः स्यात् । अतोऽप्रामाणिकानन्ता-तिरिक्तकल्पनापरम्परारूपानवस्थाप्रसङ्गात्, गोत्वत्वं न जातिः, किन्तु गवेतरासमवेतत्वे सति निखिलगोसमवेतत्वमेव । अननुगततद्व्यक्तित्वादावतिव्याप्तिवारणाय निखिलगोसमवेतत्वम् इति । प्राणित्वादावतिव्याप्तिवारणाय गवेतरासमवेतत्वमिति ।।.

(५) **रूपहानिः** — स्वरूपहानिः, विशेषत्वस्य जातित्वे बाधिका । विशेषा हि स्वतो व्यावृत्ताः, अन्यथाऽनवस्थापत्तिः। एवञ्च तत्र व्यावर्तकधर्मान्तरापेक्षा नास्त्येवेति विशेषत्वं न जातिः। किन्तु विशेष एव तत् अथवा अखण्डोपाधिः । अत एव निर्विशेषो विशेषः इति गाथा प्रवृत्ता । न तावता निर्विशेषवस्तुसिद्धिः। प्रमेयत्वपदार्थत्वादिधर्माणामनिवारणात् ।।

(६) **असंबन्धः**— समवायाभावः। स च समवायत्वस्य जातित्वे बाधकः। समवायत्वस्य जातित्वे, तस्य समवायेन कः संबन्धः? न तावत् संयोगः, संयोगस्य गुणत्वेन द्रव्यभिन्ने असंभवात् । न चापि समवायः, तस्य स्वरूपत्वेनातिरिक्तत्वासंभवात् । न च स्वरूपमेव, तस्य समवायरूपाधिकरणानतिरेकात् । किं तर्हि ? समवाय एव सः,नातिरिक्तः। तर्हि समवायत्वं समवायश्चेति पर्यायौ भवेताम् । तर्हि किं रूपं तदिति

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।

आलोक-व्याख्या

विशेषं वर्णयति - **नित्येत्यादि** । नित्यद्रव्याणि पृथिव्यादिचतुष्टय-परमाणवः, आकाशकालदिगात्ममनांसि च । एतेषां परस्परं भेदो विशेषादेव सिद्ध्यतीति तन्निरूपणे वक्ष्यामः । परमाणूनां जीवात्मनां मनसां चानन्तत्वात् तद्वृत्तयो विशेषा अप्यनन्ता एव । यद्यपि पृथिवीव्यतिरिक्तजलादिपरमाणूनां रूपरसस्पर्शा नित्याः, एकत्वसंख्यापि नित्या, सामान्यमपि नित्यम्, अथापि विशेषस्तु नित्यद्रव्यमात्रवृत्तिः, न गुणादिवृत्तिरित्येतत् विशेषनिरूपणे प्रदर्शयिष्यते *।।

टिप्पणी

चेत्, नित्यसंबन्धत्वमेव तत् । अतश्च सखण्डोपाधिविशेषः,तत्पदप्रवृत्तिनिमित्ततया सिद्धस्सः । अतः समवायत्वं न जातिः ।।

एवम् अभावत्वमपि समवायाभावात् न जातिरिति वदन्ति । किन्तु अभावो न पदार्थः, अपि तु वाक्यार्थः। न हि प्रतियोगिनमन्तरा अभावो व्यवहर्तुं शक्यः। अभावपदे श्रुते हि कस्य ? इति प्रश्नोऽनिवार्यः। घटस्य इत्युक्ते घटाभावः खलु सः। अतश्च पदार्थद्वयरूपत्वात्, अर्थसमाजरूप एव सः, नीलघटादिवत् । अतोऽभावस्यैव तादृशत्वे अभावत्वमपि नाखण्डः पदार्थः कश्चित्, किन्तु अर्थसमाज एव ।।

*ननु 'नित्यद्रव्यवृत्तयः' इत्यत्र द्रव्यपदं किमर्थं ? परमाणुवदेव नित्यगुणा अपि निरवयवाः किल! तर्हि नित्यानां परमाणुगतगुणानां कथं भेदसिद्धिरिति चेत्; विशेषवशात् परमाणूनां परस्परभेदसिद्धौ तत्तद्गतगुणानामाश्रयभेदादेव सिद्ध्यति । शुक्लनीलादिगुणा हि भिन्ना तथैव प्रत्यक्षसिद्धाः । भिन्नयोः शुक्लपटयोर्वर्तमानयोः शुक्लरूपयोः तदाश्रयपटभेदादेव भेदः । निरवयवे द्रव्ये कारणाभावात् भेदः कथं सिद्धः? इति प्रश्न इत्यतः विशेषाः नित्यद्रव्यवृत्तयः, न तु नित्यगुणादिवृत्तय इति ज्ञेयम् ।

समवायस्त्वेक एव ।

अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

आलोक-व्याख्या

समवायस्वरूपं वक्ति - **समवाय इति** । अयुतसिद्धानां संबन्धस्समवायः। अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चायुतसिद्धाः, परस्परं पृथक्कर्तुं न शक्यन्ते । अवयविनः पटात् यदि तन्तवः पृथक् क्रियेरन्, तर्हि पटो न शिष्येत । अतस्तन्तुपटौ अयुतसिद्धौ । एवमेव गुणिनो द्रव्यात् गुणा रूपादयो न पृथक्कर्तुं शक्याः। तावता न तयोरभेदः, 'गुणः,गुणी' इत्यादिभिन्नपदव्यवहारात् । उभयोरभेदे हि 'गुणी' इति मतुबर्थकप्रत्ययो न स्यात् । नह्यविद्यमानस्यार्थस्य कृते भगवान् पाणिनिः प्रत्ययं विदध्यात् । अतस्तयोर्भेद आवश्यकः । भेदे सति संबन्ध आवश्यकः, मतुप्रत्ययस्य संबन्धार्थकत्वात् । भिन्नयोर्हि संबन्धमन्तरा विशिष्टप्रतीतिर्न स्यात् । अतः पृथक् कर्तुमशक्यत्वेऽपि तयोस्संबन्ध आवश्यकः । स एव समवाय इत्युच्यते । स तु नित्यः, एकश्च। कुत एतदिति समवायनिरूपणे वक्ष्यते ।।

*अभावं विभजते - **अभाव इति** । न भावः= अभाव इति विग्रहः। अभावः 'नञ्'पदजन्यप्रतीतिविषयः । 'अस्ति' इति प्रतीतेः यथा कश्चन विषय आवश्यकः, तथा 'नास्ति' इति प्रतीतेरपि कश्चन विषय

टिप्पणी

*ननु पदानि चतुर्विधानि, अतः पदार्थोऽपि चतुर्विध एवेत्युक्तमुपक्रमे । नञा अभावो बोध्यते लोके । नञ् च न पदम्, किन्त्वव्ययम्। अव्ययानां सूचकत्वमेव, न वाचकत्वमित्यभिज्ञाः । 'भूतले घटोऽस्ति किम्?' इति प्रश्ने, 'न' इत्येव प्रत्युत्तरदानेऽपि, तस्य 'भूतले घटो नास्ति' इत्येवार्थः । अतः नञः केवलस्य अर्थधीजनकत्वं

आलोक-व्याख्या

आवश्यकः । स एवाभाव इत्युच्यते । अभावव्यवहारस्य चतुर्धा दर्शनात् तदर्थभूतोऽभावोऽपि चतुर्विधः । 'भूतले घटो न' इत्येका प्रतीतिः, 'घटः पटो न' इत्यपरा । आद्यप्रतीत्या सिद्धोऽभावोऽत्यन्ताभाव इत्युच्यते । द्वितीयप्रतीत्या सिद्धस्तु अन्योन्याभाव इत्युच्यते । एवमेव घटोत्पत्तेः प्राक्

टिप्पणी

नास्तीत्येवाभिज्ञाः । अभावः न पदार्थः, किन्तु वाक्यार्थः, अर्थसमाजरूप एव । अत एव **'द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां'** (वै.सू.१-१-४) इत्येव निर्देशः कृतः । एषु च द्रव्यगुणकर्मसामान्यानि सर्वव्यवहारविषयाः, समवायविशेषौ तु शास्त्रीयव्यवहारविषयौ । ननु उपरि अभावनिरूपणदर्शनात् सोऽपि संमत इति कुतो न स्यादिति चेत्; वाक्यार्थत्वेनैव तस्य निरूपणात्। अभाव एव नास्तीति न ह्युच्यते, किन्तु स न पदार्थः, किन्तु वाक्यार्थ इत्येवोच्यते । अत एव समवायानन्तरं स न निरूपितः, मध्ये प्रसङ्गादेव ॥

अभावस्य चतुर्विधत्वेऽपि, नञः नियतः प्रयोगः अत्यन्ताभावे, अन्योन्याभाव एव । प्रागभावस्तु भविष्यतीति प्रतीतिसिद्धः, प्रध्वंसाभावस्तु नष्ट इति प्रतीतिसिद्धः। 'पश्चाच्छब्दो नास्तिपर्यायः' इति न्यायेन तयोः नास्तीति व्यवहारः अनन्तरकालिकः, आर्थिकः । अत एव प्रागभावप्रध्वंसाभावौ तत्तत्समवायकारणवर्तिनौ इत्यभिप्रयन्ति । केवलभूतलादौ 'भविष्यति' 'नष्टः' इति व्यवहारौ न भवतः । उपादानभूततन्तुकपालादेर्दर्शन एव तथा प्रतीतेरवकाशः । 'चैत्रोऽत्रेदानीं भविष्यति' इत्यादिव्यवहारस्तु तदागमनविषयकः न चैत्रविषयकः । अत एव प्रागभावानङ्गीकारे; पटादेरुत्पत्त्यनन्तरं सामग्र्याः तत्र सत्त्वात् उत्पन्नस्य पुनरुत्पत्तिप्रसङ्गः इति भिया प्रागभावसिद्धिरित्यपि न क्षोदक्षमम्, तत्र तत्पटप्रागभावनाशादिति यथोच्यते, तदपेक्षया, तत्र तदुपादानकारणस्याभावादित्येव समीचीनमुत्तरम् । सन्त्येव खलु तत्र तन्तव इति चेत्, तन्तवः पटाधिकरणत्वेन सन्ति,

आलोक-व्याख्या

'घटो नास्ति' इति प्रतीत्या घटोत्पत्तेः पूर्वं प्रागभावसिद्धिः । एवं घटस्य नाशानन्तरमपि 'घटो नास्ति' इति प्रतीतेस्सत्त्वात् प्रध्वंसाभावः सिद्ध्यति । अतोऽभावश्चतुर्विधः ।।

टिप्पणी

न तु पृथक्। अतश्च तत्रस्थः पट एव पुनः स्वोत्पत्तौ प्रतिबन्धक इत्यपि सुवचम् । एवञ्च प्रागभावः पूर्वावस्थारूपः । प्रध्वंसाभावश्चोत्तरावस्थारूपः इति प्राचीनाः । अन्योन्याभावस्तु परस्परव्यावृत्तिरूपः । अत्यन्ताभाव एव लोके सर्वत्रेदानीमभावव्यवहारे वर्तते । अधिकं तु शास्त्रान्तरकथेत्यलं विस्तरेण ।

अभावाभावस्तु प्रथमाभावप्रतियोगिस्वरूपः । अतो घटाभावाभावः घट एव। एवं भेदाभावः भेदप्रतियोगितावच्छेदकरूपः । यथा गोभेदः गोभिन्ने महिषादौ वर्तते। गोभेदाभावश्च गोमात्रे वर्तते । अत एव सः गोत्वरूपः, गोत्वं हि गव्येव वर्तते। अतो गोभेदाभावः न गोत्वातिरिक्तः इत्याद्यपि ज्ञेयम् ।

अत एव ध्वंसप्रागभावाधिकरणे नात्यन्ताभाव इति प्राचां मतम् । तन्न - तथा सति पञ्चरक्तस्थले (रक्तम्, श्यामम्, रक्तम्, श्यामम्, रक्तम् इत्येवं क्रमेण क्वचिद्घटे रूपपरावृत्तिः, तत्र) मध्ये रक्ततादशायां भाविरक्तप्रागभावस्य, प्रथमरक्तध्वंसस्यापि सत्त्वात् रक्तं नास्तीति प्रतीत्यापत्तिः ध्वंसप्रागभावाधिकरणेऽत्यन्ताभावाङ्गीकारे तु, अत्यन्ताभावस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेन, मध्ये रक्ततादशायां प्रतियोगिनःसत्त्वेन, एकघटसत्त्वेऽपि घटात्यन्ताभावप्रतीत्यसंभववदुपपद्यते इत्यादिनवीनमतं न साधीयः । प्रागभावस्य 'भविष्यति' इति प्रतीतिमात्रविषयत्वात्, नास्तीति प्रतीत्यविषयत्वात् । कथञ्चिदङ्गीकारेऽपि तस्य भाविरक्तमात्रविषयत्वेन निर्वाहसंभवात् । प्रागभावस्यानादित्वप्रवादोऽपि उपादानपरंपराया आपरमाण्वनुवर्तमानतया संगच्छते । एवं प्रध्वंसाभावेऽपि उक्तं सर्वं समानम् ।।

टिप्पणी

साधर्म्यवैधर्म्ये

''धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्'' इति महर्षिः कणादः। साधर्म्यज्ञानं भ्रमहेतुः। वैधर्म्यज्ञानं तन्निवृत्तिहेतुः। सर्वमिदं अन्ते आत्मस्वरूपस्य विविक्तस्य परिचये पर्यवस्यति। एतदभ्यासरूपमिदं साधर्म्यवैधर्म्यज्ञानमिति भावः। समानो धर्मः येषाम्, ते सधर्माणः। तेषां भावः साधर्म्यम्। साधारणो धर्म इत्यर्थः। एवं विरुद्धो धर्मो येषाम्, ते विधर्माणः। तेषां भावः वैधर्म्यम्, तत्रावर्तमानो धर्म इत्यर्थः। सप्तानामपि पदार्थानां ज्ञेयत्वम्, वाच्यत्वम्, पदार्थत्वमित्यादिकं साधर्म्यम्। ज्ञेयत्वं ज्ञानविषयत्वम्। एतच्च सर्वपदार्थसाधारणो धर्मः। येन केन प्रकारेण, यस्य कस्यचित् यदा कदाचित् ज्ञेयाःस्युरेव सर्वे पदार्थाः। अत एव ज्ञेयत्वं केवलान्वयि। एकदैव एकपुरुषीयज्ञानविषयत्वे सत्येव ज्ञानविषयत्वं स्यादिति न भ्रमितव्यम्। यदा कदाचित् यस्य कस्यचित् ज्ञानविषयताया अपि तथात्वात्। अथवा ईश्वरीयज्ञानविषयतामादायापि समन्वयात्। ईश्वरो हि सदा सर्वज्ञो वैदिकानाम्। तावता अस्मदीयज्ञानविषयताऽपि न वार्यते। ज्ञानपदं चात्र प्रमापरम्, गुणादिपदानां सद्गुणपरत्ववदौत्सर्गिकमिदम्। एवं वाच्यत्वमपि केवलान्वयि। एवं पदार्थत्वादिकमपि। वाच्यत्वम् अभिधेयत्वं च समानम्॥

द्रव्यादीनां **षण्णां** भावत्वं साधर्म्यम्। तच्च अभावविलक्षणत्वम् - अस्तीति प्रतीति विषयत्वम्। अभावो हि नास्तीतिप्रतीतिविषयः। समवाय-एकार्थसमवायान्यतरसंबन्धेन सत्तावत्त्वमिति केचित्। एकस्मिन् वस्तुनि उभयोरपि समवायेन सत्त्वमेव एकार्थसमवायः। द्रव्यगुणकर्मसु हि समवायसंबन्धेन सत्ताजातिः वर्तते, तत्रैव च समवायसंबन्धेन सामान्यं, विशेषः, समवायोऽपि वर्तते। यद्यपि समवायस्य स्वरूपं सम्बन्धः, अथापि समवायस्य स्वरूपं समवाय एव। अतो नानुपपत्तिः॥

द्रव्यादीनां **पञ्चानाम्** अनेकत्वं समवायित्वं च साधर्म्यम्। षष्ठः

टिप्पणी

पदार्थस्समवायस्त्वेक एव । अतः पञ्चसु समन्वयः। यद्यपि अनेकत्वम् अभावेऽप्यस्ति, तथापि भावत्वे सतीति विशेषणान्न दोषः॥

द्रव्यादीनां **चतुर्णां** समवेतसमवेतवृत्तिधर्मत्वम् । विशेषा हि नित्यद्रव्यमात्रवृत्तयः। गुणादयस्त्रयोऽनित्यद्रव्येष्वपि वर्तन्ते । द्रव्यत्वं स्वावयवकपालसमवेते घटादौ वर्तते । घटादौ द्रव्यत्वं वर्तते । अतो द्रव्यं समवेतसमवेतवृत्ति भवति । गुणत्वादिकं तु तादृशद्रव्यसमवेते गुणादौ वर्तन्त इति समन्वयः॥

द्रव्यादीनां **त्रयाणां** सत्ताजातिमत्त्वं साधर्म्यं प्रसिद्धमेव । कार्यसामान्यं प्रति द्रव्यं समवायिकारणम् । गुणकर्मणी त्वसमवायिकारणे । तथा च कार्यसामान्यं प्रति द्रव्यादित्रितयमेव कारणं भवति । तादृशकारणत्वस्य त्रिष्वेव वर्तमानत्वात्, तदवच्छेदकतयानुगतायाः सत्ताजातेः सिद्धिः॥

द्रव्यगुणयोः **द्वयोः** नित्यानित्यवृत्तिपदार्थविभाजकधर्मवत्त्वं साधर्म्यम् । कर्मत्वं त्वनित्यमात्रवृत्ति । सामान्यत्वादिकं तु नित्यमात्रवृत्ति । द्रव्यत्वगुणत्वे तु नित्येषु परमाण्वादिषु, तद्गतगुणेष्वपि यथासंख्यं वर्तेते । तथैव अनित्येषु घटपटादिषु, तद्गतगुणेष्वपि वर्तेत एव । अभावत्वस्यापि अनित्यप्रागभावे,नित्येऽत्यन्ताभावे च सत्त्वादव्याप्तिवारणाय भावत्वे सतीत्यपि विशेष्यताम् ।।

एवम्, गुणादीनां निर्गुणत्वं निष्क्रियत्वं च साधर्म्यम् । गुणवत्त्वं क्रियावत्त्वं वा नवद्रव्याणां साधर्म्यं चेत् , तदेव इतरेषां वैधर्म्यं भवति । **यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्** इति हि नियमः॥

सामान्यादीनां जातिशून्यत्वं साधर्म्यम् ,सत्ताजातेः, द्रव्यत्वगुणत्वकर्मत्वानां च यथासंख्यं त्रिष्वेव वर्तमानत्वात्, ।।

पारिमाण्डल्यभिन्नानां कारणत्वं साधर्म्यम् । पारिमाण्डल्यं परमाणु-परिमाणम्। तद्भिन्नानां सर्वेषां यत्र कुत्रचित् कारणत्वं वर्तत इति तत् तेषां साधर्म्यमित्यर्थः। परमाणुपरिमाणं हि न कुत्रापि कार्ये कारणमित्यर्थः । न चावयविपरिमाणं प्रत्यवयव-

टिप्पणी

परिमाणस्य कारणत्वनियमात् द्व्यणुकपरिमाणं प्रति परमाणुपरिमाणस्य कारणत्वेन, कथं कुत्रापि तत् न कारणमिति शङ्क्यम् , एवं सति परमाणुजन्यं द्व्यणुकम् अणुतरं भवेत् । यथा महत्कपालद्वयजन्यो घटो महत्तरो भवति, तथैव अणुजन्यः अणुतर एव भवेत् ।

लोके हि धनवान् कश्चित् दशसहस्ररूप्यकाधिपतिश्चेत्, धनवत्तरस्ततोऽप्यधिकविंशतिसहस्राधिपतिर्भवेत् । धनवत्तमस्तु त्रिंशत्सहस्राधिपतिर्भवेत् । एवं दरिद्रः कश्चित् दशरूप्यकवान् यदि भवति, तदा दरिद्रतरः पञ्चरूप्यकवान् भवेत् , न तु विंशतिरूप्यकवान् । दरिद्रतमस्तु रूप्यकत्रयवान् एव भवेत् । अतः तरप्-तमप्रत्ययार्थः तत्तत्कक्ष्यानुरोधेनैव लोके व्यवह्रियते । एवमेव प्रकृते महत्परिमाणवान् कश्चित् घटश्चेत् ततोऽपि महत्तर-महत्तमपरिमाणवन्तोऽन्ये घटादयोऽधिकपरिमाणवन्त एव भवेयुः। अतश्च अण्वपेक्षया अणुतरस्तु न्यूनपरिमाणवानेव भवेत् । अणुतमस्तु ततोऽपि न्यूनपरिमाणवानेव । एतेन परमाणुगतमणुपरिमाणम् द्व्यणुकपरिमाणं प्रति न कारणम्, किन्तु तद्गतसंख्यैव । एवं त्र्यणुकपरिमाणं प्रति द्व्यणुकत्रयगता संख्यैव कारणम् ,अत एव द्व्यणुकत्रयजन्यस्त्र्यणुको महान् भवति, त्र्यणुकस्य महत्परिमाणवत्त्वात् प्रत्यक्षं प्रति महत्त्वस्य कारणत्त्वात् । अन्यथा द्व्यणुकमणुतरं त्र्यणुकं चाणुतमम् इत्येव वक्तव्यं भवेत् ।

न चाणुतर-अणुतमादिशब्दानां तथात्वेऽपि प्रत्यक्षदृष्ट्या अवयवगतपरिमाणमेव किल अवयविपरिमाणं प्रति कारणं दृश्यते इति शङ्क्यम् , वस्तुतत्त्वनिर्णयःखलु व्यवहाराधीनः। व्यवहारश्च शब्दाधीनः। शब्दानां शक्तिग्रहणं हि व्यवहारादेवेति **शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च** इत्यादौ निरूपितम्। पदार्थो नाम पदस्यार्थः, इदञ्च लोकव्यवहारसिद्धम्। लोकव्यवहारदृष्ट्या अणोरणुतरः पूर्वोक्तरीत्यैव वक्तव्यः । न्यायशास्त्रं हि लोकव्यवहारसिद्धपदार्थनिरूपणपरम् । अत एवेदमेव दर्शनं लोकायतपदवाच्यमासीत् पूर्वम् । चार्वाकमतं तु केवलनवीनपण्डित-

टिप्पणी

परिकल्पितम् । यतः— अतिप्राचीने प्रसिद्धे चाणक्यविरचिते अर्थशास्त्रे सनत्कुमार-संहितायां च सांख्यम् , योगः,लोकायतञ्च इत्यान्वीक्षिकी त्रिविधा इति दृश्यते । आन्वीक्षिकीति न्यायशास्त्रमिति न्यायभाष्ये अभिहितम् । प्रतीतिशरणाः नैयायिकाः, प्रयोगशरणाः वैयाकरणाः इति हि प्रसिद्धम् । ईश्वरानुमानादिकं तु वेदान्तिसुहृदां नैयायिकानामेव, न तु न्यायशास्त्रान्तर्गतम् । अत एव न्यायसूत्रभाष्ययोर्न कुत्रापि ईश्वरविषयको विचारो दृश्यते । ईश्वरविचारो वेदान्तशास्त्र एवेति तयोराशयः। अत एव च **इन्द्रियार्थसन्निकर्षोत्पन्नम्** इति प्रत्यक्षलक्षणविशेषणम् । न हि ईश्वरप्रत्यक्षम् इन्द्रियार्थसन्निकर्षजन्यम्, तस्य नित्यत्वात् । अतो लोकायतपदं न्यायशास्त्रपरमेव ।

न तावन्मात्रम् , चार्वाकदर्शनं हि प्रत्यक्षैकप्रमाणवादीत्युच्यते । एवं सति किण्वादिभ्यो मदशक्तिवत् भूतानामेव चैतन्यं केन प्रमाणेन गृह्येत ? न हि चैतन्यमैन्द्रियकम्। नापि मानसम् ,इन्द्रियाणां सर्वेषामपि अतीन्द्रियत्वेन तैः तेषामङ्गीकारासंभवात् । अतश्चार्वाकदर्शनमिति संपूर्णमेकं दर्शनमेव वस्तुतो नास्त्येवेत्यादिकं तत्त्वमुक्ताकलापस्य सर्वाङ्कषाव्याख्यायां विस्तरेण निरूपितम् ॥

अतश्च अणुपरिमाणं न कुत्रापि कारणम् । एवञ्च पारिमाण्डल्यपदं द्व्यणुक-परिमाणस्याप्युपलक्षकम् । परमाणुपरिमाणं द्व्यणुकपरिमाणं च न कुत्रापि कारणमिति भावः। एवं पारिमाण्डल्यपदं परममहत्परिमाणस्य, अतीन्द्रियपदार्थवृत्तिसामान्यस्य, विशेषाख्यपदार्थस्य चोपलक्षकमिति विश्वनाथो न्यायपञ्चाननः। तेषामपि कुत्रापि कारणत्वाभावादित्यर्थः। आकाशादिगतं विभुपरिमाणं हि नान्यस्य परिमाणस्य जनकम्, विभुत्वापेक्षयाधिकपरिमाणस्याभावात्। एवम् ऐन्द्रियकस्थूलवस्तुगतं घटत्वादिरूपं सामान्यं तु तत्तत्प्रत्यक्षे निमित्तकारणं भवति, प्रत्यक्षं प्रति विषयस्य निमित्तकारणत्वात्। अतीन्द्रियपदार्थवृत्तिसामान्यस्य तु इन्द्रियजन्यज्ञानं प्रति न कारणत्वम् , तदविषयत्वात्। एवं नित्यद्रव्यवृत्तयो विशेषाख्याः पदार्था अपि न कुत्रापि कारणानि भवन्तीत्याशयः। तथा च परमाणुपरिमाण-द्व्यणुकपरिमाण-विभुपरिमाण-अतीन्द्रियसामान्य-विशेषभिन्नानां सर्वेषां कारणत्वं साधर्म्यमित्यर्थः।।

टिप्पणी

ननु योगिनो हि तपःप्रभावविशेषादतीन्द्रियाण्यपि वस्तूनि साक्षात्कुर्वन्तीति प्रसिद्धम् । प्रत्यक्षे च विषयस्य कारणत्वं लोकसिद्धम् । एवञ्चातीन्द्रियं परमाणुपरिमाणम्, द्व्यणुकपरिमाणञ्च तद्विषयकयोगिप्रत्यक्षे कारणं भवत्येव । एंवमतीन्द्रिय-सामान्यविषयकयोगिप्रत्यक्षे अतीन्द्रियसामान्यमपि कारणं भवेदेव । एवमेव विशेषविषयकयोगिप्रत्यक्षे विशेषाः कारणम् । तथा च सर्वेषामपि कुत्रचित् कारणत्वात्, प्रमेयत्वादिवत् कारणत्वमपि केवलान्वयिधर्मः। एवम् अणुत्वेन निखिलाणूनामुपस्थितौ अणुत्वाद्यतीन्द्रियसामान्यस्यापि कारणत्वमागतम् । एवम्, एषः परमाणुः तत्परमाणुभिन्नः, एतद्विशेषात् इति परमाणूनां परस्परभेदसाधकानुमाने विशेषस्य लिङ्गविधया कारणत्वात्, विशेषाणामपि कारणत्वमनिवार्यम्। तथा च तद्भिन्नानां कारणत्वं साधर्म्यमित्ययुक्तम् कारणत्वस्य पूर्वोक्तरीत्या केवलान्वयिधर्मत्वात् इति चेत्, न, उक्तसर्वस्यापि प्राचीनमते एव स्वीकारात् । नवीनानां मते तु, लिङ्गज्ञानमेवानुमितिकरणम्, न तु लिङ्गम् । सामान्यज्ञानमेव प्रत्यासत्तिः, न तु सामान्यम् इत्यङ्गीकारात् नानुपपत्तिः। एवम् अस्मदादि-प्रत्यक्ष एव विषयः कारणं, न तु योगिप्रत्यक्षे । अतीतानागतवस्तून्यपि योगिनः पश्यन्तीति कथनात्, अतीतानागतानां वस्तूनामिदानीमभावात् , कथमेषां कारणत्वम् । ननु विषयाभावेऽपि कथं ते पश्यन्तीति चेत् , योगजन्यादृष्टविशेषवशादेवेति योगशास्त्रादवगम्यते । अतो नास्ति तेषां कारणत्वमिति, कारणत्वं न केवलान्वयिधर्म इति न कश्चन दोषः ।।

ननु एवमपि महत्त्वं हि त्र्यणुकादारभ्य द्रव्यप्रत्यक्षे कारणं सम्मतम् । अतः आत्मविषयकमानसप्रत्यक्षे आत्मगतं परममहत्परिमाणं कारणं वाच्यम् । एवञ्च विभुपरिमाणस्य कुत्रापि न कारणत्वमिति कथमुच्यत इति चेत् ; आत्मप्रत्यक्षस्य योगजधर्मप्रभावाधीनत्वेन अत्यन्तमलौकिकत्वात् , तत्र घटादिदृष्टान्तेन आत्मगतमहत्त्वस्य कारणत्वे , तेनैव न्यायेन आत्मप्रत्यक्षे आलोकोऽपि कारणं वक्तव्यं भवेत् इत्यलं शास्त्रान्तरविचारेण ।। **आकाशशरीरिणामव्याप्यवृत्तिक्षणिको विशेषगुण इष्यते** इति कारिकावली । अव्याप्यवृत्तिविशेषगुणवत्त्वम् , क्षणिकविशेषगुणवत्त्वं च आकाशात्मनोः साधर्म्यम्

टिप्पणी

इत्यर्थः। आकाशे विशेषगुणः शब्द एक एव । आत्मनां विशेषगुणाश्च बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नादृष्टभावनाख्यसंस्काराः। शब्दश्च आकाशे अव्याप्यवृत्तिः। अव्याप्यवृत्तित्वं नाम स्वात्यन्ताभावसमानाधिकरणत्वम् । स्वं शब्दः। तदत्यन्ताभावः शब्दात्यन्ताभावः । विभावाकाशे शब्दः एकदेशावच्छेदेनैव जायते, न तु सर्वत्र । तथैवानुभवात् । अतश्च शब्दःस्वात्यन्ताभावाधिकरण एव वर्तते । अतः शब्दः स्वात्यन्ताभावसमानाधिकरणः। एवमात्मनि विभौ विशेषगुणा बुद्ध्यादयःशरीरावच्छेदेनैव जायन्ते, तथैवानुभवात् । अतोऽव्याप्यवृत्तिविशेषगुणवत्त्वमुभयोस्समानम् ॥

एवं क्षणिकविशेषगुणवत्त्वं च तयोस्समानम्। क्षणिकत्वं च न बौद्धादिवत् एकक्षणमात्रवृत्तित्वम्, क्षणिकवादस्य निराकृतत्वात् । किन्तु द्विक्षणवृत्तित्वम् । शब्दो हि आकाशे जातो विशेषगुणो वीचीतरङ्गन्यायेन (तरङ्गात्तरङ्गोत्पत्तिवत्) श्रोत्रदेशं प्राप्तः श्रोत्रेन्द्रियेण गृह्यते । अतः उत्पन्नःशब्दः शब्दान्तरमुत्पाद्य स्वयं नश्यति, शब्द द्वयाश्रवणात् ॥ अतश्शब्दस्य द्विक्षणवृत्तित्वमावश्यकम् । प्रथमक्षणे उत्पन्नः, द्वितीयक्षणे शब्दान्तरमुत्पाद्य नश्यति । अतः सिद्धान्ते क्षणिकत्वं द्विक्षणवृत्तित्वमेव, नैकक्षणवृत्तित्वम् । एवञ्च क्षणिकविशेषगुणवत्त्वम् आकाशस्य सिद्धम् । एवमात्मनि जाता बुद्ध्यादयोऽपेक्षाबुद्धिव्यतिरिक्ता विशेषगुणा द्विक्षणमात्रावस्थायिन एव । प्रतिक्षणमिन्द्रियविषयसंयोगस्य नानाविधेषु जायमानत्वात्, ज्ञानान्यपि अनेकविषयाणि जायन्ते । तानि सर्वाण्यपि न स्थिराणि, अननुभवात् । युगपज्ज्ञानद्वयोत्पत्तेरसंभवात् । अतो ज्ञानान्यपि द्विक्षणमात्रावस्थायीनि । धारावाहिकज्ञानानां किञ्चित् कालानुवृत्तिश्च, ज्ञानात् ज्ञानान्तरोत्पत्यैव समर्थनीया । अतश्च क्षणिकविशेषगुणवत्त्वमात्मनां सिद्धम् । संख्यादिसामान्यगुणानाम् आत्मसु आकाशे च नित्यत्वात् , विशेषगुणेत्यभिहितम् । आत्मगुणबुद्धिप्रभेदरूपाया अपेक्षाबुद्धेस्तु त्रिक्षणवृत्तित्वमावश्यकम्। द्वित्वादयःकिल संख्या अपेक्षाबुद्धिजाः। अयमेकः,अयमेकः इति गणनरूपा बुद्धिरेव, तत्तत्पुरुषापेक्षया तत्तद्वस्त्वपेक्षयैव च जायमानत्वात्, अपेक्षाबुद्धिरित्युच्यते । तया तत्तद्वस्तुद्वये द्वित्वोत्पत्तिः। ततो द्वित्वत्वनिर्विकल्पकम्। ततो द्वित्वसविकल्पकम् इति तृतीयक्षण एव

टिप्पणी

द्वित्वानुभवात्, तावत्पर्यन्तमपेक्षाबुद्धिः वर्तत एव । अपेक्षाबुद्धिनाशे च द्वित्वादिकमपि नश्यति । अतस्तद्भिन्ना बुद्धय एव द्विक्षणावस्थायिन्यः, अपेक्षाबुद्धेः त्रिक्षणावस्थायित्वेऽपि इतरबुद्धेः द्विक्षणमात्रस्थायित्वात् । एवं सुखादीनामात्मविशेषगुणानाम्, आकाशविशेषगुणस्य शब्दस्य च द्विक्षणवृत्तित्वरूपं क्षणिकत्वं साधारणम् । अतश्च क्षणिकविशेषगुणवत्त्वम्, अव्याप्यवृत्तिविशेषगुणवत्त्वं च आकाशात्मनोः साधर्म्यम् । संख्यापरिमाणादिसामान्य-गुणानां नित्यद्रव्यवृत्तीनां नित्यत्वात्, विशेषपदं गुणविशेषणम् ।।

समवायिकारणत्वं **नवानां द्रव्याणां** साधर्म्यम् । कालदिशोः विद्यमानसंख्या-दिगुणानां नित्यत्वेन तन्निरूपितसमवायिकारणत्वस्य कालादिष्वसंभवेऽपि, विभुद्वयसंयोगाभावेऽपि घटादिमूर्तद्रव्याणां तैः साकं संयोगस्योभयवृत्तित्वेन घटादिनाशे तादृशसंयोगस्यापि नाशात् तस्यानित्यत्वेन तन्निरूपितं समवायिकारणत्वम् अक्षतमेव ।।

विभुद्वयसंयोगाभावे मानाभावात् , विभुद्वयसंयोगे विरोधो नास्तीति **नव्याः**। **अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः** इति संयोगस्य विभागपूर्वकत्वनियमात्, विभुद्वयस्य विभागासंभवात् , तयोः संयोगोऽपि न संभवत्येव । **संयोगस्य नित्यत्वे समवायोऽन्यथासिद्धो भवेत्** । न च द्रव्ययोरेव संयोगात्, गुणगुणिनोरतथात्वेन न संयोगस्तयोःसंबन्धो भवितुमर्हतीति वाच्यम् , संयोगस्य नित्यत्वेनैव सिद्धौ समवायस्यातिरिक्तकल्पने गौरवात्, **द्रव्ययोरेव संयोगः** इति नियमस्याप्यनावश्यकत्वात्। एवं **धर्मिकल्पनातो वरं धर्मकल्पना** इति न्यायेन समवायासिद्धौ, क्रमेण भिक्षुपादप्रसरणन्यायेनेदं शास्त्रमेव न शिष्येत । तत्तत्पण्डितैः स्वेच्छया तत्तत्पदार्थकल्पने, अन्ते बौद्धन्यायस्यापि प्रामाण्यापत्त्या, व्यासयाज्ञवल्क्यादिसंमतं न्यायविस्तरशास्त्रं लुप्येत। इष्टापत्तौ, वैदिकत्वमेव न स्यात् । तत्रापि इष्टापत्तौ नास्तिक्यमपि दुर्निवारं स्यात् । तथा च उच्छृङ्खलानां नवीनानां वचनानि नोपादेयान्येव ।।

वस्तुतस्तु सुसूक्ष्मपरिशीलने प्राचीनानां प्रक्रियैव साधीयसी, क्षेमकरी च

टिप्पणी

जीवानामित्यादिकमन्यत्र विस्तरेण द्रष्टव्यम् । अत एव न्यायवैशेषिकयोः समानतन्त्रत्वेऽपि नैकशास्त्र्यं प्रामाणिकम् । अत एव **षोडशपदार्थानां सप्तस्वेव अन्तर्भाव** इत्यादिकमपि अप्रामाणिकमेव । सप्तानां पदार्थत्वेऽपि षोडशानां पदार्थत्वाभावात्, न्यायसूत्रे तेषां तत्त्वपदेनैव निर्देशात् ।।

एवञ्च समवायिकारणत्वं नवद्रव्याणां समानम् । एवमेव गुणकर्मणोः असमवायिकारणत्वमेव साधर्म्यम् । न च केषाञ्चित् गुणानां कुत्रचित् असमवायिकारणत्वेऽपि आत्मविशेषगुणादीनां कुत्रापि असमवायिकारणत्वाभावात् कथं गुणकर्मणोः असमवायि कारणत्वं संभवतीति वाच्यम् , असमवायिकारणं चेत् गुणविशेषरूपमेव भवेत् इत्येव व्याप्तेरभिमतत्वेन, गुणकर्मभिन्नानाम् असमवायिकारणत्वं वैधर्म्यमित्यत्रैव तात्पर्यात् अथवा जातिघटिततया लक्षणकरणेन न दोषः ।।

नित्यद्रव्यातिरिक्तानाम् **आश्रितत्वं** साधर्म्यम् । ननु किं नाम आश्रितत्वम् ? न तावत् साधारत्वम्, नित्यानामपि कालदिगाधारवत्त्वेन तथात्वात् । तथाहि- **सर्वाधारःकालः** इति हि प्रसिद्धं किल । अत्र काल इति दिशोऽप्युपलक्षकम् । एवमेव कालेश्वरादृष्टादीनां साधारणकारणत्वम् इत्यत्र हि आदिपदेन दिशो ग्रहणमिति मर्मज्ञा एव जानन्ति । नित्यानां कालानधीनत्वेऽपि कालसंबन्धित्वरूपं सत्त्वं तु वर्तत एव । सदातनत्वं हि नित्यत्वम्। सदा इति काल एव ह्युच्यते । यथा अनित्याः पदार्थाः तत्तद्देशकालसंबन्धिनः, तथैव नित्या अपि सर्वदेशकालसंबन्धिनः। अत एव ब्रह्मणोऽपि नित्यं विभुम् इति निर्देशोपपत्तिः। नित्यमिति सर्वकालसंबन्धः, विभुमिति सर्वदेशसंबन्धः। अन्यथा ब्रह्म शशशृङ्गवत् तुच्छं भवेत् ।।

अत आश्रितत्वं न संबन्धित्वमात्रम्, किन्तु आधाराधीनत्वरूपम् । तादृशाधाराधीनत्वरूपाश्रितत्वं तु गुणादीनां सर्वेषां समानम्, ते हि द्रव्यमाश्रिताः। अनित्यद्रव्याण्यपि स्वावयवमाश्रितानि ।यथा— घटः कपालाश्रितः। पटस्तन्त्वाश्रितः।।

ननु घटादयो हि भूतलमाश्रिता इति चेत्, न, नियताश्रितत्वस्यात्र विवक्षितत्वात्।

टिप्पणी

घटादीनां भूतलाश्रितत्वं तु देशकृतं न नियतम् । कदाचित् अत्र, कदाचित् तत्रेति अव्यवस्थितत्वात् । अतो न मुख्यमाश्रितत्वमिदम्। अनित्यद्रव्याणि हि स्वावयवेषु यावन्नाशं वर्तन्ते । अत एते वृत्तिमत्पदार्थाः। नित्यद्रव्याणां तु अवयवाभावात् तत्रावर्तमानत्वात्, नैते वृत्तिमत्पदार्थाः। ननु सन्तु गगनादयोऽवृत्तिपदार्थाः, तथैव प्रसिद्धाः। परमाणवस्तु आकाशे खलु वर्तेरन् । अतस्ते कथमवृत्तिपदार्था इति चेत् न, घटादीनां यथा भूतलादयो न मुख्याधाराः, किन्तु स्वावयवा एवेति यथोक्तम्, तथैव परमाणवोऽतिलघुद्रव्याणि आकाशे प्लवन्ते, न वर्तन्ते । अतः परमाणवोऽपि गगनादिवदेवावृत्तिपदार्था एव, निरवयत्वात् । अतश्च नित्यद्रव्याण्यनाश्रितानि, तद्व्यतिरिक्तानि च द्रव्याश्रितानि । गुणकर्मादीनां सर्वेषां मुख्यमाश्रयो द्रव्यमेव । अतः सुष्ठूक्तम् - **अन्यत्र नित्यद्रव्येभ्यो ह्याश्रितत्वं साधर्म्यम्** इति ॥

पृथिव्यादीनां **नवानां** द्रव्यत्वम् ,गुणक्रियादिमत्त्वञ्च साधर्म्यम् । पृथिव्यप्तेजोवायुमनसां मूर्तत्वं, परत्वापरत्ववेगवत्त्वं, क्रियावत्त्वं च साधर्म्यम् । मूर्तत्वं नाम परिच्छिन्नपरिमाणवत्त्वम् ॥ पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं साधर्म्यम्। तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । आत्मनो मनोग्राह्यसुखादिविशेषगुणवत्त्वात् बहिरतीन्द्रियविशेषणम् । संख्यादिसामान्यगुणानां नवद्रव्यसाधारणत्वात् विशेषगुणपदम्।। कालदिगाकाशात्मनां विभुत्वम्, सर्वगतत्वं च साधर्म्यम् ॥ पृथिव्यप्तेजोवायूनां चतुर्णां स्पर्शवत्त्वं, द्रव्यारम्भकत्वं च साधर्म्यम् । तेष्वेवावयवावयविभावस्य सत्त्वात्, अवयवानामवयव्यारम्भकत्वात् । पृथिव्यप्तेजसां रूपवत्त्वं, द्रवत्ववत्त्वं, चाक्षुषत्वं च साधर्म्यम् । पृथिवीजलयोः रसवत्त्वं, गुरुत्ववत्त्वं च साधर्म्यं स्पष्टम् ।। पृथिवीतेजसोः नैमित्तिकद्रवत्ववत्त्वं साधर्म्यम् ॥

एवं साधर्म्यवैधर्म्यज्ञानात् पदार्थानामसङ्कीर्णं ज्ञानं सुसंपदं भवति । तेन चान्ते आत्मानात्मचिन्तायामात्मनोऽसङ्कीर्णस्वरूपज्ञानात् मुक्तिरपि क्रमेण भवेदित्याशयः ॥

इति साधर्म्यवैधर्म्यप्रकरणम् ।।

तत्र गन्धवती पृथिवी । सा द्विविधा --नित्या अनित्या चेति। नित्या परमाणुरूपा । अनित्या कार्यरूपा । पुनस्त्रिविधा शरीरेन्द्रिय-विषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणम् । तच्च नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।

आलोक-व्याख्या

एवं पदार्थान् विभज्य, विभक्तानां यथाक्रमं लक्षणं परीक्षां च प्रदर्शयति। तत्र आद्ये द्रव्ये आद्यां पृथिवीं लक्षयति -- **गन्धवतीति** । गुणवत्त्वं क्रियावत्त्वं वा द्रव्यसामान्यलक्षणमित्युच्यते । परन्तु क्रियायास्सार्वत्रिकत्वाभावात् आकाशादिविभुषु क्रियाया असंभवात्, तदपेक्षया गुणवत्त्वं लक्षणं वरम्, द्रव्येषु नियमेन कस्यचिद्गुणस्य सत्त्वात् । संख्यापरिमाणपृथक्त्वसंयोगविभागानां नवद्रव्यसामान्यगुणत्वात् । ननु **उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियं च तिष्ठति** इति नियमेनाद्यक्षणावच्छिन्ने घटे रूपादेरभावेन जातिघटितपरिष्कार-स्यावश्यकत्वे, क्रियावत्त्वलक्षणस्यापि जातिघटितपरिष्कारान्न दोष इति चेत्, सत्यम्, कालदिगात्मादिकं द्रव्यं तु सर्वथा क्रियाशून्यं भवति । गुणशून्यं तु आद्यक्षणावच्छिन्नघटादिमात्रम् , न त्वन्यत् । तदपि न प्रत्यक्षसिद्धम् , द्रव्यगुणयोः, द्रव्यक्रिययोश्च कार्यकारणभावव्यवस्थार्थं युक्तिमात्रेण सिद्धमिति विशेषः । अतः क्रियावत्त्वापेक्षया गुणवत्त्वमेव द्रव्यलक्षणमुचितम् ॥

द्रव्येषु प्रथमोद्दिष्टायाः पृथिव्या लक्षणमाह - **गन्धवतीत्यादि** । गन्धोऽस्याम् अस्तीति गन्धवती । 'अस्याम्' इत्यत्रेदम्शब्दस्य पृथिवीरूपोऽर्थः। सप्तम्या अधिकरणत्वमर्थः । प्रकृत्यर्थस्य पृथिव्याः सप्तम्यर्थाधिकरण-तायामाधेयता(निष्ठत्व)संबन्धेनान्वयः । तथा च पृथिवीनिष्ठाधिकरणता । 'अस्ति' इत्यत्र 'अस'धातोराधेयत्वमर्थः । 'ति'इत्याख्यातस्य आश्रयत्वमर्थः। सप्तम्यर्थाधिकरणताया 'अस'धात्वर्थाधेयतायां निरूपितत्वसम्बन्धेनान्वयः। आश्रयतायाश्च गन्धे अन्वयः । तथा च **पृथिवीनिष्ठाधिकरणता-निरूपिताधेयताश्रयो गन्धः** इति विग्रहवाक्यार्थबोधः ॥

आलोक-व्याख्या

'अन्यपदार्थप्रधानसमासादिवृत्तिस्थले विग्रहवाक्यात् यादृश-विशेषणविशेष्यभावापन्नो वोधो जायते, समासादिवृत्तिवाक्यात् तद्विपरीतविशेषणविशेष्यभावापन्नो वोधो जायते' इति नियमानुरोधेन पूर्वं विशेष्यभूतो गन्धः, गन्धवतीति तद्धितवृत्तौ विशेषणं भवति । पूर्वं विशेषणीभूता पृथिवी चेदानीं विशेष्या भवति । तथा च - **गन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयः पृथिवी** इति शाब्दबोधः । **गन्धनिष्ठाधेयतानिरूपिताधिकरणत्वं पृथिव्या लक्षणम्** । अस्य लक्षणस्य सुरभिकुसुमादिरूपपृथिव्यां समन्वयः। गन्धनिष्ठाधेयता का इति चेत् सौरभ्यनिष्ठाधेयता । तन्निरूपिताधिकरणता कुसुमरूपपृथिव्यां वर्तते इति लक्षणसमन्वयः।।

अव्याप्तिः, अतिव्याप्तिः, असंभवश्चेति लक्षणस्य त्रयो दोषा भवन्ति । तत्र (१) **लक्ष्यैकदेशावृत्तित्वमव्याप्तिः** । यथा गोः कपिलरूपवत्त्वं यदि लक्षणमुच्यते, तदा लक्ष्यैकदेशे श्वेतगवि कपिलरूपाभावादव्याप्तिः । (२) **लक्ष्यवृत्तित्वे सति अलक्ष्येऽपि लक्षणस्य सत्त्वमतिव्याप्तिः।** यथा गोः शृङ्गित्वं यदि लक्षणमुच्यते । तदा लक्ष्येषु गोषु सर्वेषु शृङ्गित्वसत्त्वेऽपि, अलक्ष्ये महिष्यादावपि शृङ्गित्वसत्त्वादतिव्याप्तिः । (३) **असंभवो नाम लक्ष्येषु कुत्राप्यसत्त्वम् ।** यथा गोः एकशफवत्त्वं लक्षणमुच्यते चेत्, लक्ष्यभूतेषु गोषु कुत्रापि एकशफवत्त्वाभावादसंभवः । एतादृशदूषणत्रयरहितधर्म एव लक्षणमित्युच्यते । यथा गोः सास्नादिमत्त्वम् । अत्रोक्तदोषत्रयरहितत्त्व-मस्ति । **असाधारणधर्मो लक्षणम्** । अथवा **लक्ष्यतावच्छेदकसमनियतधर्मो लक्षणम्** । यथा — यत्र यत्र गोत्वम्, तत्र सास्नादिमत्त्वम्, यत्र यत्र सास्नादिमत्त्वम्, तत्र गोत्वमिति लक्ष्यतावच्छेदकगोत्वसमनियतत्त्वं सास्नादिमत्त्वे वर्तत इति तत् गोर्लक्षणम् । एवमत्रापि गन्धवत्त्वं पृथिव्या लक्षणम् ।।

आलोक-व्याख्या

ननूक्तपृथिवीलक्षणस्य कालेऽतिव्याप्तिर्दुर्वारा । तथाहि— कालस्य सर्वाधारत्वात् 'इदानीं गन्धः' इति प्रतीतेः प्रामाणिकत्वात् गन्धनिष्ठाधेयतानिरूपिताधिकरणत्वं कालेऽपि वर्तते इति कालेऽतिव्याप्तिः। एवं जलादावप्यतिव्याप्तिर्दुष्परिहरा । तथाहि— 'सुरभि जलम्' इति प्रतीतेः प्रसिद्धत्वात् गन्धनिष्ठाधेयतानिरूपिताधिकरणत्वं जलेऽपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । गन्धनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम्-- **समवायसम्बन्धावच्छिन्न-गन्धनिष्ठाधेयतानिरूपिताधिकरणत्वम् इति** । एवञ्च नातिव्याप्तिः । तथाहि-- गन्धनिष्ठाधेयतानिरूपिताधिकरणत्वं यद्यपि काले वर्तते, किन्तु गन्धनिष्ठाधेयता तत्र कालिकसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना। गुणगुणिनोः समवायात् ; गन्धस्य च पृथिवीगुणत्वात् । गन्धो न कालस्य गुणः । कालस्य सर्वाधारताप्रयोजकसंबन्धः कालिक एव । अतः समवायसम्बन्धावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणत्वं पृथिव्यामेव वर्तते। न तु काल इति काले नातिव्याप्तिः ।।

एवं जलेऽपि नातिव्याप्तिः । तथाहि - समवायसम्बन्धा-वच्छिन्नगन्धनिष्ठा-धेयतानिरूपिताधिकरणत्वं पृथिव्यामेव वर्तते, न तु जले। जले दृश्यमाना गन्धनिष्ठाधेयता तु न समवायसम्बन्धावच्छिन्ना । अपि तु स्वसमवायिसंयुक्तत्वसम्बन्धावच्छिन्ना । स्वम्-गन्धः । तत्समवायिनी — कुसुमादिरूपा पृथिवी । तत्संयोगो जले वर्तत इति तादृशगन्धविशिष्ट-पृथिवीभागस्य संबन्धादेव जले गन्धोपलब्धिः । अतः स्वसमवायिसंयुक्तत्व-सम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणत्वं जले वर्तते, न तु समवायसम्बन्धा-वच्छिन्नाधेयतानिरूपिताधिकरणत्वम् । अतोऽलक्ष्ये जलादौ लक्षणासमन्वयात् नातिव्याप्तिः ।।

आलोक-व्याख्या

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः जलादावतिव्याप्तिर्दुष्परिहरा । तथाहि-- गन्धः कश्चन गुणः । अतस्तत्र गुणत्वरूपो धर्मोऽपि वर्तते । तथा च गन्धनिष्ठाधेयता गुणत्वावच्छिन्नाऽपि भवति । सा त्वाधेयता चतुर्विंशतिगुणसाधारणी एका । अतस्तादृशसमवायसम्बन्धावच्छिन्नगन्धनिष्ठाधेयता केति चेत् चतुर्विंशतिगुणसाधारणी एकैवाखण्डाधेयता। अतः समवायसम्बन्धावच्छिन्नगुणत्वावच्छिन्नगन्धनिष्ठाधेयता यथा गन्धे, तथा रसेऽपि वर्तते । तादृशाधेयतानिरूपिताधिकरणत्वं तु जलेऽपि वर्तते । जले रसस्य गुणस्य सत्वादिति पुनः जलेऽतिव्याप्तिरिति चेत्, न । गन्धनिष्ठाधेयतायां गन्धत्वावच्छिन्नत्वस्यापि निवेशनात् । तथा च लक्षणम्-- **समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणत्वम्** । एवञ्च नातिव्याप्तिः । तथाहि-- समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयता केति चेत्, गन्धे आधेयता द्वयं वर्तते । एका चतुर्विंशतिगुणसाधारणी गुणत्वावच्छिन्ना गन्धनिष्ठाधेयता । एवं गन्धत्वावच्छिन्नगन्धनिष्ठाधेयताऽपि चान्या वर्तते । तत्र गुणत्वावच्छिन्नगन्धनिष्ठाधेयतायाः स्वीकारे तु 'गुणवती' इति प्रतीतिसिद्धाधेयता भवति। लक्षणे तु 'गन्धवती' इति प्रतीतिसिद्धा गन्धत्वावच्छिन्ना गन्धमात्रनिष्ठाधेयता निविष्टा । तादृशसमवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयता केति चेत् 'गन्धवती' इति प्रतीतिसिद्धाधेयता, न तु 'गुणवती' इति प्रतीतिसिद्धा। तादृशाधेयतानिरूपिताधिकरणत्वं तु पृथिव्यामेव वर्तते, न तु जलादाविति नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्याद्यक्षणावच्छेदेन घटेऽव्याप्तिर्दुष्परिहरा। यद्यपि घटः पृथिवी । तथाऽपि तत्राद्यक्षणावच्छेदेन गन्धाभावो वर्तते । **'उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठति'** इति नियमात्

आलोक-व्याख्या

उत्पत्तिकालावच्छेदेन घटे गन्धो नास्तीति समवायसम्बन्धावच्छिन्न-गन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणत्वमाद्यक्षणावच्छिन्ने घटे नास्तीत्यव्याप्तिरिति चेत् ; न । जातिघटिततया लक्षणस्य परिष्कारात् । तथा च लक्षणम् - **समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्न-गन्धनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिजातिमत्त्वम्** । एवञ्च नाव्याप्तिः। तथाहि यत्र घटे गन्धोऽस्माभिर्गृह्यते, तादृशघटस्य स्वीकारात् समवायसम्बन्धाव-च्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणतावान् द्वितीया-दिक्षणाद्यवच्छिन्नो घटः। तद्वृत्तिर्या जातिरिति चेत्, पृथिवीत्वजातिः । तादृशजातिमत्त्वमाद्यक्षणावच्छिन्ने घटेऽपि वर्तते, पृथिवीत्वजातेस्तु नित्यत्वात् इत्याद्यक्षणावच्छिन्नेऽपि घटे लक्षणसमन्वयात् नाव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः जलादावतिव्याप्तिर्दुष्परिहरा । तथाहि— समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयता-निरूपिताधिकरणतावान् द्वितीयादिक्षणावच्छिन्नो घटः । तद्वृत्तिर्या जातिरिति चेत्, यथा पृथिवीत्वजातिस्तथा द्रव्यत्वजातिरपि भवति । द्रव्यत्वजातेः स्वीकारे तादृशजातिमत्त्वं जलेऽपि वर्तते, 'जलं द्रव्यम्' इति प्रतीतेः सत्त्वात् । अत अतिव्याप्तिरिति चेत्, न । लक्षणे द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षणात् । तथा च लक्षणम् -- **समवायसम्बन्धावच्छिन्नगन्धत्वाव-च्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्** इति। एवञ्च नातिव्याप्तिः । तथाहि — समवायसम्बन्धावच्छिन्न- गन्धत्वावच्छिन्न-गन्धनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्या जातिः केति चेत्? द्रव्यत्वजातिर्न भवति । व्याप्यत्वं हि न्यूनदेशवृत्तित्वम् । अतः स्वस्य स्वव्याप्यत्वाभावात्, तादृशद्रव्यत्वव्याप्याजातिः केति चेत् ? पृथिवीत्वजातिरेव। तादृशजातिमत्त्वं घटादावेव वर्तते ; न तु जलादाविति नातिव्याप्तिः ।।

आलोक-व्याख्या

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः पटादावव्याप्तिः दुस्त्यजा । तथाहि—समवायसंबन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपितधिकरणतावान् घटः । तद्वृत्तिर्द्रव्यत्वव्याप्या का जातिरिति चेत्, यथा पृथिवीत्वं भवति, तद्वत् घटत्वमपि भवति, तस्यापि द्रव्यत्वन्यूनदेशवृत्तित्वात्। तादृशजातिमत्त्वं तु घट एव वर्तते ; न तु पटादावित्यव्याप्तिरिति चेत् ; न। लक्षणे द्रव्यत्वव्याप्येत्यत्र 'द्रव्यत्वसाक्षाद्व्याप्य' इति निवेशनात् । तथा च लक्षणम्--**'समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्'** इति । द्रव्यत्वसाक्षाद्व्याप्यत्वं नाम द्रव्यत्वव्याप्यत्वे सति द्रव्यत्वव्याप्याव्याप्यत्वम्। एवञ्च नाव्याप्तिः । तथाहि--समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणतावान् घटः । तद्वृत्तिर्या द्रव्यत्वसाक्षाद्व्याप्या जातिरिति चेत् पृथिवीत्वजातिरेव भवति, न तु घटत्वजातिः। सा जातिस्तु द्रव्यत्वव्याप्यपृथिवीत्वापेक्षयापि व्याप्या । अतो द्रव्यत्वसाक्षाद्व्याप्यजातिपदेन घटत्वं स्वीकर्तुं न शक्यते । तस्य द्रव्यत्वव्याप्यपृथिवीत्वव्याप्यत्वात् द्रव्यत्वसाक्षाद्व्याप्यत्वाभावात्, साक्षाद्व्याप्यजातिस्तु पृथिवीत्वजातिरेव । तादृशजातिमत्त्वं पटादावपि वर्तते इति नाव्याप्तिः । तथा च **समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्** इति निष्कृष्टलक्षणमिति दिक् ।।

नन्वेवं सति पृथिवीत्वजातिमत्त्वं पृथिव्या लक्षणमित्येवोच्यताम् । किमर्थमेतावान् श्रम इति चेत् ? पृथिवीत्वजातेः परिचयार्थमेव तथा कथनात्। एवं ज्ञानवैशद्यर्थं च तथोक्तम् । इदमुत्तरलक्षणेष्वपि समानम् ।।

ननु गन्धवत्त्वं पृथिव्या लक्षणं चेत्, पृथिवी नाम गन्धवती भवत्येव ।

आलोक-व्याख्या

तथा च पृथिवीपदस्य गन्धवद्वाचकत्वात्, 'गन्धवती गन्धवती' इत्युक्तं भवतीति कथं शाब्दबोध इति चेत्, न, पृथिवीपदं हि जातिवाचकम् । न हि गन्धवत्पदपृथिवीपदे समानार्थके । गन्धवत्पदं हि गुणपुरस्कारेण पृथिवीमभिधत्ते, पृथिवीपदं हि पृथिवीत्वजातिपुरस्कारेण पृथिवीमभिधत्ते । पृथिवीपदप्रवृत्तिनिमित्तं पृथिवीत्वजातिः* । गन्धवत्पदप्रवृत्तिनिमित्तं गन्धो गुण इति ते पदे न पर्याय इति न कश्चन दोषः ।।

टिप्पणी

***पृथिवीत्वजातिः** -- पृथिवीत्वजातिर्नाम का ? तत्तत्पदेषु त्वपदयोजनया, सा जातिर्भवतीति प्रायो मन्यन्ते, तदा हि भूतत्वमूर्तत्वादिकमपि जातिः स्यात्। महर्षिस्तु **'समानप्रसवात्मिका जातिः'**(न्या.सू.२-२-७०) इत्युक्तवान्। अश्वादश्व एव जायते, न त्वन्यः। गजात् गज एव। एवं यस्मात् स्वजातीयमेव स्वमुत्पादयति, तस्य कारणभूतं तत्त्वमेव जातिरित्युच्यते । आम्रबीजात् आम्रवृक्ष एव जायते, न तु अश्वत्थवृक्षः। एवमश्वादश्व एव जायते, न तु गर्दभः । तथैव मनुष्यात् मनुष्य एव जायते, न त्वन्यः । अतः सुष्ठूक्तम् **समानप्रसवात्मिका जातिः** इति । यद्यपि भाष्ये **'समानबुद्धिप्रसवात्मिका'** इति विवरणं दृश्यते । तत्त्वानुषङ्गिकं अनुगतबुद्धिहेतुत्वं वदति । अनुगतबुद्धिस्तु उपाधिभिरपि भवितुमर्हति । तदपेक्षया समानजातीयप्रसवहेतुरेव जातिरित्येव स्वरसम् । **छान्दोग्ये** (६-१२) वटबीजदृष्टान्तेनेदं प्रदर्शितं द्रष्टव्यम् । जातिसाङ्कर्यस्य दोषत्वं चैतादृशजातीनां साङ्कर्य एवाभिमतम्, न तूपाधीनाम् । अत एव भूतत्वमूर्तत्वयोर्जातित्वं निराकृतम्,पृथिव्यादिचतुष्टय उभयसमावेशात् ।

एवं सांकर्यं प्रकृतिरेव न सहत इत्ययमप्यंशोऽवधेयः। अत एव **'स्वगर्भोऽश्वतरीमिव'** इति श्रीमद्रामायणोक्तिरपि सांकर्यं प्रतिषेधति । वडवायां गर्दभाज्जाता अश्वतरीत्युच्यते । सा यदा गर्भिणी भवति, तदा तेन गर्भेण हता भवति । अतः सांकर्यं प्रकृतिरेव (Nature) नानुमनुते ।एतत्तत्त्वमितोऽपि बहुविचारार्हम्। ग्रन्थबाहुल्यभीत्या विरम्यते ।

अत एव सांकर्यस्य जातिबाधकत्वे प्रमाणं नास्तीत्यादि नवीनानां साहसमपि धर्मविरुद्धमित्याद्यन्यत्र विस्तरः। प्रकृतमनुसरामः। पृथिवीत्वं कथं जातिर्भवति?

आलोक-व्याख्या

सा – पृथिवी, **द्विविधा**—द्विप्रकारा । **परमाणुरूपा**— परमाणु- स्वरूपा*।

टिप्पणी

'समानप्रसवात्मिका' इत्यस्यात्र कोऽर्थ इति चेत्, वस्तुतः पृथिवीत्वजातिः न प्रत्यक्षसिद्धा। **'आकृतिर्जातिलिङ्गाख्या'**(न्या.सू.२-२-६९) इति हि पारमर्षं सूत्रम्। लोकेऽपि हि कुशला जना अवयवसन्निवेशविशेषं सूक्ष्मं ज्ञात्वैव जातिं निश्चिन्वन्ति । जगति दृश्यमानाया विशालायाः पृथिव्याः, पार्थिवानां घटपटादीनां वा न ह्याकारसाम्यादिकं वक्तुं शक्यम् । अत एव गन्धसमवायिकारणतावच्छेदकतयैव पृथिवीत्वं साधयन्ति कुशलाः। गन्धस्य हि पृथिव्येव समवायिकारणम् । अतश्च **'पृथिवीनिष्ठा गन्धसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, या या कारणता, सा किञ्चिद्धर्मावच्छिन्ना'** इति ह्यनुमानं द्रष्टव्यम्। एवमनुमानात् पृथिवीत्वसिद्धौ **'सिद्ध्यतो धर्मस्य नित्यत्वे एकत्वे जातित्वे च लाघवम्'** इति लाघवतर्कवशादेव पृथिवीत्वजातिसिद्धिः। एवमप्त्वादावपि ज्ञेयम् ॥

***जालसूर्यमरीचिस्थं यत्सूक्ष्मं दृश्यते रजः।**
तस्य षष्ठस्तु यो भागः परमाणुः स कीर्तितः॥

इत्युक्तं परमाणुस्वरूपम् । नन्वेतादृशपरमाणुसत्त्वे किं प्रमाणम् ? न हि तत्प्रत्यक्षेणैव सिद्धम्, तथानङ्गीकारात् । कुतोऽनङ्गीकार इति चेत्, अत्यन्तसूक्ष्माणां क्रिमिकीटादीनां चक्षुषाऽग्रहणेन प्रत्यक्षे महत्त्वस्य कारणत्वमावश्यकम् । परमाणोर्महत्त्वे, ततोऽपि सूक्ष्मा रजःकणा अप्यङ्गीकार्याः । अस्तु तर्हि तादृशा रजःकणाः, अत एव **षष्ठतमो भागः परमाणुः** इत्यपि न साधीय इति चेत् ? न , तस्याणुद्वयजन्यत्वे, तत् दीर्घाकारं दृश्येत, वर्तुलं च न स्यात् । अतस्तस्य वर्तुलत्वान्यथानुपपत्या द्व्यणुकत्रयजन्यत्वमावश्यकम् । तथा च **जालसूर्यमरीचिस्थं रजः महत्, चाक्षुषत्वात्** इत्यनुमानेन, तस्य सावयवत्वसिद्धौ, **तदपि सावयवम्, महदारम्भकत्वात्** इत्यनुमानेन तस्याप्यवयवसिद्धिः । तस्याणुद्वयजन्यत्वेऽचतुरस्रत्वं स्यात् चक्षुर्ग्राह्यस्यावयविनः । अतो महत्परिमाणकं त्र्यणुकं परमाणुषट्कजन्यमिति निश्चीयते । अत एव **अणु,**

टिप्पणी

महत्, ह्रस्वम्, दीर्घम् इति परिमाणं चतुर्धा विभक्तम् । **महद्दीर्घवद्वा ह्रस्वपरिमण्ड्लाभ्याम्** इति बादरायणसूत्रेऽस्यानुवादोऽपि दृश्यते । अतश्च परमाणुद्वयेन द्वणुकोत्पत्तिः । द्व्यणुकद्वयेन त्र्यणुकोत्पत्तौ, तच्चतुरस्रं स्यादिति द्वणुकत्रयेण जातमवयवि त्र्यणुकमिति युज्यते । ततश्च चाक्षुषत्वात् त्र्यणुकस्य महत्त्वावश्यकत्वे, चक्षुषा दृश्येषु स एवात्यन्तं सूक्ष्मः स्यादिति व्यवहारे त्र्यणुकमेवाणुरुच्यते । एवं परिमाणस्य तारतम्यदर्शनात् **अणु, अणुतरम्, अणुतमम्** इति त्र्यणुकद्वणुकपरमाणूनां सिद्धिः। परमाणोरपि सावयवत्वेऽनवस्थाप्रसङ्गः। न चेष्टापत्तिः, तर्हि सर्षपपर्वतयोरुभयोरप्यनन्तावयघटितत्वात्, तयोस्तारतम्यं दुरुपपादं स्यात् । अवयवधारायाः कुत्रचिद्विश्रान्तौ सत्यां तु, सर्षपोऽल्पावयवजन्यः, पर्वतस्तु अधिकावयवजन्य इति तारतम्यं सूपपादम् । अतोऽवयवधारायां यत्र विश्रान्तिः, स एव परमाणुरित्युच्यत इति परमाणुसिद्धिः, ततो द्वणुकम्, ततश्च त्र्यणुकम् इति परम्परासिद्धिः ।एवम् **अणुः, अणुतरः,अणुतमः** इति अन्तिमावयवस्य परमाणुसंज्ञा । एतस्य निरवयवाच्च नित्यत्वसिद्धिः, अवयवजन्यत्वाभावात् । जन्यत्वस्यानित्यत्वव्याप्तत्वात् **इदमनित्यम्, जन्यत्वात्** इति हि प्रसिद्धम् । ननु तर्हि जन्यस्य ध्वंसस्यापि विनाशप्रसङ्गः । न चेष्टापत्तिः, घटध्वंसस्य नाशे घटस्य पुनरुद्भवप्रसङ्गात् । दुःखध्वंसरूपस्य मोक्षस्यापि नाशप्रसङ्गात्, मोक्षः परमपुरुषार्थो न स्यात् । ननु महाप्रलये सर्वनाशात्, परमाणूनामपि नाशावश्यकत्वे, कथं तेषां नित्यत्वमिति चेत्; कार्यवर्गस्यैव प्रलये नाशात्, परमाणूनां नित्यत्वेन कार्यत्वाभावात् तदा परमाणूनामनाशात् । तर्हि प्रलये **एकमेवाद्वितीयम्** इति परमात्ममात्रस्य सत्त्वश्रुतेः कथं परमाणूनां तदा सत्त्वमिति चेत्, तर्हि प्रलये जीवात्मनामपि नाशापत्तिः। इष्टमेव तदिति चेत्; स्वनाशायैव स्वस्य प्रवृत्तिः स्यादिति को वा मतिमान् स्वनाशाय यतते इत्यलमनया शास्त्रान्तरकथया । अतः परमाणवो नित्या एवेत्येतच्छास्त्रमर्यादा ज्ञेया ।

परस्परं तु शास्त्राणां सांङ्कर्यं नैव भावयेत् ।
अर्धप्रज्ञैस्तथा सर्वं कृतं सीमातिलङ्घनात् ।।

आलोक-व्याख्या

कार्यरूपा—कार्यस्वरूपा (अवयविरूपा)*। पदार्थानां साधर्म्य-वैधर्म्यतत्त्वज्ञानस्य शरीरेन्द्रियाद्यतिरिक्तात्मज्ञानोपयोगित्वाभिप्रायेण तदनुगुणं पृथिवीं विभजते - **पुनरित्यादि** । एवमेव जलादिलक्षणेऽपि । विषयो नामोपभोगसाधनम् । उपभोगो नाम सुखदुःखानुभवः ।।

टिप्पणी

***अवयवातिरिक्तावयविसाधनम्** —अवयवजन्यत्वात् , अवयविरूपा पृथिवी अनित्या=कार्यरूपा । ननु अवयवातिरिक्तावयविसत्त्वे किं मानम् ? न च तर्हि अवयवधारायाः परमाणौ विश्रान्त्या, तेषामतीन्द्रियत्वात्, तदतिरिक्तावयव्यनङ्गीकारे अवयविनोऽपि अतीन्द्रियत्वापत्त्या घटादेरप्रत्यक्षत्वं स्यादिति शङ्क्यम्, प्रत्येकं परमाणूनामप्रत्यक्षत्वेऽपि तत्सङ्घातरूपस्य घटादेः प्रत्यक्षत्वे विरोधाभावात् । एकस्य केशस्याप्रत्यक्षत्वेऽपि तत्समुदायस्य प्रत्यक्षत्ववदुपपत्तेरिति चेत्, न, केशस्यैकस्यापि नातीन्द्रियत्वम् । तस्याप्रत्यक्षत्वं दूरत्वादिदोषप्रयुक्तम्, न त्वतीन्द्रियत्वं केशस्य, समीपे तस्य प्रत्यक्षत्वात् । प्रकृते तु न तथा, परमाणूनामतीन्द्रियत्वात्, तत्सङ्घातस्याप्यप्रत्यक्षत्वात् । ननु तर्हि भवतां मतेऽतीन्द्रियैरवयवैर्जन्योऽवयवी त्र्यणुकः कथमैन्द्रियको भवेदिति चेत् , न, अवयवापेक्षयावयविनामत्यन्तभेदात् । एकत्र प्रत्यक्षत्वाप्रत्यक्षयोरभावात् । परमाणौ महत्त्वाभावान्न प्रत्यक्षत्वम् । त्र्यणुके तु महत्त्वात् प्रत्यक्षत्वम् । नन्वेवं सति चक्षुरिन्द्रियरूपतेजसि महत्त्वसत्त्वेऽपि कथमप्रत्यक्षत्वमिति चेत् ? तत्रत्यरूपस्यानुद्भूतत्वात् । द्रव्यप्रत्यक्षे उद्भूतरूपसमानाधिकरणमहत्त्वस्यैव कारणत्वात् । चक्षुरादौ महत्त्वे सत्यपि उद्भूतरूपाभावात्, न प्रत्यक्षत्वम् । परमाणौ तूद्भूतरूपसत्त्वेऽपि महत्त्वाभावान्न प्रत्यक्षत्वमिति विवेकः । परमाणुगतरूपस्योद्भूतत्वे किं प्रमाणमिति चेत् ? तज्जन्ये त्र्यणुकादौ रूपस्योद्भूतत्वदर्शनमेव प्रमाणम् ।

उद्भूतत्वं च प्रत्यक्षत्वप्रयोजकधर्मविशेषः, न तु जातिविशेषः । उद्भूतत्वस्य जातित्वे, साङ्कर्यप्रसङ्गः । उद्भूतत्वं विहाय रूपत्वम् अनुद्भूतरूपे । रूपत्वं विहाय उद्भूतत्वमुद्भूतस्पर्शादौ । उद्भूतत्वरूपत्वयोः समावेश उद्भूतरूपे ।।

शीतस्पर्शवत्य आपः ।

आलोक-व्याख्या

अपां लक्षणमाह - **शीतस्पर्शवत्य** इति । अप्शब्दो नित्यं बहुवचनान्तः । शीतस्पर्श आसु अस्तीति शीतस्पर्शवत्यः । 'आसु' इत्यत्र 'इदं'शब्दस्य जलमर्थः। सप्तम्या अधिकरणत्वमर्थः । प्रकृत्यर्थस्य जलस्य सप्तम्यर्थाधिकरणतायामाधेयतासम्बन्धेनान्वयः । तथा च जलनिष्ठाधिकरणता।

टिप्पणी

ननु परमाणुगतरूपस्यानुद्भूतत्वे का हानिरिति चेत्, त्र्यणुकरूपस्यानुद्भूतत्वप्रसङ्ग एव हानिः । न च परमाणौ महत्त्वाभावेऽपि त्र्यणुके महत्त्ववद् , रूपेऽपि तथात्वमस्तु काममिति शङ्क्यम्, परमाणौ महत्त्वाभावमात्रेणैव तदप्रत्यक्षत्वोपपत्तौ परमाणुरूपस्यापि अनुद्भूतत्वे प्रमाणाभावात् ॥

ननु राशि-सेना-वनादौ अतिरिक्तावयविनोऽनङ्गीकारेणैव एकत्वव्यवहारस्य निर्वाहात् किमर्थमतिरिक्तोऽवयव्यङ्गीक्रियत इति चेत्, न , तत्स्थले एकत्वव्यवहारस्य गौणत्वात् । तथैव घटादावप्यस्तु इति चेत् , न , यत्र कुत्रचित् मुख्यस्य एकत्वस्य सिद्धावेवान्यत्र गौणत्वसंभवात् । आकाशादावेकत्वं तु न प्रत्यक्षसिद्धम् । अन्यत्र कुत्र सिद्धमेकत्वम् ?। कुत्रचित् सिद्धावेव अन्यत्रौपचारिकं तदुपपादयितुं शक्यम् । अतोऽतिरिक्तोऽवयवी अङ्गीकार्य एव ॥

अपि च — पुरोवर्तिघटादिना सह चक्षुस्संयोगो घटैकदेशेन किल वर्तते । तर्हि प्रत्यक्षं घटैकदेशविषयकमेव स्यात्, न तु घटविषयकम् , अतिरिक्तस्य घटाख्यस्यावयविनोऽभावात् । अतिरिक्तावयव्यङ्गीकारे तु चक्षुस्संयोगो घटेन सह जात एव । संयोगस्याव्याप्यवृत्तित्वस्वभावात्, तस्य कात्स्न्येन ग्रहणं कदापि कथमपि केनापि कर्तुं न शक्यम् । बाल्यात्प्रभृत्यसकृत्तादृशपदार्थानामनुभवेन बुद्धौ तादृशावयविनो गृहीतत्वेन, तद्दृष्टान्तेनैव बुद्धिः कार्यं करोति । यथा मनुजेन स्वपृष्ठभागस्य कदाप्यदृष्टत्वेऽपि तद्विषयकानुभव एव तद्ज्ञानं सदापादयति, बुद्धौ मुद्रितत्वात्, तद्वदेव प्रकृतेऽपि । अतोऽतिरिक्तावयवी अवश्यमङ्गीकार्यः ॥

आलोक-व्याख्या

'अस्ति' इत्यत्र असधातोराधेयत्वमर्थः। आख्यातस्याश्रयत्वमर्थः । सप्तम्यर्थाधिकरणताया निरूपितत्वसम्बन्धेन 'अस्'धात्वर्थाधेयतायामन्वयः। आश्रयत्वस्य शीतस्पर्शेऽन्वयः । तथा च जलनिष्ठाधिकरणता-निरूपिताधेयताश्रयः शीतस्पर्श इति विग्रहवाक्यबोधः ।।

'अन्यपदार्थप्रधानसमासादिवृत्तिस्थले' इत्यादिपूर्वोक्तनियमानुरोधेन शीतस्पर्शवत्य इति तद्धितवृत्तौ पूर्वं विशेषणभूतं जलम् इदानीं विशेष्यं भवति । पूर्वं विशेष्यभूतः शीतस्पर्श इदानीं विशेषणं भवति । तथा च— **शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयो जलमिति** बोधः। **शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं जलस्य लक्षणम् ।** अस्य लक्षणस्य कासारादिजले समन्वयः । शीतस्पर्शनिष्ठाधेयता केति चेत्, 'शीतं कासारजलम्' इति प्रतीतिसिद्धा शीतस्पर्शनिष्ठाधेयता । तादृशाधेयतानिरूपिताधिकरणत्वं कासारादिजले वर्तत इति लक्षणसमन्वयः।।

नन्वेवं सति एतल्लक्षणस्य कालादावतिव्याप्तिः । कालस्य सर्वाधारत्वात् 'इदानीं शीतं जलम्' इति प्रतीतेः प्रामाणिकत्वात् शीतस्पर्शनिष्ठाधेयता-निरूपिताधिकरणत्वं कालेऽपि वर्तत इत्यतिव्याप्तिः । एवं पृथिव्यामप्यतिव्याप्तिः। कथमिति चेत् - 'शीतं शिलातलम्' इति प्रतीतेः हेमन्तादावनुभवसिद्धत्वात् शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं शिलातलरूपपृथिव्यां वर्तत इत्यलक्ष्ये लक्षणस्य सत्त्वात् अतिव्याप्तिरिति चेत्, न । शीतस्पर्शनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम्— **'समवायसम्बन्धावच्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकर-णत्वम्'** इति । एवञ्च नातिव्याप्तिः । तथाहि--शीतस्पर्शनिष्ठाधेयता-निरूपिताधिकरणत्वं यद्यपि काले वर्तते । किन्तु तत्र शीतस्पर्शनिष्ठाधेयता कालिकसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना । कुत इति चेत् ? गुणगुणिनोः समवायात्,

आलोक-व्याख्या

शीतस्पर्शो जलस्य गुणः, न तु कालस्य । कालस्य सर्वाधारताप्रयोजकसम्बन्धः कालिकसम्बन्धः । अतस्तत्र शीतस्पर्शनिष्ठाधेयता कालिकसम्बन्धावच्छिन्ना। न तु समवायसम्बन्धावच्छिन्ना । समवायसम्बन्धावच्छिन्नशीतस्पर्शनिष्ठाधेयता-निरूपिताधिकरणत्वं तु जल एव वर्तते, न तु काल इति काले नातिव्याप्तिः।।

एवं पृथिव्यामपि नातिव्याप्तिः । कथमिति चेत् ? समवाय-सम्बन्धावच्छिन्ना शीतस्पर्शनिष्ठाधेयता का ? इत्युक्तौ 'शीतं जलम्' इति प्रतीतिसिद्धाधेयतैव । न तु 'शीतं शिलातलम्' इति प्रतीतिसिद्धाधेयता । समवायसंबन्धावच्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं जल एव वर्तते । न तु शिलातलरूपपृथिव्याम् । शिलातलरूपपृथिवीनिरूपिता शीतस्पर्शनिष्ठाधेयता तु न समवायसम्बन्धावच्छिन्ना ; किन्तु स्वसमवायिसंयुक्तत्वसम्बन्धावच्छिन्ना । स्वः - शीतस्पर्शः। स्वसमवायि - जलम् । तत्संयोगः शिलातलरूपपृथिव्यां वर्तते । शीतस्पर्शविशिष्ट-हिमादिसम्बन्धादेव पृथिव्यां शीतस्पर्शोपलब्धिः । अतः स्वसमवायिसंयुक्तत्व-सम्बन्धावच्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं पृथिव्यां वर्तते । न तु समवायसम्बन्धावच्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वम् । समवायसम्बन्धावच्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं तु जल एव वर्तत इति नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः पृथिव्यामतिव्याप्तिः । तथाहि— शीतस्पर्शः कश्चन गुणः । अतस्तत्र गुणत्वरूपा जातिरपि वर्तते । तथा च शीतस्पर्शनिष्ठाधेयता गुणत्वावच्छिन्नापि भवति । साऽऽधेयता तु चतुर्विंशतिगुणसाधारणी एकाऽखण्डा समवायसम्बन्धावच्छिन्ना । अतः समवायसम्बन्धावच्छिन्नशीतस्पर्शनिष्ठगुणत्वावच्छिन्नाधेयता केति चेत् चतुर्विंशतिगुणसाधारणी एकैवाखण्डाधेयतापि । तादृशाधेयता यथा शीतस्पर्शे

आलोक-व्याख्या

वर्तते तथा गन्धेऽपि वर्तते । तादृशाधेयतानिरूपिताधिकरणत्वं तु पृथिव्यामपि वर्तत इति पृथिव्यां पुनरतिव्याप्तिरिति चेत् - न । शीतस्पर्शनिष्ठाधेयतायां शीतस्पर्शत्त्वावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम्-- **समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयता-निरूपिताधिकरणत्वम्** इति । एवञ्च नातिव्याप्तिः। तथाहि— समवाय-सम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयता केति चेत् ? 'शीतं जलम्' इति प्रतीतिसिद्धा शीतस्पर्शनिष्ठाधेयतैव भवति । कुतः ? इति चेत्, शीतस्पर्श आधेयताद्वयं वर्तते । एका चतुर्विंशतिगुणसाधारणी 'गुणवत् जलम्' इति प्रतीतिसिद्धा गुणत्वावच्छिन्ना शीतस्पर्शनिष्ठाधेयता । एवं शीतस्पर्शत्वावच्छिन्ना 'शीतं जलम्' इति प्रतीतिसिद्धा शीतस्पर्शमात्र-निष्ठान्याऽप्याधेयता वर्तते । तत्र गुणत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयतायाः स्वीकारे तु 'गुणवदि'ति प्रतीतिसिद्धाधेयता भवतीत्यतिव्याप्तिः । लक्षणे तु 'शीतं जलम्' इति प्रतीतिसिद्धा शीतस्पर्शनिष्ठाधेयता निविष्टा । अतः समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयता केति चेत्? 'शीतं जलम्' इति प्रतीतिसिद्धैवाधेयता भवति, न तु 'गुणवती' इति प्रतीतिसिद्धाधेयता । अतः समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्न-शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं जल एव वर्तते, नान्यत्र कुत्राऽपीति पृथिव्यां नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्योत्पत्तिकालावच्छेदेन जलेऽव्याप्ति-र्दुष्परिहरा। **'उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठतीति** नियमात् उत्पत्तिकालावच्छेदेन जले शीतस्पर्शाभावात् समवायसम्बन्धाव-च्छिन्नशीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं तत्र नास्तीति लक्षणस्यासमन्वयात् अव्याप्तिरिति चेत्, न । जातिघटितलक्षणस्य विवक्षणात्।

आलोक-व्याख्या

तथा च लक्षणम् - **समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्न-शीतस्पर्श-निष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिजातिमत्त्वम्'** इति। एवञ्च नाव्याप्तिः । तथाहि - यत्रास्माभिः शीतस्पर्श उपलभ्यते, तादृशद्वितीयादिक्षणावच्छिन्नजलस्य स्वीकारात्, तद्वृत्तिर्जातिः - जलत्वजातिः। तादृशजातिमत्त्वमाद्यक्षणावच्छिन्ने जलेऽपि वर्तते । जलत्वजातेर्नित्यत्वात् । अतो लक्षणसमन्वयान्नाव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः पृथिव्यामेवातिव्याप्तिर्दुष्परिहरा । तथाहि — समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयता-निरूपिताधिकरणतावत् कासारजलम् । तद्वृत्तिः का जातिरिति चेत् ? यथा जलत्वजातिस्तथा द्रव्यत्वजातिरपि भवति । तादृशजातिमत्त्वं पृथिव्यामपि वर्तत इति तत्रातिव्याप्तिरिति चेत् - न । जातौ द्रव्यत्वव्याप्यत्वस्य विशेषणात्। तथा च लक्षणम्--'**समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्न शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्यजाति-मत्त्वम्'** इति । एवञ्च नातिव्याप्तिः । समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वाव-च्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्या का जातिरिति चेत् ? द्रव्यत्वजातिर्न भवति, स्वस्य स्वव्याप्यत्वाभावात् । अतो द्रव्यत्वव्याप्या जातिस्तु जलत्वजातिरेव । तादृशजातिमत्त्वं तु कासारादिजल एव वर्तते, न तु पृथिव्यामिति नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनरव्याप्तिर्दुष्परिहरा । तथाहि - समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयता-निरूपिताधिकरणतावान् कासारादिः । तद्वृत्तिर्या द्रव्यत्वव्याप्या जातिरिति चेत् ? यथा जलत्वजातिस्तथा कासारत्वजातिरपि । तादृशजातिमत्त्वं कासारजल एव वर्तते, न तु समुद्रजल इति लक्ष्यैकदेशे समुद्रजले

ताश्च द्विविधाः । नित्या अनित्याश्चेति । नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । पुनस्त्रिविधाः शरीरेन्द्रिय-विषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनम् । तच्च जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।

आलोक-व्याख्या

लक्षणस्यासमन्वयात् अव्याप्तिरिति चेत् - न । द्रव्यत्वव्याप्येत्यत्र 'साक्षात्' पदस्य विशेषणात् । तथा च लक्षणम् - **'समवायसम्बन्धावच्छिन्न-शीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणता-वद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्'** - इति । एवञ्च नाव्याप्तिः । साक्षात्त्वं नाम स्वव्याप्यत्वे सति स्वव्याप्याव्याप्यत्वम् । एवं च नाव्याप्तिः। तथा हि - समवायसम्बन्धावच्छिन्नशीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठा-धेयतानिरूपिताधिकरणतावान् कासारः । तद्वृत्तिर्या द्रव्यत्वसाक्षाद्व्याप्या जातिरिति चेत् ? कासारत्वजातिर्न भवति । सा जातिस्तु द्रव्यत्वव्याप्यव्याप्या। द्रव्यत्वव्याप्या जलत्वजातिः । तद्व्याप्या कासारत्वजातिः । द्रव्यत्वसाक्षाद्व्याप्या जातिस्तु जलत्वजातिरेव भवति । न तु कासारत्वजातिः। तस्या द्रव्यत्वसाक्षाद्व्याप्यत्वाभावात् । अतः समवायसम्बन्धावच्छिन्न-शीतस्पर्शत्वाव-च्छिन्नशीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताव-द्वृत्तिद्रव्यत्वसाक्षाद्व्याप्या जातिः जलत्वजातिरेव । तादृशजातिमत्त्वं समुद्रजलेऽपि वर्तत इति नाव्याप्तिः । तथा च– **समवायसम्बन्धा-वच्छिन्नशीतस्पर्शत्वावच्छिन्नशीतस्पर्शनिष्ठाधेयतानिरू पिताधिकरणता-वद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् अपां लक्षणम्।।** एवं सति जलत्वजातिमत्त्वमेव अपां लक्षणं कुतो नोक्तम् ? इत्यादिकं पृथिवीलक्षण इव ज्ञेयम् । सा द्विविधेत्यादिकं पूर्ववत् । जिह्वाग्रं नाम जिह्वाया उपरिभागः।।

उष्णस्पर्शवत्तेजः । तद्द्विविधम् । नित्यमनित्यं चेति । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधम् । शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके । इन्द्रियं रूपग्राहकं चक्षुः । तच्च कृष्णताराग्रवर्ति । विषयश्चतुर्विधः। भौमदिव्यौदर्याकरजभेदात्। भौमं वह्न्यादि । दिव्यमबिन्धनं विद्युदादि । भुक्तस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि ।

आलोक-व्याख्या

तेजसो लक्षणमाह - **उष्णस्पर्शवदिति** । उष्णस्पर्शोऽस्मिन् अस्तीति उष्णस्पर्शवत् इति विग्रहः । अस्मिन् इत्यत्र 'इदं'शब्दस्य तेजोऽर्थः । सप्तम्या अधिकरणत्वमर्थः । प्रकृत्यर्थस्य सप्तम्यर्थाधिकरणतायामाधेयतासम्बन्धेनान्वयः । तथा च तेजोनिष्ठाधिकरणता । 'अस्ति' इत्यत्र असधातोराधेयत्वमर्थः । आख्यातस्याश्रयत्वमर्थः । सप्तम्यर्थाधिकरणताया असधात्वर्थाधेयतायां निरूपितत्वसम्बन्धेनान्वयः । आश्रयत्वस्य चोष्णस्पर्श अन्वयः । तथा च - **तेजोनिष्ठाधिकरणतानिरूपिताधेयताश्रय उष्णस्पर्श** इति शाब्दबोधः । **'अन्यपदार्थप्रधानसमासादिवृत्तिस्थले'** - इत्यादिनियमानुरोधेन पूर्वं विशेष्यभूत उष्णस्पर्शः, उष्णस्पर्शवत् इति तद्धितवृत्तौ विशेषणं भवति । पूर्वं विशेषणभूतं तेज इदानीं विशेष्यं भवति । तथा च **उष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयस्तेजः** इति उष्णस्पर्शवत् इति वाक्याद् बोधः । **उष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं तेजसो लक्षणम्** । उष्णस्पर्शनिष्ठाधेयता केति चेत् ? 'उष्णो वह्निः' इति प्रतीतिसिद्धाधेयता । तन्निरूपिताधिकरणत्वं वह्निरूपतेजसि वर्तत इति लक्षणसमन्वयः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य कालेऽतिव्याप्तिर्दुष्परिहरा । 'कालस्य सर्वाधारत्वात्' 'इदानीमुष्णस्पर्शः' इति प्रतीतेः प्रामाणिकत्वात् उष्णस्पर्शनिष्ठा-

आलोक-व्याख्या

धेयतानिरूपिताधिकरणत्वम् कालेऽपि वर्तत इति कालेऽतिव्याप्तिः । एवं जलेऽप्यतिव्याप्तिः। तथाहि - 'उष्णं जलम्' इत्यनुभवस्य विद्यमानत्वात् उष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं जलेऽपि वर्तत इति जलादावतिव्याप्तिरिति चेत्, न । उष्णस्पर्शनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वस्य विशेषणात् । तथा च लक्षणम् — **'समवायसम्बन्धावच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वम्'** इति । एवञ्च नातिव्याप्तिः । तथाहि — यद्यपि काले 'इदानीं उष्णस्पर्शः' इति प्रतीतिसत्त्वात् उष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं वर्तते । किन्तु सा उष्णस्पर्शनिष्ठाधेयता कालिकसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना । कुत इति चेत् ? गुणगुणिनोः समवायात्, उष्णस्पर्शस्य तेजोगुणत्वात् । उष्णस्पर्शो न कालस्य गुणः । सर्वाधारत्वप्रयोजकः कालिकसम्बन्धः । अतस्तत्र उष्णस्पर्शनिष्ठाधेयता कालिकसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना। समवायसम्बन्धावच्छिन्नोष्णस्पर्शनिष्ठाधेयता तु 'उष्णो वह्निः' इति प्रतीतिसिद्धैवाधेयता । तादृशाधेयतानिरूपिताधिकरणत्वं तु तेजस्येव वर्तते, नान्यत्र कुत्रापीति कालादौ नातिव्याप्तिः। एवं जलेऽपि नातिव्याप्तिः । कथमिति चेत् ? जले विद्यमानोष्णस्पर्शनिष्ठाधेयता तु, न समवायसम्बन्धावच्छिन्ना, किन्तु स्वसमवायिसंयुक्तत्वसम्बन्धावच्छिन्ना । कुत इति चेंत् ? उष्णस्पर्शविशिष्टतेजोभागसम्बन्धादेव जल उष्णस्पर्शस्योपलब्धिः। तथा च स्वम् - उष्णस्पर्शः, स्वसमवायि— तेजः । तत्संयोगो जले वर्तत इति तादृशसम्बन्धाव-च्छिन्नाधेयतानिरूपिताधिकरणत्वं जले वर्तते, न तु समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वा-वच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वमित्यतो जले नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः पृथिव्यादावतिव्याप्तिर्दुष्परिहरा ।

आलोक-व्याख्या

तथाहि - उष्णस्पर्शः कश्चन गुणः । तथा च— उष्णस्पर्शनिष्ठाधेयता गुणत्वावच्छिन्नाऽपि भवति । एषाधेयता तु चतुर्विंशतिगुणसाधारणी एकैवाखण्डाधेयता । तादृशाधेयता यथा उष्णस्पर्शे वर्तते, तथैव गन्धेऽपि वर्तते । अतः समवायसम्बन्धावच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं पृथिव्यामपि वर्तत इति पुनः पृथिव्यामतिव्याप्तिरिति चेत्, न । उष्णस्पर्शनिष्ठाधेयतायामुष्णस्पर्शत्वावच्छिन्नत्वस्यापि विशेषणात् । तथा च लक्षणम् - **समवायसम्वन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वम् इति** । एवञ्च नातिव्याप्तिः । तथाहि - उष्णस्पर्शे आधेयताद्वयं वर्तते । एका गुणत्वावच्छिन्नोष्णस्पर्शनिष्ठा चतुर्विंशतिगुणसाधारणी आधेयता । अपरा च उष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शमात्रनिष्ठाधेयता । तत्र गुणत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयतायाः स्वीकारे तु 'गुणवत्' इति प्रतीतिसिद्धाधेयता भवति । लक्षणे तु 'उष्णस्पर्शवत्' इति प्रतीतिसिद्धोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शमात्रनिष्ठाधेयता निविष्टा । अतः समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयता केति चेत्? 'उष्णस्पर्शवत्' इति प्रतीतिसिद्धाधेयतैव, न तु 'गुणवत्' इति प्रतीतिसिद्धाधेयता । तादृशाधेयतानिरूपिताधिकरणत्वं तु तेजस्येव, न तु पृथिव्यादाविति नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्योत्पत्तिकालावच्छेदेन दीपादावव्याप्तिर्दुष्परिहरा । **'उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठति'** इति नियमानुरोधेनाद्यक्षणावच्छिन्ने दीपादौ तेजस्युष्णस्पर्शाभावात् समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वम् उत्पत्तिकालिकदीपादौ नास्तीत्यव्याप्तिरिति चेत् - न। जातिघटिततया लक्षणपरिष्कारात् । तथा च लक्षणम् -- **समवायसम्वन्धा-**

आलोक-व्याख्या

वच्छिन्नोष्णस्पर्शत्वावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्ति-जातिमत्त्वम् इति । एवञ्च नाव्याप्तिः । तथाहि--समवायसम्बन्धावच्छिन्नोष्ण-स्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावान् द्वितीयादि-क्षणावच्छिन्नो दीपादिः । तद्वृत्तिर्या जातिरिति चेत्, तेजस्त्वजातिः । तादृशजातिमत्त्वम् आद्यक्षणावच्छिन्ने दीपेऽपि वर्तते, 'तेजस्त्वजातेर्नित्यत्वात्' इति नाव्याप्तिः।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः पृथिव्यादावतिव्याप्तिर्दुष्परिहरा । तथाहि समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयता-निरूपिताधिकरणतावान् वह्निः । तद्वृत्तिर्या जातिरिति चेत् ? यथा तेजस्त्वं तथा द्रव्यत्वमपि । तादृशजातिमत्त्वं पृथिव्यामपि वर्तत इति चेत्, न । जातौ द्रव्यत्वव्याप्यत्वस्य विशेषणात् । तथा च लक्षणम् - **'समवाय-सम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयता-निरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्'** इति । एवञ्च नातिव्याप्तिः । तथाहि - समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्ण-स्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावान् वह्निः । तद्वृत्तिर्या द्रव्यत्वव्याप्या जातिरिति चेत् ? द्रव्यत्वजातिर्न भवति । 'स्वस्य स्वव्याप्यत्वाभावात्' । तादृशजातिमत्त्वं तेजस्येव वर्तते, न तु पृथिव्यादाविति तत्र नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः सुवर्णादौ तेजस्यव्याप्तिर्दुष्परिहरा। तथाहि -समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयता-निरूपिताधिकरणतावान् दीपः । तद्वृत्तिर्या द्रव्यत्वव्याप्या जातिरिति चेत्? यथा तेजस्त्वजातिर्भवति, तद्वत् दीपत्वजातिरपि भवति । तादृशजातिमत्त्वं सूर्यादिरूपतेजसि नास्तीति अव्याप्तिरिति चेत्, न । द्रव्यत्वव्याप्ये 'साक्षात्'पदस्य विशेषणात् । तथा च लक्षणम्-- **'समवायसम्बन्धा-**

रूपरहितस्पर्शवान् वायुः ।

आलोक-व्याख्या

वच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्' इति ।।

एवञ्च नाव्याप्तिः । तथाहि - साक्षात्त्वं नाम - स्वव्याप्यत्वे सति स्वव्याप्याव्याप्यत्वम् । स्वम् - द्रव्यत्वम्, तद्व्याप्यत्वं तेजस्त्वे वर्तते । तद्व्याप्यत्वं दीपत्वे इति । अतः समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावत् तेजः । तद्वृत्तिर्या द्रव्यत्वसाक्षाद्व्याप्या जातिरिति चेत् ? तेजस्त्वजातिरेव भवति । दीपत्वजातिस्तु न द्रव्यत्वसाक्षाद्व्याप्या । किन्तु द्रव्यत्वव्याप्यव्याप्या । अतस्तादृशाधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिश्चेत् तेजस्त्वजातिः । तादृशजातिमत्त्वं सुवर्णादावपि वर्तत इति नाव्याप्तिः । तथा च संपूर्णतेजोलक्षणम् -- **'समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्'** इति ।। तर्हि तेजस्त्वजातिमत्त्वमेव लक्षणमस्तु इत्येतत्तु पूर्ववदेव समाधेयम् ॥

भौमम् - दार्वादीन्धनप्रभवम् । **दिव्यम्** - आकाशावच्छिन्ने मेघमण्डले जातम्, अत एव - अबिन्धनम्, न त्वप्राकृतम् । अप्राकृतम् तु दिव्यं शुद्धम् आत्मादिकमेव । उदरे भवम् - **औदर्यम्** - जाठराग्निः । **आकरः** - खनिः। तत्र जातम् । भास्वररूपस्य तेजोगुणत्वात् सुवर्णे लेशतो भास्वररूपदर्शनेन तैजसत्वम् ।।

वायोर्लक्षणमाह - **रूपरहिते**त्यादि । 'रूपरहितस्पर्शवान्' इति कर्मधारयः, व्यस्तं पदं वा । स्पर्शोऽस्मिन् अस्तीति स्पर्शवान् इति विग्रहः। 'अस्मिन्' इत्यत्र इदंशब्दस्य वायुरर्थः । सप्तम्या अधिकरणत्वमर्थः । प्रकृत्यर्थस्याधेयतासम्बन्धेन सप्तम्यर्थाधिकरणतायामन्वयः । तथा च

आलोक-व्याख्या

वायुनिष्ठाधिकरणता इत्यासीत् । 'अस्ती'त्यत्र 'अस्'धातोराधेयत्वमर्थः । सप्तम्यर्थाधिकरणताया असधात्वर्थाधितायां निरूपितत्वसम्बन्धेनान्वयः । आख्यातस्याश्रयत्वमर्थः । आश्रयत्वस्य स्पर्शेऽन्वयः । तथा च **'वायुनिष्ठाधिकरणतानिरूपिताधेयताश्रयः स्पर्शः'** इति विग्रहवाक्यबोधः। **'अन्यपदार्थप्रधानसमासादिवृत्तिस्थले विग्रहवाक्यात्'** इत्यादि-पूर्वोक्तनियमेन पूर्वं विशेषणभूतो वायुः, **स्पर्शवान्** इति तद्धितवृत्तिस्थले विशेष्यो भवति । पूर्वं विशेष्यभूतः स्पर्श इदानीं विशेषणं भवति । तथा च **'स्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयो वायुः'** इति स्पर्शवान् इति वाक्याद् बोधः ॥

'रूपरहितः' इत्यत्र **'रूपेण रहितः'** इति तृतीयातत्पुरुषः । 'रूपेण' इत्यत्र प्रकृते रूपमर्थः। तृतीयायाः प्रतियोगित्वमर्थः । प्रकृत्यर्थस्य तृतीयार्थप्रतियोगितायामाधेयतासम्बन्धेनान्वयः । तथा च 'रूपनिष्ठा प्रतियोगिता' इत्यासीत् । 'रहितः' इत्यत्र रहधातोरत्यन्ताभावोऽर्थः । तदुत्तरवर्ति'क्त'-प्रत्ययस्याश्रयत्वमर्थः । तृतीयार्थप्रतियोगिताया रहधात्वर्थात्यन्ताभावे निरूपकतासम्बन्धेनान्वयः । तथा च **रूपनिष्ठप्रतियोगितानिरूपकाभावाश्रय** इति 'रूपेण रहितः' इति व्यस्तप्रयोगाद् बोधः । 'रूपरहितः' इति तत्पुरुषसमासे तु 'रूप'इति पूर्वपदस्य रूपनिष्ठप्रतियोगितानिरूपके लक्षणा । अभावेन सहाभेदसंबन्धेनान्वय इति विशेषः । एवञ्चाहत्य **'रूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वे सति स्पर्शनिष्ठाधेयता-निरूपिताधिकरणताश्रयो वायुः'** इति अखण्डबोधः ॥

'रूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वे सति स्पर्शनिष्ठाधेयता-निरूपिता-धिकरणत्वं वायोर्लक्षणम् । लक्षणस्यास्य लक्ष्ये वायौ समन्वयः। तथाहि स्पर्शनिष्ठाधेयता का ? इति चेत् 'स्पर्शवान् वायुः' इति

आलोक-व्याख्या

प्रतीतिसिद्धाधेयता । तादृशाधेयतानिरूपिताधिकरणत्वं वायौ वर्तते । एवं वायौ रूपाभावात् रूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वमपि वर्तत इति लक्षणसमन्वयः । तत्र स्पर्शवत्त्वमात्रोक्तौ पृथिव्यादौ स्पर्शस्य सत्त्वादतिव्याप्तिः। अतो रूपरहितत्वमुक्तम् । पृथिव्यां रूपस्य सत्त्वेन रूपरहितत्व-स्याभावान्नातिव्याप्तिः। रूपरहितत्वमात्रोक्तावाकाशादौ रूपाभावात् अतिव्याप्तिः। अतः स्पर्शवत्त्वमुक्तम् । आकाशादौ स्पर्शस्याभावात् नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य कालेऽतिव्याप्तिर्दुर्वारा । तथाहि— कालस्य सर्वाधारत्वात् 'इदानीं स्पर्शः' इति प्रतीतेः प्रामाणिकत्वात् । स्पर्शनिष्ठाधेयता का ? इति चेत् 'इदानीं स्पर्शः' इति प्रतीतिसिद्धाधेयता। तादृशाधेयतानिरूपिताधिकरणत्वं कालेऽपि वर्तते, एवं रूपरहितत्वमपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । स्पर्शनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम् - **'रूपनिष्ठप्रतियोगितानिरूपकाभावा-श्रयत्वे सति समवायसम्वन्धावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिता-धिकरणत्वम्'** । एवञ्च नातिव्याप्तिः । तथाहि— यद्यपि काले रूपनिष्ठाप्रति-योगितानिरूपकाभावाश्रयत्वे सति, स्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं वर्तते, तथापि तादृशाधेयता कालिकसम्बन्धावच्छिन्ना । न तु समवायसम्बन्धा-वच्छिन्ना । कुत इति चेत् ? गुणगुणिनोः समवायात्, स्पर्शस्य वायोर्गुणत्वात्। स्पर्शो न कालस्य गुणः । कालनिष्ठाधिकरणतानिरूपितस्पर्शनिष्ठाधेयता कालिकसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना । अतश्च समवायसम्बन्धावच्छिन्नस्पर्शनिष्ठाधेयता-निरूपिताधिकरणत्वं तु वायावेव वर्तते, न तु काल इति नातिव्याप्तिः ।।

नन्वेवं सत्यपि पुनरस्य लक्षणस्य कालादावतिव्याप्तिर्दुरुद्धरा ।

आलोक-व्याख्या

तथाहि— स्पर्शः कश्चन गुणः । तत्र वर्तमाना समवायसम्बन्धावच्छिन्नाधेयता केति चेत् ? 'गुणवान्' इति प्रतीतिसिद्धा गुणत्वावच्छिन्नाधेयताऽपि भवति। तादृशाधेयता यथा स्पर्शे वर्तते तथा संख्यादावपि वर्तते, चतुर्विंशतिगुण-साधारणी एकैवाखण्डाधेयता इत्युक्तत्वात् । समवायसम्बन्धावच्छिन्न-गुणत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वं कालेऽपि वर्तते । 'एकः कालः' इति कालस्य एकत्वसंख्याधारत्वात् । तत्र रूपरहितत्वस्यापि सत्त्वात् कालेऽतिव्याप्तिरिति चेत्, न । स्पर्शनिष्ठाधेयतायां स्पर्शत्वावच्छिन्न-त्वस्यापि निवेशनात् । तथा च लक्षणम् - **'रूपनिष्ठप्रतियोगिता-निरूपकाभावाश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्न-स्पर्शनिष्ठाधेयतानिरूपिताधिकरणत्वम्'** इति ।। एवञ्च नातिव्याप्तिः । तथाहि - रूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वं यद्यपि कालेऽस्ति । परन्तु समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयता केति चेत्? स्पर्शे किलाधेयताद्वयं वर्तते । एका 'गुणवान्' इति प्रतीतिसिद्धा चतुर्विंशतिगुणसाधारणी स्पर्शनिष्ठाधेयता । एवं 'स्पर्शवान्' इति प्रतीतिसिद्धा स्पर्शत्वावच्छिन्नस्पर्शमात्रनिष्ठाधेयताप्यन्या वर्तते । तत्र गुणत्वावच्छिन्न-स्पर्शनिष्ठाधेयतायाः स्वीकारे तु 'गुणवान्' इति प्रतीतिसिद्धाधेयता भवति। लक्षणे तु स्पर्शत्वावच्छिन्नत्वस्य निवेशनात् समवायसम्बन्धावच्छिन्नस्पर्श-त्वावच्छिन्नस्पर्शनिष्ठाधेयता केति चेत्? 'स्पर्शवान्' इति प्रतीतिसिद्धस्पर्शमात्र-निष्ठाधेयतैव भवति, न तु 'गुणवान्' इति प्रतीतिसिद्धाधेयता । तादृशाधेयता-निरूपिताधिकरणत्वं तु वायावेव वर्तते, न तु काल इति नातिव्याप्तिः ।।

नन्वेवमपि **'उत्पन्नं द्रव्यम्'** इत्यादिन्यायात् उत्पत्तिक्षणावच्छिन्ने वायौ स्पर्शस्याभावात् समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठा-धेयतानिरूपिताधिकरणत्वस्याभावादव्याप्तिरिति चेत्, न ।**'रूपनिष्ठ-**

आलोक-व्याख्या

प्रतियोगितानिरूपकाभावश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणता वद्वृत्तिजातिमत्वस्यैव लक्षणत्वात् । तथा च समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्न-स्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावान् वायुः, तद्वृत्तिर्जातिः— वायुत्वरूपा जातिः, तादृशजातिमत्त्वमुत्पत्तिक्षणावच्छिन्ने वायावपि वर्तते, जातेर्नित्यत्वात् । अतो नाव्याप्तिः ।।

अथैवमपि आकाशादावतिव्याप्तिः, समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावान् वायुः, तद्वृत्तिर्जातिः केति चेत् ? द्रव्यत्वजातिरपि, वायौ द्रव्यत्वसत्त्वात् । तद्वत्त्वमाकाशादौ वर्तते, रूपाभावोऽपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । जातौ द्रव्यत्वव्याप्यत्वस्य विशेषणात् । तथा च लक्षणम्—**'रूपनिष्ठप्रतियोगितानिरूपकाभावश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं** पर्यवसन्नम् । एवं सति समवायसंबन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्या जातिर्वायुत्वजातिरेव, न तु द्रव्यत्वजातिः । स्वस्य स्वव्याप्यत्वाभावात् । वायुत्वजातेराकाशादावभावान्नातिव्याप्तिः ।।

नन्वेवमपि तादृशद्रव्यत्वव्याप्यजातिपदेन प्राणत्वजातेः स्वीकारे, तादृशजातिमत्त्वमितरवायुषु नास्तीत्यव्याप्तिरिति चेन्न, द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वविवक्षणात् । तथा च लक्षणम्—**'रूपनिष्ठ-प्रतियोगितानिरूपकाभावश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्** इति ।। तथा च प्राणत्वं तु द्रव्यत्वव्याप्यव्याप्यजातिः, न तु द्रव्यत्वसाक्षाद्व्याप्या जातिः । तादृशी तु वायुत्वजातिरेवेति नाव्याप्तिः।।

आलोक-व्याख्या

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः पृथिव्यादावतिव्याप्तिर्दुर्वारा । तथाहि--यद्यपि पृथिव्यां समवायसम्बन्धेन रूपस्य विद्यमानत्वेऽपि संयोगसम्बन्धेन रूपस्याभावात् रूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमपि वर्तत इति लक्षणस्य पृथिव्यामतिव्याप्तिरिति चेत्, न । रूपनिष्ठप्रतियोगितायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम् - **समवायसम्बन्धावच्छिन्नरूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् ।** एवञ्च नातिव्याप्तिः । तथाहि - समवायसम्बन्धावच्छिन्नरूपनिष्ठप्रतियेगिता केति चेत् ? 'वायौ रूपं नास्ति' इति प्रतीतिसिद्धा प्रतियोगिता । पृथिव्यां समवायसम्बन्धावच्छिन्नरूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वं नास्ति । समवायेन तत्र रूपस्य विद्यमानत्वात् । किन्तु तत्र विद्यमाना प्रतियोगिता संयोगसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना । पृथिव्याम् 'संयोगेन रूपं नास्ति' इति प्रतीतेः संभवेऽपि 'रूपं नास्ति' इति प्रतीतेरसंभवात् । अतः समवायसम्बन्धावच्छिन्नरूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तु वायावेव वर्तत इति पृथिव्यां नातिव्याप्तिः।।

नन्वेवं सत्यपि पुनः पृथिव्यामतिव्याप्तिर्दुष्परिहरा । तथाहि--पृथिव्यां सप्तविधरूपं वर्तते । नीलरूपं पीतरूपं रक्तरूपमित्यादि । अतस्तादृशनीलरूपविशिष्टस्य घटस्य स्वीकारे तत्र पीतरूपात्यन्ताभावो वर्तते । पीतघटे नीलात्यन्ताभावो वर्तते । समवायसम्बन्धेनैव पीतघटे

आलोक-व्याख्या

नीलात्यन्ताभावो वर्तते । अतः समवायसम्बन्धावच्छिन्नरूपनिष्ठप्रतियोगिता केति चेत् ? पीतघटे नीलरूपं नास्तीति प्रतीतिसिद्धा प्रतियोगिता । तादृशप्रतियोगितानिरूपकाभावाश्रयत्वं पीतघटरूपपृथिव्यामपि वर्तते । एवं च समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरण-तावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपृथिवीत्वजातिमत्त्वमपि पीतघटे वर्तत इति अतिव्याप्तिरिति चेत्, न । रूपनिष्ठप्रतियोगितायां रूपत्वावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम्--**समवायसम्वन्धावच्छिन्नरूपत्वाव-च्छिन्नरूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वे सति, समवायसंवन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिता-धिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् ।** एवञ्च नातिव्याप्तिः। तथाहि - समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठा प्रतियोगिता केति चेत् ? 'वायौ रूपं नास्ति' इति प्रतीतिसिद्धरूपसामान्यनिष्ठा प्रतियोगिता। पीतघटे 'रूपं नास्ति' इति प्रतीतेरसंभवेन समवायसम्बन्धाव-च्छिन्नरूपत्वावच्छिन्नरूपनिष्ठा प्रतियोगिता तत्र न भवति । पीतघटे नीलरूपं नास्तीति प्रतीतिसिद्धाभावीया नीलरूपनिष्ठा प्रतियोगिता तु नीलरूपत्वावच्छिन्ना, न तु रूपत्वावच्छिन्ना । अतः पीतघटे यद्यपि नीलरूपत्वावच्छिन्ननीलरूपनिष्ठ-प्रतियोगितानिरूपकाभावाश्रयत्वं वर्तते । अथापि तत्र पीतरूपस्य सत्त्वात् रूपत्वावच्छिन्नरूपनिष्ठप्रतियोगितानिरूपकाभावाश्रयत्वं नास्ति, पीतरूपस्य सत्त्वात् । अतः समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठप्रतियोगिता केति चेत् ? रूपं नास्तीति प्रतीतिसिद्धा रूपसामान्यनिष्ठा प्रतियोगिता । तादृशप्रतियोगितानिरूपकाभावाश्रयत्वम् एवं समवायसम्बन्धावच्छिन्नस्पर्शत्वाव-च्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं च (वायुत्वजातिमत्त्वम्) वायावेव वर्तते, न तु पृथिव्यामिति नातिव्याप्तिः।।

आलोक-व्याख्या

नन्वेवमपि रूपत्वावच्छिन्नरूपनिष्ठप्रतियोगितानिरूपकाभावः कः ? इति चेत्, 'रूपघटोभयं नास्ति' इति प्रतीतिसिद्धो रूपघटोभयाभावोऽपि । तत्र प्रतियोगितावच्छेदकता रूपत्वे, घटत्वे, उभयत्वे च वर्तते । अतः प्रतियोगिता रूपत्वावच्छिन्ना भवत्येव । तादृशप्रतियोगितानिरूपकाभावाश्रयत्वे सति स्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्व-साक्षाद्व्याप्यपृथिवीत्वजातिमत्त्वस्यापि घटादौ सत्त्वात्, घटादौ रूपसत्त्वेऽपि घटे घटाभावात् , एकसत्त्वेऽपि द्वयं नास्तीति नियमेन 'रूपघटोभयं नास्ति' इति प्रतीतेः प्रामाणिकत्वाद्घटादावुक्तलक्षणस्यातिव्याप्तिर्दुष्परिहरेति चेत्, न । प्रतियोगितावच्छेदकतायां पर्याप्तेर्निवेशनात् । तथा च **रूपत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभावाश्रयत्वे सति स्पर्शत्वा-वच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वं** वायोर्लक्षणम् । एवञ्च 'रूपघटोभयं नास्ति' इति प्रतीतिसिद्धा-भावीयप्रतियोगितावच्छेदकताया रूपत्वघटत्वोभयत्वेषु त्रिषु पर्याप्तत्वात् रूपत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभावो रूपाभाव एव भवति, न तु रूपघटोभयाभाव इति नातिव्याप्तिः ।।

अथैवमपि प्रत्येकापर्याप्तस्य समुदायपर्याप्तत्वासंभवात् उक्तोभया-भावीयप्रतियोगितावच्छेदकतायाः प्रत्येकं पर्याप्तृत्वेन रूपत्वेऽपि सा पर्याप्तैवेति, रूपघटोभयाभावोऽपि रूपत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभावो भवत्येवेति अतिव्याप्तिस्तदवस्थैवेति चेत्, न । रूपत्वमात्रपर्याप्तावच्छेदकता-कप्रतियोगिताकाभावश्रयत्वनिवेशनात् । एतादृशस्त्वभावः 'रूपं नास्ति' इति प्रतीतिसिद्धाभाव एव, न तूभयाभावः । उभयाभावीयप्रतियोगितायास्त्रिषु पर्याप्तत्वेन रूपत्वमात्रपर्याप्तत्वाभावान्नोभायाभावः स्वीकर्तुं शक्यत इति नातिव्याप्तिः। अधिकमन्यत्र ।। तथा च— **समवायसंबन्धा-वच्छिन्नरूपत्व-**

आलोक-व्याख्या

मात्रपर्याप्तावच्छेदकताकप्रतियोगिताकाभावाश्रयत्वे सति स्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वायोर्लक्षणम् इत्याद्यूह्यम् ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनरुत्पत्तिकालावच्छिन्ने घटेऽतिव्याप्तिर्दुर्वारा । **'उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठति'** इति नियमात् उत्पत्तिकालावच्छिन्ने घटे रूपसामान्याभावात् समवायसम्बन्धावच्छिन्नरूपत्वमात्रपर्याप्तावच्छेदकताकप्रतियोगिताकाभावाश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वर्तते । अतस्तत्र उत्पत्तिकालावच्छिन्नघटरूपपृथिव्यामतिव्याप्तिर्दुर्वारिति चेत्, न । 'रूपरहितः' इत्यस्य दलस्य जातिघटितपरिष्कारात् । केवलरूपशून्यत्वं न लक्षणं, किन्तु रूपसमानाधिकरणजातिशून्यत्वमिति लक्षणम् । रूपसमानाधिकरणजातिशून्यत्वं नाम - रूपनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिजातिशून्यत्वम् । तथा च लक्षणम् -- **समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिजातिशून्यत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् ।** तथा च नातिव्याप्तिः । तथाहि - समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठाधेयतानिरूपिताधिकरणतावान् कः? इति चेत्, द्वितीयादिक्षणावच्छिन्नो घटोऽपि भवति । तद्वृत्तिर्या जातिरिति चेत् ? पृथिवीत्वजातिरेव । तादृशजातिमत्त्वमेव वर्तत उत्पत्तिकालावच्छिन्ने घटे । तत्र रूपसमानाधिकरणजातिशून्यत्वाभावात् । रूपसमानाधिकरणजातिशून्यत्वं (पृथिवीत्वादिजातिशून्यत्वं) तु वायावेव वर्तत इति पृथिव्यां लक्षणासमन्वयान्नातिव्याप्तिः ।।

आलोक-व्याख्या

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः असंभवरूपदोषो दुर्निवारः । तथाहि-समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठाधेयतानिरूपिताधिकरणतावान् घटः । तद्वृत्तिर्या जातिरिति चेत्, यथा पृथिवीत्वजाति; तथा द्रव्यत्वजातिः सत्ताजातिश्च । तादृशजातेः स्वीकारे तादृशजातिमत्त्वमेव वायौ वर्तते, जातिशून्यत्वं नास्तीति लक्षणस्यासमन्वयात् असंभवो दोष इति चेत्, न । जातौ द्रव्यत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्यजातिशून्यत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् ।** एवञ्च नासंभवः । तथाहि-- समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठाधेयतानिरूपिताधिकरणतावान् घटः । तद्वृत्तिर्या द्रव्यत्वव्याप्या जातिरिति चेत् ? सत्ताजातिर्न भवति, तस्या द्रव्यत्वव्यापकत्वेन द्रव्यत्वव्याप्यत्वाभावात् । एवं द्रव्यत्वजातिरपि न भवति । स्वस्य स्वव्याप्यत्वाभावात्। अतो द्रव्यत्वव्याप्या जातिरिति चेत् पृथिवीत्वादिजातिः स्वीकर्तव्या । तादृशजातिशून्यत्वं वायौ वर्तत एव । एवं समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्या (वायुत्व)जातिरपि वर्तत इति लक्षणसमन्वयात् नासंभवः ।।

अथैवमपि समवायसंबन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्यपटत्वजातिशून्यत्वस्य समवायसंबन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपृथिवीत्वजातिमत्त्वस्य च घटादौ सत्त्वात्पुनः घटादावतिव्याप्तिरिति चेत्, न । द्रव्यत्वसाक्षाद्व्याप्यजातिशून्यत्वस्य विवक्षणात् । पटत्वं तु, न

स द्विविधः । नित्योऽनित्यश्चेति । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः । शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् । तच्च सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुर्वायुः, शरीरान्तस्संचारी वायुः प्राणश्च । स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते ।

शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यं च ।

आलोक-व्याख्या

द्रव्यत्वसाक्षाद्व्याप्यजातिः, तस्या द्रव्यत्वव्याप्यव्याप्यत्वात् । किन्तु पृथिवीत्वादिरेव । तच्छून्यत्वं घटादौ नास्तीति नातिव्याप्तिः । वायौ तु तच्छून्यत्वं वर्तत एवेति लक्षणसमन्वय इति दिक् । तथा च वायोर्निष्कृष्टं लक्षणम् — **समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नरूपनिष्ठाधेयतानिरूपिताधिकरणता वद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिशून्यत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नस्पर्शनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्** इति ॥ अत्र रूपसमानाधिकरणजातिशून्यत्वं वा रूपानधिकरणवृत्तिजातिमत्त्वं वा, किं विवक्षितम् ? इत्यादिकं तु कुशाग्रमतिभिः स्वयमूह्यम् ॥

उपाधिभेदात् - हृदयादिशरीरावयवभेदात् । **'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानस्सर्वशरीरगः।।'** इत्याद्यत्र द्रष्टव्यम् । प्राणशब्दः पञ्चवायुसाधारणः 'पञ्च प्राणाः' इत्यादिप्रसिद्धेः । एवं वायुविशेषवाची च 'प्राणापान'इत्यादावपि प्राणस्य पाठात्।।

आकाशं लक्षयति - **शब्दगुणकमिति** । शब्दो गुणो यस्मिन्, तत् इति शब्दगुणकम् । 'यस्मिन्' इत्यत्र यच्छब्दस्याकाशमर्थः । सप्तम्या अधिकरणत्वमर्थः। प्रकृत्यर्थस्याकाशस्य सप्तम्यर्थाधिकरणतायामाधेयतासम्बन्धेनान्वयः । तथा च आकाशनिष्ठाधिकरणता । सप्तम्यर्थाधिकरणताया

आलोक-व्याख्या

निरूपकतासम्बन्धेन शब्देऽन्वयः। शब्दस्य च गुणेऽभेदसम्बन्धेनान्वयः । तथा च - **आकाशनिष्ठाधिकरणतानिरूपकः शब्दाभिन्नो गुण** इति अखण्डबोधः । **'विग्रहवाक्यात् यादृशविशेष्यविशेषणभावापन्नो वोधो जायते समासादिवृत्तिवाक्यात् तद्विपरीतविशेष्यविशेषणभावापन्नो वोधो जायते'** इति नियमात् पूर्वं विशेषणभूत आकाश इदानीं विशेष्यो भवति । पूर्वं विशेष्यभूतो गुण इदानीं विशेषणं भवति । तथा च - **शब्दाभिन्नगुणनिरूपिताधिकरणताश्रय आकाशः** इति समस्तवाक्याद् बोधः । अथवा - 'यस्मिन्' इत्यत्र यच्छब्दस्य आकाशोऽर्थः । सप्तम्या अधिकरणत्वमर्थः। प्रकृत्यर्थस्याधेयतासम्बन्धेन सप्तम्यर्थाधिकरणतायामन्वयः। तथा च आकाशनिष्ठाधिकरणता । सप्तम्यर्थाधिकरणतायाः स्वनिरूपिताधेयता-श्रयत्वसम्बन्धेन शब्देऽन्वयः । तथा च - **यच्छब्दार्थाकाशनिष्ठाधिकरणता-निरूपिताधेयताश्रयो गुणः शब्दाभिन्न** इति बोधः । **'विग्रहवाक्यात्'** इत्यादिपूर्वोक्तनियमेन **शब्दाभिन्नगुणनिष्ठाधेयतानिरूपिताधिकरणताश्रय आकाश इति** बोधः । अथवा यस्मिन्नित्यत्र सप्तम्या आधेयत्वमर्थः । प्रकृत्यर्थस्य निरूपितत्वसंबन्धेनाधेयतायामन्वयः । आधेयताया आश्रयतासंबन्धेन शब्देऽन्वयः। तथा च **आकाशनिरूपिताधेयताश्रयः शब्दाभिन्नो गुण** इति विग्रहवाक्यबोधः । समासात्तु **शब्दनिष्ठाधेयतानिरूपकमाकाशमिति** बोधः । फलतः सर्वं समानार्थकम् । लक्षणे तु गुणपदनिवेशनस्य प्रयोजनाभावात्, **शब्दनिष्ठाधेयतानिरूपिताधिकरणत्वम्** इत्येव लक्षणम्। शब्दनिष्ठाधेयता केति चेत् ? 'आकाशे शब्दो वर्तते' इति प्रतीतिसिद्धा-धेयता । तादृशाधेयतानिरूपिताधिकरणत्वमाकाशे वर्तत इति लक्षणसमन्वयः।।

नन्वेवं सत्यप्यस्य लक्षणस्य पृथिव्यादावतिव्याप्तिर्दुष्परिहरा । तथाहि -- 'अयं भेरीशब्दः' 'वीणानादः' इत्यादिप्रतीतेः प्रमाणिकत्वात्, 'भूतले

आलोक-व्याख्या

घटः' इत्यादाविव 'भेर्याम्' इत्यत्र सप्तम्या अधिकरणत्वार्थकत्वेन शब्दस्य भेर्यादिपृथिवीधर्मत्वसिद्ध्या शब्दनिष्ठाधेयता केति चेत् 'भेर्यां शब्दो जायते' इति प्रतीतिसिद्धाधेयता । तादृशाधेयतानिरूपिताधिकरणत्वं भेरीरूप-पृथिव्यामपि वर्तत इति पृथिव्यामतिव्याप्तिः। एवम् 'इदानीं शब्दः' इति प्रतीत्या कालस्य सर्वाधारत्वेन पूर्ववत् कालेऽप्यतिव्याप्तिरिति चेत्, न । शब्दनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम्— **समवायसम्बन्धावच्छिन्नशब्दनिष्ठाधेयतानिरूपिताधिकरणत्वम्** इति । तथा च नातिव्याप्तिः । तथाहि - समवायसम्बन्धावच्छिन्नशब्दनिष्ठाधेयता का ? इत्युक्तौ 'शब्दवदाकाशम्' इति प्रतीतिसिद्धाधेयता । 'भेर्यां शब्दो वर्तते' इति प्रतीतिसिद्धाधेयता, न समवायसम्बन्धावच्छिन्ना । किन्तु स्वसमवायिसंयुक्तत्वसम्बन्धावच्छिन्ना । स्वम् - शब्दः । स्वसमवायि = आकाशम् । तत्संयोगो भेर्यां वर्तत इति शब्दविशिष्टाकाशसंयोगात् 'भेर्यां शब्दः' इति व्यवहारः, ' जले गन्धः' इत्यादिव्यवहारवत् । अतस्तत्र विद्यमानाधेयता स्वसमवायिसंयुक्तत्वसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना । कुत इति चेत् ? गुणगुणिनोरेव समवायात्। शब्दस्य आकाशगुणत्वात् । अतः तादृशसमवायसम्बन्धावच्छिन्नशब्दनिष्ठाधेयतानिरूपिताधिकरणत्वं तु आकाशे वर्तते, न तु भेरीरूपपृथिव्यामिति तत्र नातिव्याप्तिः । एवं काले कालिकसंबन्धावच्छिन्नशब्दनिष्ठाधेयतानिरूपिताधिकरणत्वमेव, न तु समवायसंबन्धावच्छिन्नशब्दनिष्ठाधेयतानिरूपिताधिकरणत्वमिति काले नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनर्जलादावतिव्याप्तिर्दुष्परिहरा । तथाहि -- शब्दः कश्चन गुणः । तथा च शब्दनिष्ठाधेयता गुणत्वावच्छिन्नाऽपि भवति । एतादृशगुणत्वावच्छिन्नशब्दनिष्ठाधेयता केति चेत् ? 'गुणवत्'

आलोक-व्याख्या

इति प्रतीतिसिद्धा चतुर्विंशतिगुणसाधारणी एकैवाखण्डाधेयता । तादृशाधेयता यथा शब्दे वर्तते तथा स्पर्शादावपि वर्तते । अतः स्पर्शादिनिष्ठाधेयतानिरूपिताधिकरणत्वं जलादिष्वपि वर्तत इति तत्रातिव्याप्तिरिति चेत्, न । शब्दनिष्ठाधेयतायां शब्दत्वावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम् --- समवायसम्बन्धावच्छिन्नशब्दत्वावच्छिन्नशब्दनिष्ठाधेयतानिरूपिताधिकरणत्वम् । एवञ्च नातिव्याप्तिः । तथाहि - समवायसम्बन्धावच्छिन्नशब्दत्वावच्छिन्नशब्दनिष्ठाधेयता केति चेत्, तत्र आधेयताद्वयं वर्तते । एका गुणत्वावच्छिन्नशब्दनिष्ठा चतुर्विंशतिगुणसाधारणी 'गुणवत्' इति प्रतीतिसिद्धाधेयता । एवं शब्दत्वावच्छिन्नशब्दमात्रनिष्ठाधेयता 'शब्दवत्' इति प्रतीतिसिद्धाधेयता चापरा । लक्षणे तु 'शब्दवत्' इति प्रतीतिसिद्धा शब्दमात्रनिष्ठा शब्दत्वावच्छिन्नाधेयता निविष्टा । अतः तादृशसमवायसम्बन्धावच्छिन्नशब्दत्वावच्छिन्नशब्दनिष्ठाधेयता केति चेत् 'शब्दवत्' इति प्रतीतिसिद्धाधेयता, न तु 'गुणवत्' इति प्रतीतिसिद्धाधेयता । तादृशाधेयतानिरूपिताधिकरणत्वं तु आकाश एव वर्तते, नान्यत्र कुत्राऽपीति जले नातिव्याप्तिः। आकाशादेर्नित्यत्वादेकत्वाच्चात्र लक्षणे जातिघटितपरिष्कारावश्यकता नास्ति ।।

न चात्र मध्ये गुणपदं निवेश्य लक्षणं वक्तव्यम् । किन्तु शब्दनिष्ठाधेयतानिरूपिताधिकरणत्वमात्रोक्तौ पर्याप्तम् । आकाशे शब्द एक एव विशेषगुण इति द्योतनार्थम्, गुणपदस्य विशेषगुणपरत्वाभिप्रायेण उक्तत्वात्। तेन शब्दाश्रयतया आकाशसिद्धिरित्यादिकमन्यत्र द्रष्टव्यम् । अथवा ये मीमांसकाः शब्दस्य द्रव्यत्वमङ्गीकुर्वन्ति तन्मतनिराकरणार्थम् । शब्दो न द्रव्यं, किन्तु गुण एव, इति ज्ञापनार्थं गुणपदम् । अतो लक्षणे गुणपदं नावश्यकम् ।।

अतीतादिव्यवहारहेतुः कालः । स चैको विभुर्नित्यश्च ।

आलोक-व्याख्या

एकम् - एकत्वसंख्याविशिष्टम् । अत एव— **विभु,** जगति सर्वत्रापि शब्दोत्पत्तिदर्शनात् , अपरिच्छिन्नपरिमाणवत् । अत एव **नित्यं च** - मध्यमपरिमाणवत एव लोके नाशदर्शनात् । आकाशस्यैकत्वेऽपि घटाद्युपाधिभेदादेव घटाकाशम् , मठाकाशम् इत्यादिभेदव्यवहारः । एवं कर्णविवरावच्छिन्नमाकाशं श्रोत्रेन्द्रियमित्युच्यते । तच्च शब्दग्राहकम् । एवं पञ्चेन्द्रियाणि पाञ्चभौतिकानि । 'नीलं नभः' इति प्रतीतिर्भ्रान्तिरेव, समीपे पुरतस्तथादर्शनात् ।।

कालं लक्षयति-- **अतीतादीति** । अतीतादीनां व्यवहारः अतीतादिव्यवहारः। अतीतादिव्यवहारस्य हेतुः अतीतादिव्यवहारहेतुरित्युभयत्र षष्ठीतत्पुरुषसमासः । आदिपदेन भविष्यद्वर्तमानयोरपि ग्रहणं कर्तव्यम् । अतीतादीनामित्यत्र षष्ठ्या विषयत्वमर्थः। प्रकृत्यर्थस्यातीतादेः षष्ठ्यर्थविषयतायामाधेयतासम्बन्धेनान्वयः । तथा च अतीतादिनिष्ठविषयता इति बोधः । **व्यवहारो नाम ज्ञानजनकशब्दप्रयोगः** । षष्ठ्यर्थविषयतायाः व्यवहारपदार्थैकदेशे ज्ञाने निरूपकतासम्बन्धेन अथवा स्वनिरूपितविषयितावत्त्वसम्बन्धेनान्वयः । तथा च अतीतादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगः अथवा अतीतादिनिष्ठविषयतानिरूपितविषयिताश्रयज्ञानजनकशब्दप्रयोग इति बोधः । अतीतादिव्यवहारस्य हेतुरित्यत्र षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्य ज्ञानजनकशब्दप्रयोगस्य षष्ठ्यर्थकार्यतायामाधेयतासम्बन्धेनान्वयः । तथा च अतीतादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता इत्यासीत् । हेतुर्नाम कारणतावान् । षष्ठ्यर्थकार्यतायाहेत्वर्थैकदेशे कारणतायां निरूपितत्वसम्बन्धेनान्वयः। तथा च— अतीतादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपित-कारणतावानित्यासीत्।

आलोक-व्याख्या

आदित्य चाखण्डबोधः - **'अतीतादिनिष्ठविषयता (निरूपित-विषयिताश्रय)निरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपित-कारणताश्रयः (कारणतावदभिन्नः) कालः'** इति ॥ **अतीतादिनिष्ठ-विषयतानिरूपक(विषयतानिरूपितविषयिताश्रय)ज्ञानजनकशब्द-प्रयोगनिष्ठकार्यतानिरूपितकारणत्वं** कालस्य लक्षणम् ॥

अस्य लक्षणस्य 'अतीतो घटः' इत्यत्र समन्वयः । 'अतीतः' इत्यत्र **'व्यवहारे व्यवहर्तव्यस्य कारणत्वम्'** इति नियमानुरोधेन अतीतादिविषयकव्यवहारे 'अतीतः' इति अतीतत्वरूपकालज्ञानमावश्यकम्। अतस्तादृशातीतादिनिष्ठविषयतानिरूपकम् किं ज्ञानमिति चेत् ? 'अतीत' इत्याकारकज्ञानम् । तादृशज्ञानजनकशब्दप्रयोगनिष्ठकार्यता केति चेत् ? अतीतादिव्यवहारनिष्ठकार्यता । तादृशकार्यतानिरूपितकारणत्वं काले वर्तत इति लक्षणसमन्वयः ॥

नन्वेवं सत्यप्यस्य लक्षणस्येश्वरादावतिव्याप्तिर्दुष्परिहरा । तथा हि **'कार्यसामान्यं प्रति कालेश्वरादृष्टादीनां कारणत्वम्'** इति नियमानुसारेण अतीतादिनिष्ठविषयतानिरूपितज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपित-कारणत्वमीश्वरादावप्यस्तीति ईश्वरादावतिव्याप्तिरिति चेत्, न । कार्यतानिरूपितकारणतायाम् 'असाधारण' दलस्य विशेषणात् । तथा च लक्षणम् - **अतीतादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोग-निष्ठकार्यतानिरूपितासाधारणकारणत्वम्** । एवञ्च नातिव्याप्तिः । तथाहि कारणं हि साधारणकारणम्, असाधारणकारणमिति द्विविधम् । कालेश्वरादृष्टादयः साधारणकारणानि । इतराणि दण्डचक्रसलिलादीनि घटादौ असाधारण-कारणानि । अतीतादिव्यवहारे अतीतादिविषयकातीतत्वरूपकालोऽ-साधारणकारणम् । ईश्वरादीनां तु तत्र साधारणकारणत्वेन असाधारणकारण-त्वाभावात् नेश्वरादावतिव्याप्तिः ॥

आलोक-व्याख्या

ननु कालादीनां कार्यसामान्यं प्रति साधारणकारणत्वं यदि, तर्हि अतीतादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपिता-साधारणकारणत्वं कथं कालस्य लक्षणमुच्यते, साधारणकारणस्या-साधारणकारणत्वस्य च विरुद्धत्वेनासंभवप्रसङ्गादिति चेत्, न । काले साधारणकारणत्वं तु कार्यसामान्यापेक्षया, असाधारणकारणत्वं तु कालव्यवहारं प्रति कालज्ञानस्यावश्यकत्वात् विशेषापेक्षयेति विरोधाभावात् । यथा हि दण्डादिकं घटादिकं प्रति निमित्तकारणं सदपि स्वगतरूपं प्रति समवायि-कारणमपि भवति । निरूपकभेदेन तद्यथा न विरुद्धं, तथैवात्राप्यदोषात् । कार्यत्वावच्छिन्नकार्यतानिरूपिताकारणता अन्या, अन्या च व्यवहारत्वा-वच्छिन्नकार्यतानिरूपिता कारणतेति ज्ञेयम् ।।

यद्यप्यत्र 'अतीत'पदस्यातीतकालवृत्तिवस्तुपरत्वात्, तादृशव्यवहार-कारणत्वं घटादेरपि वर्तत इति घटादावतिव्याप्तिः । न चातीतपदम् 'कालोऽतीतः' इति व्यवहारात् कालबोधकमेवेति शङ्क्यम्, कालस्य नित्यत्वेन तस्यातीतत्वाभावात्, तादृशव्यवहारस्य घटाद्यौपाधिकत्वात् । तथापि 'अतीत' पदस्यातीतत्वपरत्वात्, **अतीतत्वादिनिष्ठविषयतानिरूपितविषयिताश्रय-ज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणताश्रयत्वस्य** लक्षणत्वेनातिव्याप्त्यभावात् ।।

कालस्यैकत्वेऽपि उपाधिभेदादेवातीतवर्तमानभविष्यत्कालभेदः । 'अस्ति' इति व्यवहारप्रयोजकः कालो वर्तमानः । 'बभूव' इति व्यवहार-प्रयोजको भूतः । 'भविष्यति' इति व्यवहारप्रयोजको भावी । भूते भविष्यति च कालेऽद्यतनानद्यतनत्वादिकमौपाधिकभेदापेक्षम् । वर्तमानस्त्वेक एव । यद्यपि कालोऽतीन्द्रियः; तथाप्युपाधीनां सूर्योदयादीनां प्रत्यक्षत्वात् कालोऽपि प्रत्यक्ष इव भवति । अत एव **'जन्यानां कालोपाधित्वम्'** इत्येव नियमः,

प्राच्यादिव्यवहारहेतुर्दिक् । सा चैका विभ्वी नित्या च ।

आलोक-व्याख्या

नित्यानां भूतभविष्यद्व्यवहारासंभवात् । जन्यानां कालोपाधित्वादेव तेषां खण्डकालरूपत्वम्, उपाध्युपहितयोरभेदोपचारात्,'अशोककालः' इत्यादि-व्यवहारः,'अयो दहति' इतिवत् । अयसः पार्थिवत्वात् स्वतो नहि दाहकत्वम्, किन्तु वह्निनोपहितस्य तप्तायस एव । एवञ्च खण्डकालत्वाज्जन्यानां क्वचित्कालः प्रत्यक्ष इव । अयं न्यायो दिश्यपि समानः । अत एव **'मूर्तानां दिगुपाधित्वम्'** इत्यपि न्यायः ।।

दिशं लक्षयति - **प्राच्यादीति** । प्राच्यादीनां व्यवहार इति प्राच्यादिव्यवहारः । प्राच्यादिव्यवहारस्य हेतुः प्राच्यादिव्यवहारहेतुः । आदिपदेन प्रतीची-उदिची-अवाचीनां ग्रहणं कर्तव्यम् । 'प्राच्यादीनाम् इत्यत्र षष्ठ्या विषयत्वर्थः । प्रकृत्यर्थस्याधेयत्वसम्बन्धेन षष्ठ्यर्थविषयतायामन्वयः । तथा च प्राच्यादिनिष्ठविषयतेति बोधः । 'व्यवहारो' नाम ज्ञानजनकशब्दप्रयोगः। षष्ठ्यर्थविषयताया व्यवहारपदार्थैकदेशे ज्ञाने निरूपकत्वसम्बन्धेनान्वयः । तथा च प्राच्यादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगः इति खण्डबोधः। 'व्यवहारस्य हेतुः' इत्यत्र षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्य षष्ठ्यर्थकार्यतायामाधेयतासम्बन्धेनान्वयः। तथा च ज्ञानजनकशब्दप्रयोगनिष्ठकार्यता इति बोधः । हेतुर्नाम कारणतावतीत्यर्थः । षष्ठ्यर्थकार्यताया निरूपितत्वसम्बन्धेन 'कारणतावतीत्यत्रैकदेशे कारणतायामन्वयः। तथा च ज्ञानजनकशब्दप्रयोग-निष्ठकार्यतानिरूपितकारणतावती (कारणताश्रयः) इति बोधः । **'प्राच्यादिनिष्ठ-विषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणता-वदभिन्ना(कारणताश्रयः) दिक्'** इति अखण्डशाब्दबोधः । लक्षणं तु - **'प्राच्यादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता-निरूपितकारणत्वम्'** इति । अस्य लक्षणस्य 'प्राच्यां घटः' इत्यादौ

आलोक-व्याख्या

समन्वयः । 'प्राच्यां (घटः)' इत्यस्मिन् व्यवहारे व्यवहर्तव्याया दिशः कारणत्वात् प्राच्यादिविषयकव्यवहारे प्राच्यादिरूपदिग्ज्ञानमावश्यकम्। तादृशप्राच्यादिनिष्ठविषयतानिरूपकं किं ज्ञानमिति चेत् ? 'प्राची' इत्याद्याकारकं ज्ञानम् । तज्जनकः 'इयं प्राची' 'इयमवाची' 'इयं प्रतीची' 'इयमुदीची ' इत्याद्याकारकशब्दप्रयोगः । तादृशशब्दप्रयोगरूपव्यवहारनिष्ठकार्यता केति चेत् ? 'इयं प्राची' इत्याद्याकारकप्रतीतिसिद्धा व्यवहारनिष्ठकार्यता । तादृशकार्यतानिरूपितकारणत्वं दिशि वर्तत इति लक्षणसमन्वयः।।

नन्वेवं सत्यपि लक्षणस्यास्येश्वरादावतिव्याप्तिर्दुर्वारा । तथाहि-- कार्यसामान्यं प्रति कालेश्वरादृष्टादीनां कारणत्वात् प्राच्यादिनिष्ठविषयता-निरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितसामान्यकारणत्वमीश्वरादाव-प्यस्तीति अतिव्याप्तिरिति चेत्, न । कार्यतानिरूपितकारणतायाम् 'असाधारण' पदस्य विशेषणात् । तथा च लक्षणम् - **'प्राच्यादिनिष्ठविषयतानिरूपकज्ञान-जनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणत्वम्'** इति । तथा च नातिव्याप्तिः । तथाहि -- दिशि निष्ठं कारणत्वं द्विविधं वर्तते । एकं कार्यसामान्यं प्रति कारणत्वम् । अन्यश्च विषयविधया विशेष (असाधारण)कारणत्वमपि । यद्यपि ईश्वरादीनां कार्यसामान्यं प्रति कारणत्वं वर्तते । किन्तु लक्षणेऽसाधारणकारणत्वस्य निवेशनात् प्राच्यादिव्यवहारं प्रति विषयविधया प्राच्यादिरूपदिश एवासाधारणकारणत्वात्, ईश्वरादीनां सामान्यकारणत्वात्, तत्रातिव्याप्तिः परिहृता भवति । साधारणासाधारण-कारणत्वयोरविरोधादिकं काललक्षणवदेव ज्ञेयम् ।।

सूर्योदयाचलसन्निहिता दिक् प्राची । अत्र 'अचल'पदं पुराणा-नुसारात् । वस्तुतस्तु सूर्योदयप्रदेशावच्छिन्ना दिक् प्राची । अस्तप्रदेशावच्छिन्ना दिक् प्रतीची । 'सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः' इति वचनात्

आलोक-व्याख्या

मेरुपर्वतदेशावच्छिन्ना दिगुदीची । वर्षः = देशः । भूम्या गोलरूपत्वात् । उपरि मध्ये वर्तमानो भागः सर्वेषां देशानामुत्तरभागः, तत्रैव मेरुरपि । मेरो र्व्यवहिता दिगवाची = दक्षिणा । अत्रापि दिगुपाधीनां सूर्योदयादीनां प्रत्यक्षत्वात्, दिशोऽपि प्रत्यक्षत्वभ्रमः । अत एव नूतनदेशगमने दिग्भ्रमोऽपि कदाचित् भवति ।। औपाधिकभेदविषयकविचारः काल इव दिश्यपि समानः। दिगुपाधिरेव देशः । अतश्च **'प्रागादिदेशव्यवहारासाधारणकारणं दिक्'** इत्येव दिशो निष्कृष्टं लक्षणम् ।।

अत्रेदं तत्त्वम् - 'कालेश्वरादृष्टादीनां कार्यसामान्यकारणत्वम्' इत्यत्र 'आदि'पदेन किं ग्राह्यम् ? दिगेकैव । तथा च कालेश्वरादृष्टदिशश्चत्वारः पदार्थाः कार्यसामान्यकारणानि । 'Space,(स्पैच्) Time'(टाइम्)संज्ञकौ दिक्कालावेव कार्यसामान्यकारणान्तर्गताविति सर्वविज्ञानिसंमतम्, दैवज्ञसंमतञ्च। 'एतस्मिन् काले, एतस्मिन् देशे, एतस्य एतादृशं फलं भवतु' इत्याकारकः सृष्ट्यधीशस्य संकल्प एव कार्यसामान्यं प्रति कारणम् । 'एतस्मिन् काले' इति कालः 'एतस्मिन् देशे' इति दिक् च विवक्षिता । दिगुपाधिरेव 'देशः' इत्युच्यते । 'एतस्य' इति चेतनविशेषवाची। तेन चादृष्टविशेषस्यापि कारणत्वं सिद्धम् । 'सृष्ट्यधीशः' इत्यनेनेश्वरः कथ्यते। **'तेन विना तृणाग्रमपि न चलति'** इति न्यायः केनोपनिषत्प्रतिपाद्येन **'ब्रह्म ह देवेभ्यो विजिग्ये'** (केन.२-१-१) इत्याख्यानेन सिद्ध इति कालदिगीश्वरादृष्टानि सर्वकार्यकारणानि। अत एव 'पृथिव्यप्तेजोवाय्वाकाशात्मकपञ्चभूतानि जीवानां भोगोपकरणभूतानि निर्दिष्टानि प्रथमम् । अनन्तरं कालदिशौ निर्दिष्टे । अनन्तरं भोक्ता आत्मा। अन्ते च **'मन एव मनुष्याणां कारणं बन्धमोक्षयोः'** इत्युक्तं सर्वभोगापवर्गव्यवस्थापकं मनो निर्दिष्टमिति वैज्ञानिकोऽयं विभागः । अत एव दशमद्रव्यस्यापि न प्रसक्तिरिति 'सप्तपदार्थाः' इति पदार्थविभागः,

ज्ञानाधिकरणमात्मा ।

आलोक-व्याख्या

'नव द्रव्याणि' इति द्रव्यविभागश्चाविचाल्य एव । गुणक्रियादिविभागास्तु यथासंभवं व्यवस्थाप्याः।।

नित्येन विभुनेश्वरेणैव तत्तदुपाध्यवच्छिन्नेन सर्वनिर्वाह आकाशकालदिशो मा सन्त्वित्यादिकं तु विनगमनाविरहात् ईश्वरनिराकरण एव पर्यवस्येत् । अतस्तत्तद्व्य-वहारस्यासाधारणत्वात्तत्कारणतया सिद्धधर्मिग्राहकप्रमाणसिद्धत्वेन दिक्कालयोर्नान्यथासिद्धिः। आकाशस्तु शब्दसमवायिकारणतया सिद्धः ।।

आत्मनो लक्षणमाह - **ज्ञानाधिकरणम्** इति । ज्ञानस्याधिकरणम् ज्ञानाधिकरणम् इति विग्रहः । 'ज्ञानस्य' इत्यत्र षष्ठ्या आधेयत्वमर्थः । प्रकृत्यर्थस्य ज्ञानस्य षष्ठ्यर्थाधेयतायां निष्ठत्वसम्बन्धेनान्वयः । तथा च ज्ञाननिष्ठाधेयता । अधिकरणं नाम अधिकरणतावान् । षष्ठ्यर्थाधेयताया अधिकरणतावान् इत्यत्रैकदेशेऽधिकरणतायां निरूपितत्वसम्बन्धेनान्वयः । तथा च - ज्ञाननिष्ठाधेयतानिरूपिताधिकरणताश्रयः (अधिकरणतावदभिन्नः) आत्मा । अथवा षष्ठ्या निरूपितत्वमर्थः । निरूपितत्वस्य चाश्रयतासम्बन्धेनाधिकरणतायामन्वयः । तथा च **ज्ञाननिरूपिताधिकरणता(श्रयः)वदभिन्न आत्मेति** बोधः । लक्षणं तु - **ज्ञाननिष्ठाधेयतानिरूपिताधिकरणत्वम्** । लक्षणसमन्वयः - ज्ञाननिष्ठाधेयता केति चेत्? 'अहं जानामि' 'ज्ञानवान् अहम्' इति प्रतीतिसिद्धाधेयता । तादृशाधेयता-निरूपिताधिकरणत्वमहंपदार्थे आत्मनि वर्तत इति लक्षणसमन्वयः ।।

नन्वेवं सत्यपि लक्षणस्यास्य कालादावतिव्याप्तिर्दुष्परिहरा । ज्ञाननिष्ठाधेयता केति चेत् 'इदानीं घटज्ञानवानहम्' इति प्रतीतिसिद्धाधेयता। तादृशाधेयतानिरूपिताधिकरणत्वं कालेऽपि, कालस्य सर्वाधारत्वात् इति तत्राऽतिव्याप्तिरिति चेत्, न । ज्ञाननिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वस्य

आलोक-व्याख्या

विशेषणात् । तथा च लक्षणम् - **'समवायसम्बन्धावच्छिन्न-ज्ञाननिष्ठाधेयतानिरूपिताधिकरणत्वम्'** । तथा च नातिव्याप्तिः । तथाहि -- यद्यपि ज्ञाननिष्ठाधेयतानिरूपिताधिकरणत्वं काले वर्तते । किन्तु तत्र ज्ञाननिष्ठाधेयता कालिकसम्बन्धावच्छिन्ना, न तु समवायसम्बन्धावच्छिन्ना । कुतः ? इति चेत्, गुणगुणिनोः समवायात् । ज्ञानस्यात्मगुणत्वात् । ज्ञानं न कालस्य गुणः । अतः समवायसम्बन्धावच्छिन्नज्ञाननिष्ठाधेयता केति चेत्? 'ज्ञानवानहम्' इति प्रतीतिसिद्धा आधेयता । तादृशाधेयतानिरूपिताधिकरण-त्वमात्मन्येव वर्तते, न तु कालादाविति नातिव्याप्तिः।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनर्घटरूपपृथिव्यामतिव्याप्तिर्दुर्वारा । तथाहि - ज्ञानं कञ्चन गुणः । तथा च ज्ञाननिष्ठाधेयता गुणत्वावच्छिन्नापि भवति । गुणत्वावच्छिन्नज्ञाननिष्ठाधेयता केति चेत् ? 'गुणवान्' इति प्रतीतिसिद्धा चतुर्विंशतिगुणसाधारणी एकैवाखण्डाधेयता । सा समवाय-सम्बन्धावच्छिन्नापि । अतः समवाय-सम्बन्धावच्छिन्नगुणत्वावच्छिन्न-ज्ञाननिष्ठाधेयता यथा ज्ञाने वर्तते तद्वत् गन्धादावपि वर्तते । तादृशाधेयता-निरूपिताधिकरणत्वं घटरूपपृथिव्यामपि वर्तत इति पृथिव्यादावतिव्याप्तिरिति चेत् - न । ज्ञाननिष्ठाधेयतायां ज्ञानत्वावच्छिन्नत्वस्य निवेशनात् । तथा च लक्षणम् - **'समवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नज्ञाननिष्ठाधेयता-निरूपिताधिकरणत्वम्'** । एवञ्च नातिव्याप्तिः । तथाहि--समवायसम्बन्धाव-च्छिन्नज्ञानत्वावच्छिन्नज्ञाननिष्ठाधेयता केति चेत् ? तत्राधेयताद्वयं वर्तते । एका चतुर्विंशतिगुणसाधारणी 'गुणवान्' इति प्रतीतिसिद्धा गुणत्वावच्छिन्ना ज्ञाननिष्ठाधेयता । एवं ज्ञानत्वावच्छिन्ना 'ज्ञानवान्' इति प्रतीतिसिद्धा ज्ञानमात्रनिष्ठाधेयतान्या । तत्र गुणत्वावच्छिन्नज्ञाननिष्ठाधेयतायाः स्वीकारे तु 'गुणवान्' इति प्रतीतिसिद्धाधेयता भवति । लक्षणेऽस्माभिस्तावत् 'ज्ञानवान्'

आलोक-व्याख्या

इति प्रतीतिसिद्धा ज्ञाननिष्ठाधेयता ज्ञानत्वावच्छिन्ना निविष्टा, न तु 'गुणवान्' इति प्रतीतिसिद्धाधेयता । तादृशाधेयतानिरूपिताधिकरणत्वं त्वात्मन्येव वर्तते; न तु घटादिरूपपृथिव्यामिति तत्र नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य सुषुप्तिकालावच्छेदेनात्मन्यव्याप्ति-र्दुष्परिहरा । तथाहि — आत्मनो नित्यत्वाङ्गीकारेऽपि ज्ञानस्यानित्यत्वात् सुषुप्तौ ज्ञाननाशात्, समवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नज्ञाननिष्ठा-धेयतानिरूपिताधिकरणत्वं सुषुप्तिकालिकात्मनि नास्तीत्यव्याप्तिरिति चेत् - न । जातिघटितलक्षणपरिष्कारात् । तथा च लक्षणम् - **'समवायसम्बन्धा-वच्छिन्नज्ञानत्वावच्छिन्नज्ञाननिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्ति-जातिमत्त्वम्'** । एवञ्च नातिव्याप्तिः । तथाहि - समवायसम्बन्धावच्छिन्न-ज्ञानत्वावच्छिन्नज्ञाननिष्ठाधेयतानिरूपिताधिकरणतावान्, यत्रास्माकं ज्ञानमुपलभ्यते तादृशजाग्रदावस्थाविशिष्टात्मा स्वीकार्यः । तद्वृत्तिर्या जातिरिति चेत्, आत्मत्वजातिः। तादृशजातिमत्त्वं सुषुप्तिकालावच्छेदेनात्मन्यपि वर्तत इति लक्षणसमन्वयात् नाव्याप्तिः।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः पृथिव्यादावतिव्याप्तिर्दुष्परिहरा । तथाहि--समवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नज्ञाननिष्ठाधेयतानिरूपिताधि-करणतावान् आत्मा । तद्वृत्तिर्या जातिरिति चेत् ? आत्मत्वजातिर्यथा, तद्वत् द्रव्यत्वजातिरपि भवति। तादृशजातिमत्त्वं पृथिव्यादावपि वर्तत इत्यतिव्याप्तिरिति चेत् - न । जातौ द्रव्यत्वव्याप्यत्वस्य विशेषणात् । तथा च लक्षणम् - **'समवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नज्ञाननिष्ठाधेयता-निरूपिताधिकरणतावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वम्'** । एवञ्च ना-तिव्याप्तिः । तथाहि - समवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नज्ञाननिष्ठाधेयता-निरूपिताधिकरणतावान् आत्मा । तद्वृत्तिर्या द्रव्यत्वव्याप्या जातिरिति चेत्?

स द्विविधः । जीवात्मा परमात्मा चेति । तत्रेश्वरस्सर्वज्ञः परमात्मा एक एव । जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।

आलोक-व्याख्या

आत्मत्वजातिरेव भवति, न तु द्रव्यत्वजातिः । स्वस्य स्वव्याप्यत्वाभावात्। एवं सत्ताऽपि तद्व्याप्यजातिर्न भवति, तस्या द्रव्यत्वव्यापकत्वात् । अतस्तादृशद्रव्यत्वव्याप्या जातिः केति चेत् ? आत्मत्वजातिरेव भवति । तादृशजातिमत्त्वमात्मन्येव वर्तत इति पृथिव्यादौ नातिव्याप्तिः ।।

आत्मपदस्य परमात्मन्यपि प्रयोगात्, तत्पदं जीवपरमात्मसाधारणम्। अत आत्मा द्विविधः - जीवात्मा परमात्मा चेति । **परमात्मा त्वेक एव** । 'तु'शब्दो जीववैलक्षण्यसूचकः । स एव सर्वजगन्नियन्ता यतः, तत 'ईश्वरः' अत एव सर्वज्ञश्च । अत एव एक एव, ईश्वरद्वये परस्परवैमत्यावश्यम्भावात् **'राजद्वयं राज्यविनाशहेतुः'** इति न्यायात् । सर्वांशेऽप्युभयोरैकमत्यान्न विरोधप्रसङ्ग इति यदि, तर्हि द्वितीयवैयर्थ्यम्, एकेनैव सर्वजगन्नियमनादिनिर्वाहात् । अतस्स एक एव । ईश्वरभिन्नत्वे सति चेतनत्वं जीवलक्षणम् । चेतनत्वमात्रोक्तौ ईश्वरे, चेतनत्वानुपादाने घटादौ चातिव्याप्तिः ।।

टिप्पणी

ईश्वरानुमानम् -- ननु ईश्वरसद्भावे किं प्रमाणमिति चेत् , जीवसद्भावे वा किं प्रमाणम्? **'अयमहमस्मि'** इति सर्वेषां स्वविषयकानुभवस्य सत्त्वात् , परमात्मनः अप्रत्यक्षत्वेऽपि स्वात्मनो मानसप्रत्यक्षसिद्धत्वमस्त्येवेति शक्यं वक्तुम्। मन्यन्ते बहवस्तथा, परन्तु देहादेरेव तथा निर्देशात्, तदतिरिक्तात्मनः केनाप्यननुभवात् । योगिनामेव तत्संभवात्। अत एव सूत्रकारोऽपि **'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्'** (न्या.सू-१-१-१०) इत्यात्मनोऽनुमेयत्वमेवाह । स्वात्मनः प्रत्यक्षत्वेऽपि परात्मनोऽप्रत्यक्षत्वात्तथोक्तमिति समादधते केचित्। तर्हि सर्वेऽपि आत्मज्ञानिनो भवेयुः। लेशतो भवेच्चेत्तत्परिणामः कीदृशो भवेदित्यपरिचयादेव तथा वदन्ति ते । वस्तुतः,

आलोक-व्याख्या

तथा च सर्वज्ञत्वमीश्वरलक्षणम् । **जीवस्त्वित्यादि** । अत्रापि 'तु' शब्दो परमात्मवैलक्षण्यसूचकः । तच्च असर्वज्ञत्वरूपम्, अनेकत्वरूपञ्च । जीवानामनेकत्वे कारणं प्रतिशरीरं भिन्न इति । शरीराणि प्रत्यक्षत एव परस्परं भिन्नान्यनन्तानि च । अतस्तत्तच्छरीरावच्छिन्नात्मानोऽप्यनन्ताः । शरीरं

टिप्पणी

इदानीन्तनपण्डितानां शरीरातिरिक्तात्मज्ञानमनुमितिरूपम्, शब्दरूपं वा, न प्रत्यक्ष-रूपम् । एवं स्वस्वरूपज्ञानस्यैवाभावे, ईश्वरसिद्धिः सुतरामनुमानेनैव वक्तव्या ॥

यद्यप्ययं विषयः न्यायशास्त्रसीमातीत एव । अत एव न्यायसूत्रेषु, भाष्ये वा नेश्वरसाधनं दृश्यते । '**इन्द्रियार्थसन्निकर्षोत्पन्नं .....प्रत्यक्षम्**' (न्या.सू.१-१-४.) इत्यादिसूत्रेणैवेदं स्पष्टीकृतम्, ईश्वरीयप्रत्यक्षस्यालक्ष्यत्वाभिप्रायात् । तथापि, ईश्वरनिराकरणव्यग्राणां मुखपिधानस्य वेदैकशरणैर्वेदान्तिभिः कर्तुमशक्यत्वात्, सं भारः तार्किकाणामुपरि अवशात्पतितः । तद्भारं स्वीकुर्वद्भिः न्यायाचार्यैरुदयनैः, तदर्थमेव व्यरचि न्यायकुसुमाञ्जलिनामकः प्रौढो ग्रन्थः । तदनुसारेणेश्वरानुमानं संग्रहेण प्रदर्श्यते **'क्षित्यङ्कुरादिकम् अस्मद्विलक्षणपुरुषकर्तृकम्, अस्मदाद्यकर्तृकत्वे सति सकर्तृकत्वात्'** इति परिशेषानुमानमेव ईश्वरे प्रमाणम् । क्षितिपदं विविध-विचित्ररचनविश्वस्योपलक्षकम् । तत्र निदर्शनतया अङ्कुरमुच्यते । भूमौ प्रतिक्षण-मुत्पद्यमानान्यङ्कुराणि सर्वेऽपि पश्यन्ति । अत्र तादृशः को वा चेतनो दृश्यते। न चैतत् स्वभावादेव भवतीति वक्तुं शक्यम् । तथा कथनं तु पलायनवादायते । पराजयमङ्गीकर्तुमशक्नुवताम् अहंकारिणामयं वाद इत्यर्थः। 'स्वभावः' इत्यत्र 'स्व' शब्दार्थः कः ? तत्तद्वस्त्वेव 'स्व' शब्दार्थ इति यथा - अङ्कुरकारणभूतं बीजमेव स्वशब्दार्थ इति चेत्, बीजं कथमङ्कुरमुत्पादयतीत्येव प्रश्नः । बीजस्यायं स्वभाव इति चेत्, तत्र 'स्व'शब्दस्यार्थः कः? बीजमेवेति चेत्, तत् कथमङ्कुरमुत्पादयतीत्येव प्रश्नः । बीजस्यायं स्वभाव इति कथनेऽन्योन्याश्रयः, आत्माश्रयो वानिवार्यः । एतावता कालेनादृष्टमङ्कुरमिदानीं दृश्यते चेत्, तत् कार्यमेव भवति । कार्यं च लोके

आलोक-व्याख्या

हि सुखदुःखादिभोगकारणम् । सुखदुःखादिकं च प्रतिजीवं विलक्षणं दृष्टम्, प्रतिजीवं पुण्यपापकर्मणां विलक्षणत्वात् । अतश्शरीराण्यपि भिन्नानि, आत्मानोऽपि भिन्नाः । तथा च 'भिन्नाः' इत्यत्र भेदो न शरीरमात्रप्रतियोगिकः, अपितु इतरशरीरावच्छिन्नजीवप्रतियोगिकः । शरीराज्जीवस्य भेदस्तु, शरीरस्य

टिप्पणी

कस्यचित्पुरुषस्य प्रयत्नेनैव भवेदिति घटपटादौ दृष्टम् । अत्र स कः ? इत्येव प्रश्नः। मृत्सलिलादि तत्तत्सामग्रीसंमेलनादेव तद्भवतीति चेत्, मृदादयः किल न चेतनाः । ते कथं चेतनाधिष्ठानमन्तरा कार्यं कुर्युः ? तेषामयं स्वभाव इति चेत्, तत्र स्वपदार्थः कः? अतो बहुदूरं गत्वापि कश्चन चेतनस्सर्वं सुव्यवस्थितं चालयिता वर्तत एवेत्यङ्गीकार्यम्।

ननु भोः! किमियं बिभीषिका । अद्यतना महाविज्ञानिनोऽपि स्वभाववादमेवाङ्गीकुर्वन्ति । किमधिकं वक्तव्यमिति चेत् -- सत्यम्। जानीम एव भवतां कूटस्थम्। तेष्वपि प्राचीना महाविज्ञानिनो नैवमवदन्। आगच्छता कालेनैवायं नास्तिकवादो वर्धमानः परिदृश्यते। अत एव ज्ञायते जगदिदं महते परिवर्तनाय सज्जीभवदस्तीति 'Nature' इत्युच्यमानमेव देववाण्यां स्वभाव इत्युच्यते। स एव प्रकृतिरित्युच्यते। तत्तद्वस्तूनां स्वभावाः खलु परस्परविलक्षणा प्रश्नानर्हा विचित्राश्च दृश्यन्ते । तत्र सर्वत्र स्वभावपदे वर्तमानः स्वपदार्थः यत्रान्ते पर्यवस्येत् , तत्र वर्तमानः पदार्थो न जडः। किन्तु स सर्वघटकः सर्वज्ञः सर्वशक्त ईश्वर इत्युच्यते । अत एव स जीवादत्यन्त-विलक्षणश्च। न हि न्यायदर्शने ईश्वरतुल्यः कश्चिदन्यस्सर्वज्ञः अङ्गीक्रियते । न्यायदर्शनस्यावधिरप्ययमेव । ईश्वरानङ्गीकारस्तु अहङ्कारात्, अज्ञानाद्वा भवेदित्येव परमं रहस्यम् । अहंकारः खलु वक्तुरात्मानं स्वेतरेभ्यस्सर्वेभ्यो व्यावर्त्यमानं स्वमात्रविषयकं करोतीति सर्वेषामनुभवसिद्धम् । एतत् कियदत्यल्पम् ? इति गाढमालोचयतां सुज्ञं भवेत् । एवमत्यल्पस्यास्य जीवस्य ज्ञानं वा कियद् बृहद्भवेत् । एतादृशाहङ्काराज्ञानयोर्नाश एवेश्वरो ज्ञातुं शक्येत क्रमेणेत्येव त्रिकालसत्यम् ॥

अतश्च अस्मिन् ब्रह्माण्डे वर्तमानास्सर्वे अणवो वा विभवो वा पदार्थाः, सर्वे स्वस्वकक्ष्यायां स्थित्वा परस्पराविरोधेन यदधीनास्सदा चलन्ति, स एवान्तिम Nature

आलोक-व्याख्या

पाञ्चभौतिकस्य जडत्वात्, आत्मनश्चाजडत्वस्य 'ज्ञानाधिकरणमात्मा' इति लक्षणकरणेनैव सिद्धत्वात् पृथङ्न वक्तव्यमित्यभिप्रायः । **'प्रतिशरीरं भिन्नः'** इत्यनेन, यद्यच्छरीरं तत्सर्वं तदवच्छिन्नचेतनाधिष्ठितम्, तच्छरीरभिन्नशरीराधिष्ठितचेतनानधिष्ठितं च । एवञ्च भिन्नभिन्नशरीराणामधिष्ठातृतया भिन्नभिन्नजीवानां सिद्धिः। शरीराणामानन्त्याच्च जीवानन्त्यसिद्धिः । तथा च शरीरभेद एव जीवभेदे प्रमाणम् । शरीरभेदश्च सुखदुःखवैलक्षण्यादित्युक्तमेव ।। **'प्रतिग्रामं देवालयोऽस्ति'** इति कथने, ग्रामश्चेद्देवालयः स्यादेवेत्यर्थलाभात्, 'यत्र यत्र ग्रामत्वम्, तत्र सर्वत्र देवालयवत्त्वम्' इति व्याप्तिलाभः । तद्वदत्रापि 'प्रतिशरीरं भिन्नः' इत्यत्रापि शरीराणां भेदन, ग्रामभेदेन देवालयभेदवत् तदवच्छिन्नजीवानामपि भेदः सिद्धः । **विभुरिति**। युगपदेव पादे शिरसि च वेदनानुभवात् जीवानामणुत्वं न युज्यते । मध्यमपरिमाणत्वे चानित्यत्वप्रसङ्गः। जीवानामनित्यत्वे च मोक्षार्थप्रयत्नाद्यनुपपत्तिरिति अर्थात् विभुत्वसिद्धिः । विभुत्वादेव नित्यत्वसिद्धिश्च मध्यमपरिमाणस्यैवानित्यत्वेन व्याप्तेः।।

टिप्पणी

ईश्वर इति ज्ञातव्यम्। अतश्च विलक्षणात् बीजादारभ्य सूर्यचन्द्रादयोऽपि तदधीना एव चलन्तीत्युच्यते ।**'एतस्य वा अक्षरस्य प्रशासने गार्गि'**(बृ.५-८-९) इत्यारभ्य **'यो वा एतदक्षरमविदित्वास्माल्लोकात्प्रैति स कृपणः, अथ य एतदक्षरं विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः'** इत्युपसंहरति भगवती श्रुतिः । एवं विज्ञानस्यान्तिमभूमौ वर्तमानमेवोच्यते **'विज्ञानेनात्मानं वेदयते'**(म.ना.) इत्यत्र । अतश्चास्मदाद्यकर्तृकत्वे सति सकर्तृकत्वादित्युक्तानुमानेनेश्वरसिद्धिः । अधिकमन्यत्र द्रष्टव्यम्। इदं सर्वेषां कथं सुसाध्यमिति चेत्, केनोक्तं सुसाध्यमिति । तर्हि किमुत्तरमिति चेत्, श्रद्धैवेति गृह्यताम् । अन्ततः क्रियतां सत्सङ्गः॥

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च ।

आलोक-व्याख्या

मनसो लक्षणमाह - **सुखादीति** । सुखादीनामुपलब्धिः सुखाद्युपलब्धिः । उपलब्धेः साधनम् - उपलब्धिसाधनम् । 'सुखादीनाम्' इत्यत्र षष्ठ्या विषयत्वमर्थः। प्रकृत्यर्थस्याधेयतासम्बन्धेन षष्ठ्यर्थविषयतायामन्वयः। तथा च सुखादिनिष्ठविषयता । उपलब्धिर्नाम साक्षात्कारः । षष्ठ्यर्थविषयताया उपलब्ध्यर्थसाक्षात्कारे निरूपकतासम्बन्धेनान्वयः । तथा च सुखादिनिष्ठविषयतानिरूपकसाक्षात्कारः । उपलब्धेरित्यत्र षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्य साक्षात्कारस्य षष्ठ्यर्थकार्यतायामाधेयतासम्बन्धेनान्वयः। तथा च साक्षात्कारनिष्ठकार्यता । साधनं नाम - कारणतावत् । षष्ठ्यर्थकार्यताया निरूपितत्वसम्बन्धेन साधनपदार्थैकदेशकारणतायामन्वयः । अथवा षष्ठ्या निरूपितत्वमर्थः । तस्याश्रयतासंबन्धेन कारणतायामन्वयः । तथा च साक्षात्कारनिरूपितकारणताश्रय इति बोधः । तथा च सुखादिसाक्षात्कारनिष्ठकार्यतानिरूपितकारणताश्रयः (कारणतावदभिन्नम्) इन्द्रियत्वाश्रयाभिन्नं मनः इति बोधः । तथा चाखण्डबोधः **'सुखादिनिष्ठविषयतानिरूपक (विषयतानिरूपितविषयिताश्रय) साक्षात्कारनिष्ठकार्यतानिरूपितकारणतावदभिन्नम् इन्द्रियत्वाश्रयाभिन्नं मनः'** । लक्षणम् तु - **सुखादिनिष्ठविषयतानिरूपकसाक्षात्कारनिष्ठकार्यतानिरूपितकारणत्वे सति इन्द्रियत्वम्** । अस्य लक्षणस्य मनसि समन्वयः । तथाहि - सुखादिनिष्ठविषयता केति चेत् ? 'अहम् सुखी' इति प्रतीतिसिद्धा विषयता। तादृशविषयतानिरूपकसाक्षात्कारः कः? इति चेत्, 'अहम् सुखी' इत्याकारकसाक्षात्कारः। तादृशसाक्षात्कारनिष्ठकार्यतानिरूपितकारणत्वे सति

आलोक-व्याख्या

इन्द्रियत्वं मनसि वर्तत इति लक्षणसमन्वयः । इन्द्रियत्वमात्रोक्तौ चक्षुरादावतिव्याप्तिः। अतः 'सुखाद्युपलब्धिसाधनत्वम्' इति विशेषणम् । चक्षुरादीनां बाह्यप्रत्यक्षत्वं प्रत्येव साधनत्वात् सुखाद्युपलब्धिसाधनत्वाभावात् तत्र नातिव्याप्तिः । सुखाद्युपलब्धिसाधनत्वमात्रोक्तौ, आत्मनि अतिव्याप्तिः। सुखादिकं प्रति आत्मनः समवायिकारणत्वात् सुखादिनिष्ठविषयतानिरूपक-साक्षात्कारनिष्ठकार्यतानिरूपिता कारणतात्मन्यपि वर्तत इति अतिव्याप्तिः। अत इन्द्रियत्वं निवेशनीयम् । आत्मन इन्द्रियत्वाभावान्नातिव्याप्तिः ।।

तच्चेत्यादि । आत्मनां भेदस्योक्तत्वात्, तत्तदात्मनां सुखादेर्व्यव-स्थितत्वात्, सुखाद्युपलब्धिसाधनानां मनसामपि व्यवस्थितत्वावश्यम्भावेन मनसामप्यात्मभेदेन भिन्नत्वमावश्यकमित्यर्थः । 'प्रतिशरीरं भिन्न इतिवत् 'प्रत्यात्मं भिन्नम्' इति वक्तुं शक्यत्वेऽपि 'प्रत्यात्मनियतत्वात्' इति कथनं कुत इति चेत् ? शरीरभेदे सत्यप्यात्मभेदः कैश्चिद्वैदान्तिभिर्नाङ्गीक्रियते । एतत्पक्षे मनोभेदोऽपि नावश्यकः, आत्मन एवैकत्वात् । ततश्च मनोभेदस्यात्मभेदाधीनत्वात्, आत्मनां च सुखदुःखादिवैलक्षण्येन भेद आवश्यके प्रत्यात्मं मनोव्यवस्थाया अनिवार्यत्वेन मनोभेदसिद्धिरिति सूचनाय प्रत्यात्मनियतत्वं मनोभेदे हेतुरुक्तः । अत एव मनांस्यप्यनन्तानि । आत्मनो विभुत्वावश्यकताया अनुपदमुक्तत्वात्, मनसोऽपि विभुत्वे विभुद्वयसंयोगासंभवात् मनसो ज्ञानकारणत्वं न स्यात् । विभुद्वयसंयोगाङ्गीकारे आत्ममनस्संयोगस्य ज्ञानकरणस्य सदातनत्वप्रसक्त्या ज्ञानमपि जीवानां सदातनं स्यात् । ततश्च सुषुप्त्यनुपपत्तिः । मध्यमपरिमाणत्वे तु नाशावश्यम्भावात् कदाचिद्ज्ञानाभावोऽपि प्रसज्येत । अतो मनसोऽणुत्वमुक्तम् । न च मनसोऽणुत्वेऽपि आत्मनो विभुत्वेन मनस्संयोग अनिवार्य एवेति कथं सुषुप्त्युपपत्तिरिति वाच्यम्; मनसो विभुत्वे तस्य चलनमप्यसंभवि । अणुत्वे तु शरीरान्तस्सञ्चारस्य

चक्षुर्मात्रग्राह्यो गुणो रूपम् ।

आलोक-व्याख्या

सुवचत्वात्, देशविशेषावच्छेदेनात्मसंयोग एव ज्ञानकारणम्, न तु यत्रकुत्रचिदवस्थितमनस्संयोगो ज्ञानकारणम् इति व्यवस्थायास्सुवचत्वेनात्मविभुत्वमात्रेण न सुषुप्त्यनुपपत्तिः । स च देशविशेषः पुरीतत्संज्ञकनाडीविशेषो वा अन्यो वेति नास्माकमाग्रह इति भावः । एवं परमाणुरूपत्वादेव नित्यम् ।।

ननु तमसोऽतिरिक्तद्रव्यस्य सत्त्वात् कथमेतावन्त्येव द्रव्याणि । 'नीलं तमः' 'गतं तमः' 'आगतं तमः' इत्याद्यनुभवाद्धि तस्य गुणवत्त्वं क्रियावत्त्वं च दृष्टम् । गुणवत्त्वं क्रियावत्त्वं च हि द्रव्यसामान्यलक्षणम् । अतः कथं नवैव द्रव्याणीति चेत्; न । रूपवतः पार्थिवद्रव्यस्य स्पर्शवत्त्वनियमात् । प्रभायां व्यभिचारान्नायं नियम इति चेत्, पार्थिवस्येत्युक्तं नावहितमायुष्मता । अपि च रूपवद्द्रव्यसाक्षात्कारं प्रत्यालोकस्य कारणत्वनियमात् तमसो रूपिद्रव्यत्वे आलोकमन्तरा कथं चाक्षुषत्वम्? अपि च छायाया एव तमस्त्वं प्रत्यक्षसिद्धम् । रात्रिरपि भूमिच्छायैवेति तत्तत्त्वविदः। अतश्च तेजोऽभावतमसोस्समनियतत्वदर्शनात् अन्यतरेणैवोपपत्तेर्नातिरिक्तं तमः। न च तमोऽभाव एव तेजः किं न स्यादिति शङ्क्यम्, उष्णस्पर्शस्याभावपदार्थेऽसंभवात् । नीलरूपं तु भ्रान्तिरेव 'नीलं नभः' इतिन्यायात् । क्रियाऽपि दीपगतैव । अतो नातिरिक्तं तमः । यच्च वेदान्तिभिस्तमसोऽतिरिक्तत्वसाधनम्, तत् त्रिगुणान्तर्गततमश्शब्दसमानत्वबुद्धिकृतम् । वस्तुतस्तु गुणान्तर्गतं तमोऽन्यशास्त्रविषयं, अतीन्द्रियं च । 'नीलं तमः' इति प्रतीतिविषयस्त्वन्यदेव ।।

एवं नवद्रव्याणां निरूपणेन द्रव्यनिरूपणस्य समाप्त्या, अनन्तरं यथाक्रमं गुणनिरूपणे कर्तव्ये सति, प्रथमनिर्दिष्टं रूपं लक्षयति - **चक्षुरित्यादि** । चक्षुरेव चक्षुर्मात्रम् । चक्षुर्मात्रेण ग्राह्यः - चक्षुर्मात्रग्राह्यः ।

आलोक-व्याख्या

चक्षुमत्रिण ग्राह्य इत्यस्य लोके 'चक्षुरिन्द्रियजन्यप्रत्यक्षविषयः चक्षुर्भिन्नेन्द्रिय-जन्यप्रत्यक्षाविषयः' इति बोधोऽनुभवसिद्धः। शाब्दबोधोऽप्येतदनुगुण एव वर्णनीयः । तथा हि -- एवकारस्य भेदवान्, अभावश्चार्थः। चक्षुःपदस्य चक्षुरिन्द्रियमर्थः । तृतीयाया जन्यत्वमर्थः । चक्षुश्शब्दार्थस्य तृतीयार्थजन्यत्वे स्वनिष्ठजनकतानिरूपितत्वसंबन्धेनान्वयः । जन्यताया आश्रयतासंबन्धेन ग्रहधात्वर्थे प्रत्यक्षेऽन्वयः । ण्यत्प्रत्ययस्य विषयतावान् अर्थः । धात्वर्थस्य प्रत्यक्षस्य निरूपितत्वसंबन्धेन विषयत्वेऽन्वयः । विषयतावतोऽभेदसंबन्धेन विशेष्ये रूपेऽन्वयः । तथा च **चक्षुरिन्द्रियनिष्ठजनकता-निरूपितजन्यता-श्रयप्रत्यक्षनिरूपितविषयतावदभिन्नम्** इति बोधः । मात्रपदेन च **चक्षुरिन्द्रियनिष्ठप्रतियोगितानिरूपकभेदवन्निष्ठजनकतानिरूपित-जन्यताश्रयप्रत्यक्षनिरूपितविषयताभाववदभिन्नमिति** बोध्यते । अथवा एतद्दृष्ट्या तु व्युत्पत्तिवैचित्र्याच्छाब्दबोधो वर्णनीयः । चक्षुःपदस्य स्वनिष्ठप्रतियोगितानिरूपकत्वसंबन्धेन मात्रपदार्थैकदेशे भेदेऽन्वयः। तथा च चक्षुरिन्द्रियनिष्ठप्रतियोगितानिरूपकभेदवानर्थः । भेदवतः स्वनिष्ठजनकता-निरूपितत्वसंबन्धेन तृतीयार्थे जन्यत्वेऽन्वयः । तथा च चक्षुरिन्द्रियनिष्ठ-प्रतियोगितानिरूपकभेदवन्निष्ठजनकतानिरूपिताजन्यता इत्यासीत् । जन्यताया आश्रयतासंबन्धेन ग्रहधात्वर्थप्रत्यक्षे, धात्वर्थस्य च निरूपितत्वसंबन्धेन ण्यत्प्रत्ययार्थैकदेशविषयतायाञ्चान्वयः। ण्यत्प्रत्ययार्थविषयतायाः स्वनिष्ठप्रतियोगितानिरूपकत्वसंबन्धेन मात्रपदार्थैकदेशेऽभावेऽन्वयः। विषयत्वाभाववतोऽभेदसंबन्धेन रूपेऽन्वयः । तथा च मात्रपदसमभिव्याहारेण **चक्षुरिन्द्रियनिष्ठप्रतियोगितानिरूपकभेदवदिन्द्रियनिष्ठजनकतानिरूपित-जन्यताश्रयप्रत्यक्षनिरूपितविषयत्वाभाववदभिन्नमिति** बोधः । एवञ्च **चक्षुरिन्द्रियजन्यप्रत्यक्षविषयः, चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयो गुणो**

आलोक-व्याख्या

रूपमिति संग्रहेण निष्कृष्टः शाब्दबोधः । सर्वमिदं लोकानुभवस्वारस्यानुरोधेन व्युत्पत्तिवैचित्र्यान्निर्वाह्यम् ।।

चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति, चक्षुर्भिन्नेन्द्रियजन्य-प्रत्यक्षाविषयत्वे सति गुणत्वं रूपस्य लक्षणम् । चक्षुरिन्द्रियजन्यं यत् प्रत्यक्षम्, 'अयं नीलः' इत्यादिप्रत्यक्षम् । तद्विषयत्वं नैल्यादौ रूपे वर्तते । एवं चक्षुर्भिन्नं यदिन्द्रियं त्वगादीन्द्रियम् । तज्जन्यं प्रत्यक्षम् - 'अयं शीतः' इत्यादिप्रत्यक्षम् । तदविषयत्वं च रूपे वर्तते, गुणत्वं च वर्तत इति लक्षणसमन्वयः । गुणत्वमात्रोक्तौ रसादावतिव्याप्तिः । तदर्थं चक्षुरिन्द्रिय-जन्यप्रत्यक्षविषयत्वं विशेषणम् । रसे चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वा-भावान्नातिव्याप्तिः। एतावन्मात्रोक्तौ घटादावतिव्याप्तिः, तस्य चक्षुरिन्द्रिय-जन्यप्रत्यक्षविषयत्वात् । अतो गुणपदम् । घटादेर्द्रव्यत्वेन गुणत्वाभावा-न्नातिव्याप्तिः । चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वमात्रोक्तौ संख्यादौ चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वस्य गुणत्वस्य च सत्त्वादतिव्याप्तिः । अतश्चक्षु-र्भिन्नेन्द्रियजन्यप्रत्यक्षविषयत्वमुक्तम् । संख्यादौ चक्षुर्भिन्नत्वगिन्द्रियजन्यप्रत्यक्ष-विषयत्वस्यैव सत्त्वेनाविषयत्वाभावान्नातिव्याप्तिः । चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षा-विषयत्वे सति गुणत्वमात्रोक्तौ, गुरुत्वस्यातीन्द्रियत्वेन केनापीन्द्रियेणाग्राह्यत्वात्, चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वस्य गुणत्वस्य च सत्त्वेन गुरुत्वादावतिव्याप्तिः। अतश्चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वविशेषणम् । गुरुत्वस्यातीन्द्रियत्वेन चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वस्य तत्राभावान्नातिव्याप्तिः । गुणत्वानुपादाने, **'येनेन्द्रियेण यद्वस्तु गृह्यते, तेनैवेन्द्रियेण तन्निष्ठा जातिस्तदभावश्च गृह्यते'** इति न्यायात् रूपत्वजातौ; रूपाभावे च चक्षुरिन्द्रियजन्य-प्रत्यक्षविषयत्वस्य, चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वस्य च सत्त्वादतिव्याप्तिः। अतो गुणत्वम् । रूपत्वस्य जातित्वेन तत्र, रूपाभावे च गुणत्वाभावान्ना-तिव्याप्तिः ।।

आलोक-व्याख्या

नन्वेवमपि प्रभाघटसंयोगेऽतिव्याप्तिः, तस्य घटद्वयसंयोगवत् त्वगिन्द्रियग्राह्यत्वाभावात्, चक्षुरिन्द्रियग्राह्यत्वात्, गुणत्वाच्चेति चेत्, न । गुणपदस्य विशेषगुणपरत्वेन, संयोगस्य सामान्यगुणत्वेनातिव्याप्त्यभावात्। न चैवं सति गुरुत्वस्य सामान्यगुणत्वेनानेनैव वारणे चक्षुरिन्द्रियग्राह्यत्वदलं विफलमिति शङ्क्यम्, अतीन्द्रियेऽदृष्टेऽतिव्याप्तिपरिहारेण सार्थक्यात् । अदृष्टस्य चक्षुर्भिन्नेन्द्रियाग्राह्यत्वात् विशेषगुणत्वाच्च । अथैवमपि परमाणुगतरूपस्यातीन्द्रियत्वेन चक्षुरिन्द्रियग्राह्यत्वाभावात् अव्याप्तिरिति चेत्, न । चक्षुरिन्द्रियग्राह्यगुणवृत्तिजातिमत्त्वस्य विवक्षणेन रूपत्वजातिमादायाव्याप्तेः परिहारात् । एवं गुणत्वजातिमादायादृष्टादावतिव्याप्तिपरिहाराय गुणत्वव्याप्य-जातिमत्त्वमपि विवक्षणीयम्। गुणत्वव्याप्यशुक्लत्वादिजातिमादायाव्याप्ति-परिहाराय गुणत्वसाक्षाद्व्याप्यजातिमत्त्वमपि विवक्षणीयम् । नन्वेवं तर्हि रूपत्वरूपाभावयोस्तादृशजातिमत्त्वाभावादतिव्याप्त्यप्रसक्त्या गुणपदं व्यर्थमिति चेत्, न । सूर्यादिगतसंख्यादेश्चक्षुरिन्द्रियमात्रग्राह्यत्वात्, तादृशगुणगतैकत्वत्वा-दिजातिमादायातिव्याप्तिपरिहारार्थं तस्यावश्यकत्वात् । एवमपि मनसो ज्ञानसामान्यं प्रति कारणत्वात् चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षविषयत्वमेव रूपे वर्तते, न त्वविषयत्वमित्यसंभवपरिहारायेन्द्रियपदं बहिरिन्द्रियपरं वक्तव्यमित्यादिक मूह्यम् । तथा च **चक्षुरिन्द्रियजन्यप्रत्यक्षविषयगुणत्वसाक्षाद्व्याप्यजाति-मत्त्वे सति, चक्षुर्भिन्नबाह्येन्द्रिय-जन्यप्रत्यक्षाविषयत्वे सति विशेष-गुणत्वं रूपस्य लक्षणमिति** ।।

एवमपि 'सुरभि चन्दनम्' इत्यादिप्रत्यये चक्षुरिन्द्रियजन्ये सौरभ्यस्यापि ज्ञानलक्षणप्रत्यासत्या (अलौकिकसन्निकर्षेण) भानात्तत्रातिव्याप्तिवारणाय चक्षुरिन्द्रियजन्यप्रत्यक्षनिरूपितलौकिकविषयताश्रयत्वपर्यन्तं विवक्षणीय-मित्यादिकमप्यूह्यम् ।।

तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधम् । पृथिवी-जलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ।

रसनग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषाय-तिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ।

आलोक-व्याख्या

चित्ररूपं तु नानारूपैस्तन्तुभिरारब्धस्य पटादेः प्रत्यक्षत्वार्थम् । नानारूपाणि नानातन्तुनिष्ठानि । पटस्तु तन्तुजन्यस्तन्तुभ्योऽतिरिक्तोऽवयवी-त्युच्यते । अवयवी चैकः । तत्र रूपाभावे पटप्रत्यक्षमेव न स्यात् । चाक्षुषप्रत्यक्षं प्रति रूपस्य कारणत्वात् । अतः पटेऽतिरिक्तं रूपमङ्गीकार्यमित्यतिरिक्तचित्ररूपसिद्धिः । यद्यपि इन्द्रधनुषि दृश्यमानानि रूपाण्येव वास्तवरूपाणि, न तु शुक्लादीनीति केचिद्वदन्ति । परन्तु सर्वव्यवहाराणामनुभवरूपम् ऐन्द्रियकं ज्ञानमेव मूलम् । अयमेव विषयोऽस्य शास्त्रस्य ।।

ननु 'नीलं नभः' इति प्रतीत्याकाशस्यापि रूपं गुण इति पृथिवीजलतेजोमात्रवृत्तित्वं रूपस्य कथमिति चेत् , न । अतिदूरप्रदेशे चक्षुरिन्द्रियाप्रसरणौपाधिकस्तादृशः प्रत्ययः । अन्यथा सन्निहितेऽप्याकाशे तादृशप्रतीतिप्रसङ्गः । ग्रीष्मर्तौ हठाद्बहिःप्रदेशाद्गृहं प्रविष्टानां किल गृहान्तः कृष्णरूपदर्शनं चक्षुरिन्द्रियप्रसरणाभावप्रयुक्तं दृष्टमिति यत्किञ्चिदेतत् ।।

रसं लक्षयति - **रसनेत्यादि** । रसनेन ग्राह्यः = रसनग्राह्यः । 'रसनेन' इत्यत्र रसनपदस्य रसनेन्द्रियमर्थः । तृतीयाया जनकत्वमर्थः । प्रकृत्यर्थस्य रसनेन्द्रियस्य तृतीयार्थजनकतायाम् आधेयतासम्बन्धेनान्वयः । तथा च रसनेन्द्रियनिष्ठजनकता । 'ग्राह्यः' इत्यत्र ग्रहधातोः प्रत्यक्षमर्थः । 'ण्यत्' प्रत्ययस्य विषयतावानर्थः । प्रकृत्यर्थस्य प्रत्यक्षस्य निरूपितत्व-

आलोक-व्याख्या

सम्बन्धेन विषयतायामन्वयः । तृतीयार्थजनकताया ग्रहधात्वर्थैकदेशे प्रत्यक्षे निरूपकत्वसम्बन्धेनान्वयः । अथवा तृतीयाया जन्यत्वमर्थः । प्रकृत्यर्थस्य स्वनिष्ठजनकतानिरूपितत्वसंबन्धेन जन्यतायामन्वयः । जन्यतायाश्चाश्रयता-संबन्धेन प्रत्यक्षेऽन्वयः । तथा च **रसनेन्द्रियनिष्ठ-जनकतानिरूपक (जनकतानिरूपितजन्यताश्रय) प्रत्यक्षनिरूपितविषयताश्रयाभिन्नो गुणत्ववदभिन्नो रस** इति बोधः । लक्षणं तु -- **'रसनेन्द्रियनिष्ठजनकता-निरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयताश्रयत्वे सति गुणत्वम्'**। लक्षणस्यास्य मधुरादिरसे समन्वयः । रसनेन्द्रियनिष्ठजनकतानिरूपित-जन्यताश्रयप्रत्यक्षं किम् ? इति चेत् 'इदमाम्रफलं मधुरम्' इत्याकारक-प्रत्यक्षम् । तादृशप्रत्यक्षनिरूपितविषयत्वं रसे वर्तते । एवं गुणत्वमपि तत्र वर्तत इति लक्षणसमन्वयः । रसनग्राह्यत्वमात्रोक्तौ रसत्वे (जातौ) अतिव्याप्तिः। **'येनेन्द्रियेण या व्यक्तिर्गृह्यते तन्निष्ठा जातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यते'** इति नियमेन रसनेन्द्रियेण रसत्वमपि गृह्यत इति तत्रातिव्याप्तिः। अतो गुणत्वपदोपादानम् । रसत्वं न गुणः, किन्तु जातिरिति नातिव्याप्तिः।।

नन्वेवं सत्यपि लक्षणस्यास्य जलपरमाणुगतरसेऽव्याप्तिर्दुष्परिहरा। तथाहि -जलपरमाणूनामतीन्द्रियत्वात् तद्गतो रसोऽप्यतीन्द्रियः । अतो रसनेन्द्रिय-निष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयत्वं तत्र नास्तीति अव्याप्तिरिति चेत् - न । जातिघटितलक्षणपरिष्कारात् । तथा च लक्षणम् - **रसनेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयतावद्वृत्ति-जातिमत्वम्** । एवञ्च नाव्याप्तिः। तथाहि - रसनेन्द्रियनिष्ठजनकता-निरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयतावान् आम्ररसः। तद्वृत्तिर्या जातिरिति चेत् ? रसत्वजातिः । तादृशजातिमत्त्वं जलपरमाणुगतरसादावपि वर्तत इति लक्षणसमन्वयात् नाव्याप्तिः ।।

नन्वेवं सत्यपि लक्षणस्यास्य पुना रूपादावतिव्याप्तिर्दुष्परिहरा ।

आलोक-व्याख्या

तथाहि - रसनेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयतावद्वृत्तिर्या जातिरिति चेत् ? यथा रसत्वजातिस्तथा गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं रूपादावपि वर्तत इति तत्रातिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **रसनेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** । एवञ्च नातिव्याप्तिः । तथाहि - रसनेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयतावान् रसः । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवति । स्वस्य स्वव्याप्यत्वाभावात् । अतस्तद्व्याप्या जातिः रसत्वजातिरेव भवति । तादृशजातिमत्त्वं रस एव वर्तते, न तु रूपादाविति नातिव्याप्तिः ।।

नन्वेवमप्यस्य लक्षणस्य पुनः मधुररसादावव्याप्तिर्दुष्परिहरा । तथाहि रसनेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयत्ववान् आम्लादिरसः । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत्, यथा रसत्वजातिर्भवति तथाम्लत्वजातिरपि । तादृशाम्लत्वजातिमत्वं मधुररसे नास्तीति अव्याप्तिरिति चेत् - न । गुणत्वव्याप्ये साक्षात्पदस्य निवेशनात् । तथा च लक्षणम् - **रसनेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयतावद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्** । एवञ्च नाव्याप्तिः । तथाहि - रसनेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयतावान् रसः। तद्वृत्तिर्या गुणत्व-साक्षाद्व्याप्या जातिरिति चेत् ? अम्लत्वजातिर्न भवति । तस्य गुणत्वव्याप्यव्याप्यत्वात् । गुणत्वसाक्षाद्व्याप्या रसत्वजातिः । तद्व्याप्या अम्लत्वजातिः । अत अम्लत्वस्य साक्षाद्व्याप्यत्वाभावात् सा जातिर्न स्वीकर्तुं शक्यते । किन्तु रसत्वमेव । तादृशजातिमत्वं मधुरादावपि वर्तत इति नाव्याप्तिः। ननु तर्हि गुणत्वं किमर्थम् ? तादृशजातिमत्त्वस्य रसत्वे

घ्राणग्राह्यो गुणो गन्धः । स द्विविधः । सुरभिरसुरभिश्चेति । पृथिवीमात्रवृत्तिः ।

आलोक-व्याख्या

रसाभावे चासंभवादिति चेत्, न, तात्पर्यग्राहकं तदिति भावनीयम् ।।

निर्मलकावेरीजलादौ विलक्षणं माधुर्यमनुभवसिद्धम् । न च तत् तिक्तलवणाद्यभावमात्ररूपम्, तर्हि गुडेऽपि माधुर्यं न स्यात् । दृश्यते वैलक्षण्यमिति चेदत्रापि समानम् ।।

गन्धं लक्षयति - **घ्राणेति** । घ्राणेन ग्राह्य इति घ्राणग्राह्यः । 'घ्राणेन' इत्यत्र घ्राणपदस्य घ्राणेन्द्रियमर्थः । तृतीयाया जनकत्वं जन्यत्वं वार्थः । प्रकृत्यर्थस्य घ्राणेन्द्रियस्य तृतीयार्थजनकतायाम् आधेयतासम्बन्धेनान्वय इत्यादिकं पूर्ववदेव । 'ग्राह्यः' इत्यत्र ग्रहधातोः प्रत्यक्षमर्थः । ण्यत्प्रत्ययस्य विषयत्वाश्रयोऽर्थः । प्रकृत्यर्थस्य ग्रहधातोः ण्यत्प्रत्ययार्थविषयतायां निरूपितत्वसम्बन्धेनान्वयः । तथा च प्रत्यक्षनिरूपितविषयताश्रयः । तृतीयार्थजनकताया ग्रहधात्वर्थे प्रत्यक्षे निरूपकतासम्बन्धेन अथवा स्वनिरूपितजन्यताश्रयत्वसम्बन्धेनान्वयः । तथा चाखण्डबोधः -- **घ्राणेन्द्रियनिष्ठजनकतानिरूपक(जनकतानिरूपितजन्यताश्रय)प्रत्यक्ष-निरूपितविषयताश्रयो (विषयतावदभिन्नः) गुणाभिन्नो गन्ध** इति । लक्षणं तु— **घ्राणेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपित-विषयताश्रयत्वे सति गुणत्वम्** । घ्राणेन्द्रियनिष्ठजनकतानिरूपित-जन्यताश्रयप्रत्यक्षं किम् ? इति चेत् 'अयं सुरभिगंन्धः' इत्याकारकप्रत्यक्षम्। तादृशप्रत्यक्षनिरूपितविषयता केति चेत् ? 'सुरभिगन्धः' इति प्रतीतिसिद्धा प्रत्यक्षनिरूपिता विषयता । तादृशविषयत्वं सुरभिगन्धे वर्तत इति, एवं गुणत्वमपि वर्तत इति लक्षणसमन्वयः । 'गुणत्व'मात्रोक्तौ रूपादावतिव्याप्तिः। अतो घ्राणेन्द्रियग्राह्यत्वमिति दलोपादानम् । तथा च रूपादीनां गुणत्वे

आलोक-व्याख्या

सत्यपि घ्राणेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयत्वं तत्र नास्ति, किन्तु चक्षुरिन्द्रियग्राह्यप्रत्यक्षविषयत्वं वर्तत इति तत्र लक्षणासमन्वयात् नातिव्याप्तिः । घ्राणेन्द्रियग्राह्यत्वमात्रोक्तौ गन्धत्वेऽतिव्याप्तिर्दुर्वारा । तत्र **'येनेन्द्रियेण या व्यक्तिर्गृह्यते तेनेन्द्रियेण तन्निष्ठा जातिस्तदभावश्च गृह्यते'** इति नियमेन घ्राणेन्द्रियग्राह्यत्वम् (घ्राणेन्द्रियनिष्ठजनकता-निरूपकप्रत्यक्षविषयत्वम्) गन्धत्वेऽपि वर्तत इति तत्रातिव्याप्तिः। तन्निवारणार्थं 'गुण' इतिपदमुपात्तम् । गन्धत्वं न गुणः किन्तु जातिरिति नातिव्याप्तिः।।

नन्वेवं सत्यपि पृथिवीपरमाणुगतगन्धेऽव्याप्तिर्दुष्परिहरा । कथमिति चेत् ? परमाणूनामतीन्द्रियत्वात् तद्गतो गन्धोऽप्यतीन्द्रियः । अतो घ्राणेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयत्वं तत्र नास्तीति लक्षणासमन्वयात् अव्याप्तिरिति चेत्, न । जातिघटितलक्षणपरिष्कारात् । तथा च लक्षणम् - **'घ्राणेन्द्रियनिष्ठजनकता-निरूपितजन्यताश्रय-प्रत्यक्षनिरूपितविषयतावद्वृत्तिजातिमत्त्वम्'** । तथा च नाव्याप्तिः । घ्राणेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयतावान् गन्धः । तद्वृत्तिः का जातिरिति चेत् ? गन्धत्वजातिः । तादृशजातिमत्त्वं पृथिवीपरमाणुगत-गन्धेऽपि वर्तत इति लक्षणसमन्वयात् नाव्याप्तिः ।।

नन्वेवं सत्यपि रूपादावतिव्याप्तिर्दुर्वारा । तथाहि - घ्राणेन्द्रियनिष्ठ-जनकतानिरूपकप्रत्यक्षनिरूपितविषयतावान् गन्धः । तद्वृत्तिर्जातिः केति चेत् यथा गन्धत्वं तथा गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं रूपादावपि वर्तत इति रूपादावतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **घ्राणेन्द्रियनिष्ठजनकतानिरूपक-प्रत्यक्षनिरूपितविषयतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** इति । एवञ्च नातिव्याप्तिः । तथाहि— घ्राणेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्ष-

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः ।

आलोक-व्याख्या

निरूपितविषयतावान् गन्धः । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् गुणत्वजातिर्न भवति । स्वस्य स्वव्याप्यत्वाभावात् । अतो गुणत्वव्याप्या जातिर्गन्धत्वजातिः। तादृशजातिमत्त्वं गन्ध एव वर्तते, न तु रूपादाविति नातिव्याप्तिः ।।

नन्वेवमपि लक्षणस्यास्य 'असुरभिगन्धे' अव्याप्तिर्दुष्परिहरा । तथाहि— घ्राणेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयतावान् सुरभिगन्धः । तद्वृत्तिर्या गुणत्वव्याप्यजातिरिति चेत्, यथा गन्धत्वजातिः, तथा सुरभित्वजातिरपि भवति । तादृशजातिमत्त्वमसुरभिगन्धे नास्तीति पुनरव्याप्तिरिति चेत्, न । गुणत्वव्याप्ये 'साक्षात्' पदस्य निवेशनात् । तथा च लक्षणम् - **घ्राणेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयतावद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्** । एवञ्च नाव्याप्तिः । तथाहि - घ्राणेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्ष[illegible]यतावान् गन्धः। तद्वृत्तिर्या गुणत्वसाक्षाद्व्याप्या जातिरिति चेत् सुरभित्वजातेर्ग्रहणं कर्तुं न शक्यते । तस्य गुणत्वव्याप्यव्याप्यत्वात् । किन्तु गुणत्वव्याप्या गन्धत्वजातिः। तद्व्याप्यत्वमसुरभित्वजातावपि वर्तते । तादृशजातेर्गुणत्वसाक्षाद्व्याप्यत्वं नास्ति। अतस्तन्न स्वीकर्तुं शक्यते । तादृशसाक्षाद्व्याप्यजातिर्गन्धत्वमेव । तादृशगन्धत्वजातिमत्त्वमसुरभिगन्धेऽपि वर्तत इति लक्षणसमन्वयात् नाव्याप्तिः। अत्र गुणपदप्रयोजनादिकं पूर्ववत् । जलवाय्वादौ गन्धप्रतीतिः पार्थिवभागसंबन्धौपाधिकीति पूर्वमेवोक्तम् ।।

स्पर्शं लक्षयति- **त्वगिन्द्रियमात्रेत्यादि** । त्वक्शब्दस्य चर्मण्यपि प्रयोगबाहुल्यात् इन्द्रियपदम् । त्वगिन्द्रियमेव त्वगिन्द्रियमात्रम्, तेन ग्राह्य इति विग्रहः । त्वगिन्द्रियेण इत्यत्र प्रकृतेस्त्वगिन्द्रियमर्थः । तृतीयाया जन्यत्वमर्थः । रूपलक्षणवदेव व्युत्पत्तिवैचित्र्यात्, मात्रपदस्य भेदवान्,

आलोक-व्याख्या

अभावश्चार्थः । त्वगिन्द्रियस्य तृतीयार्थजन्यत्वे, मात्रपदार्थैकदेशभेदे चान्वयः। प्रकृत्यर्थस्य, त्वग्भिन्नेन्द्रियस्य च मात्रपदार्थैकदेशे स्वनिष्ठजनकतानिरूपितत्व-संबन्धेन तृतीयार्थजन्यत्वेऽन्वयः । त्वगिन्द्रियनिष्ठजनकतानिरूपितजन्यता, त्वग्भिन्नेन्द्रियनिष्ठजनकतानिरूपितजन्यता इत्यासीत् । जन्यत्वस्याश्रयतासंबन्धेन ग्रहधात्वर्थप्रत्यक्षेऽन्वयः । ण्यत्रत्ययस्य विषयतावानर्थः । ग्रहधात्वर्थप्रत्यक्षस्य निरूपितत्वसंबन्धेन ण्यत्रत्ययार्थैकदेशविषयतायामन्वयः । विषयतावत-श्चाभेदसंबन्धेन प्रधानविशेष्ये स्पर्शेऽन्वयः । एवं त्वग्भिन्नेन्द्रियनिष्ठजनकता-निरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयत्वस्य मात्रपदार्थैकदेशान्तरेऽभावेऽन्वयः। तथा च **त्वगिन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपित-विषयताश्रयाभिन्नः, त्वग्भिन्नेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रय-प्रत्यक्षनिरूपितविषयत्वाभावाश्रयाभिन्नो गुणाभिन्नः स्पर्शः** इति शाब्दबोधः।।

त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वे सति त्वग्भिन्नेन्द्रियजन्य-प्रत्यक्षाविषयत्वे सति गुणत्वं स्पर्शस्य लक्षणम् । 'अयं शीतः' इत्यादिप्रत्यक्षविषये शीतस्पर्शे त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वस्य, त्वग्भिन्नचक्षुरादीन्द्रियजन्यप्रत्यक्षाविषयत्वस्य गुणत्वस्य च सत्त्वाल्लक्षणसमन्वयः। गुणत्वमात्रोक्तौ रूपादावतिव्याप्तिः । तदर्थं त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वम्। रूपस्य त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वाभावान्नातिव्याप्तिः । तावन्मात्रोक्तौ चक्षुरिन्द्रियवत् त्वगिन्द्रियस्यापि द्रव्यग्राहकत्वात् घटादावतिव्याप्तिः । अतो गुणत्वमुक्तम्। घटस्य द्रव्यत्वेन तत्र गुणत्वस्याभावान्नातिव्याप्तिः । त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वमात्रोक्तौ घटादावतिव्याप्त्यभावेऽपि संख्यादौ त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वस्य गुणत्वस्य च सत्त्वात् अतिव्याप्तिः। तदर्थं त्वग्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वमुक्तम् । संख्यादेस्त्वग्भिन्नचक्षुरिन्द्रिय-

आलोक-व्याख्या

जन्यप्रत्यक्षविषयत्वात्, तादृशप्रत्यक्षाविषयत्वाभावात् नातिव्याप्तिः। त्वग्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति गुणत्वमात्रोक्तौ गुरुत्वादेरतीन्द्रियत्वेन त्वग्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति गुणत्वसत्त्वादतिव्याप्तिः । अतस्त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वम् । गुरुत्वादेरतीन्द्रियत्वेन त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वस्याभावान्नातिव्याप्तिः । गुणत्वानुपादाने **'येनेन्द्रियेण यद्गृह्यते'** इत्यादिन्यायेन स्पर्शत्वस्पर्शाभावयोरतिव्याप्तिः । अतो गुणत्वम् । स्पर्शत्वे स्पर्शाभावे च गुणत्वाभावान्नातिव्याप्तिः ।।

अथैवमप्यन्धकारे घटपटसंयोगस्य चक्षुषाऽग्रहणात्, त्वगिन्द्रियेणैव ग्रहणात्, त्वगिन्द्रियग्राह्यत्वे सति, त्वग्भिन्नेन्द्रियाग्राह्यत्वे सति गुणत्वसत्त्वादतिव्याप्तिरिति चेत्; न । गुणपदस्य विशेषगुणपरत्वेन, संयोगस्य सामान्यगुणत्वेनातिव्याप्तेः परिहारात् । नन्वेवं सति गुरुत्वस्य सामान्यगुणत्वेन विशेषगुणत्वविशेषणेनैवातिव्याप्तिपरिहारात्, त्वगिन्द्रियग्राह्यत्वविशेषणं व्यर्थमितिचेत्, न, अदृष्टस्यातीन्द्रियत्वेन त्वग्भिन्नेन्द्रियाग्राह्यत्वात् विशेषगुणत्वात्, तत्रातिव्याप्तिपरिहाराय तद्विशेषणस्यावश्यकत्वा[illegible]। अथैवं परमाणुगतस्पर्शस्यातीन्द्रियत्वेन त्वगिन्द्रियग्राह्यत्वाभावादव्य[illegible]रिति चेत्, न, त्वगिन्द्रियग्राह्यवृत्तिजातिमत्त्वस्य विवक्षणेन परमाणुस्पशे[illegible]त्वगिन्द्रियग्राह्यस्पर्शादिवृत्तिस्पर्शत्वजातिमत्त्वस्य सत्त्वेनाव्याप्तेः परिहारात्। तादृशस्पर्शवृत्तिगुणत्वजातिमादाय पुना रूपादावतिव्याप्तिवारणाय, गुणत्वव्याप्यजातिमत्त्वम्; शीतत्वादिकमादायाव्याप्तिपरिहाराय गुणत्वसाक्षाद्व्याप्यजातिमत्त्वमपि पूर्ववत् विवक्षणीयम् ।।

नन्वेवं सति स्पर्शत्वस्पर्शाभावयोः तादृशजातिमत्त्वाभावेनातिव्याप्तिवारणात् गुणपदं व्यर्थमिति चेत्, न । त्वगिन्द्रियमात्रग्राह्ये उष्णजलगतोष्णस्पर्शवत्तेजस्संयोगगतसंयोगत्वजातिमादाय संयोगादावतिव्याप्तिपरिहाराय

स त्रिविधः । शीतोष्णानुष्णाशीतभेदात् । पृथिव्यप्तेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः ।

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यम् । अन्यत्रापाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ।

एकत्वादिव्यवहारहेतुः संख्या । नवद्रव्यवृत्तिः।

आलोक-व्याख्या

विशेषणगुणार्थकगुणपदस्यावश्यकत्वात् । एवमिन्द्रियपदं बाह्येन्द्रियपरं वक्तव्यम्। मनसो ज्ञानसामान्यकारणत्वात् स्पर्शप्रत्यक्षस्य त्वग्भिन्नमनोजन्यत्वेनाव्याप्त्यापत्तेः। तथा च **त्वगिन्द्रियजन्यप्रत्यक्षविषयवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वे सति, त्वग्भिन्नबाह्येन्द्रियजन्यप्रत्यक्षाविषयत्वे सति, विशेषगुणत्वं स्पर्शस्य लक्षणमिति** बोध्यम् ।।

अनुष्णाशीतेति नामान्तरालाभादुक्तम् । नाप्युष्णं, नापि शीतमित्यर्थः। तथा च चित्ररूपतुल्यमिदम् । अत एव चित्रस्पर्श इत्यपि वक्तुं शक्यम् । चक्षुरिन्द्रियवत् त्वगिन्द्रियस्यापि द्रव्यग्राहकत्वात्, अवयविद्रव्ये चित्ररूपवत् चित्रस्पर्शोऽप्यावश्यकः । घ्राणश्रोत्ररसनानां द्रव्याग्राहकत्वान्न चित्रगन्धादीनामावश्यकता ।।

रूपरसगन्धस्पर्शानां साधारणाकारानाह - **रूपादिचतुष्टयमित्यादिना**। **पाकजमिति** । पृथिव्यामेव विजातीयतेजस्संयोगाख्यः पाकः, न त्वन्यत्र । **नित्यगतम्** - परमाणुवृत्ति । रूपादीति यथासंभवं ग्राह्यम् । जलादिपरमाणुरूपस्य नित्यत्वात्, पृथिवीपरमाणुगतरूपादावेव नित्यानित्यविभागः। अनित्यपृथिव्यादिचतुष्टयवृत्तिरूपादीनां त्वनित्यत्वमेव।।

संख्यां निरूपयति - **एकत्वादीति** । 'एकम्, द्वे, त्रीणि' इत्यादिगणनाव्यवहारस्यासाधारणकारणं संख्येत्यर्थः । अतश्च लक्षणमपि **गणनाव्यवहारासाधारणकारणत्वं** वक्तुमुचितम् । परार्धेति । चतुर्मुखस्यायुः 'परा'(संख्या)

आलोक-व्याख्या

इत्युच्यते । तस्यार्धभागो गतः । द्वितीयो भागस्संप्रति चलतीति पौराणिकी प्रक्रिया । मनुष्यस्य गणनाशक्तेस्तदुपरिगन्तुमसंभवात् 'परार्धपर्यन्ता' इत्युक्तम्। अतश्च 'एकपरार्धम्, द्विपरार्धम्, त्रिपरार्धम्' इति गणयितुं न शक्यते, 'परार्ध' पदस्यानन्तपर्यायत्वात् । 'एकमनन्तम्' 'द्वे अनन्ते' 'त्रीण्यनन्तानि' इत्येवं न हि व्यवहर्तुं शक्यम्, अनन्तत्वविरोधादेव ।।

एकत्वादीनां व्यवहार एकत्वादिव्यवहारः । एकत्वादिव्यवहारस्य हेतुः एकत्वादिव्यवहारहेतुरिति विग्रहः । एकत्वादीनामित्यत्र एकत्वपदस्यैकत्वमर्थः। षष्ठ्या विषयत्वमर्थः । प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वयः । तथा च - एकत्वादिनिष्ठविषयता । व्यवहारो नाम ज्ञानजनकशब्दप्रयोगः । षष्ठ्यर्थविषयताया व्यवहारपदार्थैकदेशे ज्ञाने निरूपकत्वसम्बन्धेनान्वयः । तथा च एकत्वादिनिष्ठविषयतानिरूपक(विषयतानिरूपितविषयिताश्रय)ज्ञानजनकशब्दप्रयोगः । व्यवहारस्य हेतुरित्यत्र षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्य व्यवहारपदार्थज्ञानजनकशब्दप्रयोगस्य षष्ठ्यर्थ-कार्यतायामाधेयतासम्बन्धेनान्वयः। तथा च एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनक-शब्दप्रयोगनिष्ठकार्यतेति। हेतुरित्यस्य कारणतावतीत्यर्थः । षष्ठ्यर्थकार्यताया हेत्वर्थैकदेशकारणतायां निरूपितत्वसम्बन्धेनान्वयः । कारणतावत्याश्चाभेदसम्बन्धेन संख्यायामन्वयः। तथा चाखण्डबोधः - **एकत्वादिनिष्ठविषयतानिरूपक(विषयतानिरूपितविषयिताश्रय) ज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणतावदभिन्ना संख्या ।** लक्षणं तु - **एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणत्वम्** । अस्य लक्षणस्य एकत्वादिसंख्यायां समन्वयः । एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगः कः ? इति चेत्, 'अयमेकः' इत्याकारकज्ञानजनकशब्दप्रयोगः। तादृशशब्दप्रयोगनिष्ठा कार्यता, संख्याव्यवहारे विषयभूत-

आलोक-व्याख्या

संख्यायाः कारणत्वात् । तादृशकार्यतानिरूपितकारणत्वमेकत्वादिसंख्यायां वर्तत इति लक्षणसमन्वयः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य कालादावतिव्याप्तिर्दुष्परिहरा । **'कार्यसामान्यं प्रति कालेश्वरादृष्टादीनां कारणत्वम्'** इति नियमानुरोधात् एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता केति चेत्? 'अयमेकः' इत्याकारकज्ञानजनकशब्दप्रयोगनिष्ठा कार्यता । तादृशकार्यता-निरूपितकारणत्वं संख्यायां यथा, तथा कालेऽपि वर्तत इत्यलक्ष्ये लक्षणप्रसरणात् अतिव्याप्तिरिति चेत्, न । कार्यतानिरूपतकारणतायाम् असाधारणपदनिवेशनात्। तथा च लक्षणम् - **एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्द-प्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणत्वम्** । एवञ्च नातिव्याप्तिः। तथाहि कारणत्वं द्विविधं वर्तते । साधारणकारणत्वमेकम् । अन्यच्च विशेष(असाधारण)कारणत्वम् । यद्यपि एकत्वादिनिष्ठविषयतानिरूपकज्ञान-जनकशब्दप्रयोगनिष्ठकार्यतानिरूपितसामान्यकारणत्वं कालेश्वरादृष्टादीनां वर्तते, किन्तु सा कारणता साधारणकारणता । न तु विशेष(असाधारण)कारणता । 'अयमेकः' इत्याकारकैकत्वव्यवहारं प्रति विषयविधया संख्याया एवासाधारण-कारणत्वं वर्तते । संख्यामन्तरा 'अयमेकः' इत्याकारकैकत्वव्यवहार एव न स्यात् । अतो विषयविधया तत्र संख्याया एवासाधारणकारणत्वात्, कालेश्वरादीनां विशेषकारणत्वाभावात् तत्र नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य यादृशसंख्यया 'अयमेकः' इत्यादिव्यवहार एव न जातः, तादृशपरमाण्वादिगतसंख्यायामेकत्वादि-निष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणत्वं नास्तीति तत्र लक्षणासमन्वयात् अव्याप्तिरिति चेत्, न । लक्षणस्य जातिघटिततया परिष्कारात् । एकत्वादिव्यवहारजनकयोग्यताया एव लक्षणत्वात् । योग्यता

आलोक-व्याख्या

नाम कारणतावच्छेदकधर्मोऽथवा जातिः । अयमंश उत्तरलक्षणेष्वपि समानः। तथा च लक्षणम् **'एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्ति (कारणतावच्छेदक)जातिमत्त्वम्'।** तथा च नाव्याप्तिः । तथाहि एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावती यत्र अस्माकं परिचितवस्तुगतसंख्यायाः व्यवहारः दृश्यते तादृशवस्तुगतसंख्या । तद्वृत्तिः या जातिरिति चेत्, संख्यात्वरूपा जातिः । तादृशजातिमत्त्वं अपरिचितवस्तुगतसंख्यायामपि वर्तते इति लक्षणस्य समन्वयात् नाव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः रूपादावतिव्याप्तिर्दुष्परिहरा । तथाहि - एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावती एकत्वादिसंख्या । तद्वृत्तिर्या जातिरिति चेत्, यथा संख्यात्वं तथा गुणत्वमपि । तादृशजातिमत्त्वं रूपादावपि वर्तत इत्यलक्ष्ये लक्षणसमन्वयात् अतिव्याप्तिरिति चेत्, न । जातौ 'गुणत्वव्याप्यत्व'स्य निवेशनात् । तथा च लक्षणम् -- **एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** । एवञ्च नातिव्याप्तिः । तथाहि एकत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावती एकत्वादिसंख्या । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत्, गुणत्वजातिर्न भवति, स्वस्य स्वव्याप्यत्वाभावात् । अतः सा जातिः स्वीकर्तुं न शक्यते। अतस्तद्व्याप्या जातिरिति चेत् ? संख्यात्वजातिरेव स्वीकार्या । तादृशजातिमत्त्वं तु संख्यायामेव वर्तते; न तु रूपादाविति तत्र नातिव्याप्तिः।।

नन्वेवं सति लक्षणस्यास्य द्वित्वादिसंख्यायामव्याप्तिर्दुरुद्धरा ।

एकत्वादिपरार्धपर्यन्ता । एकत्वं नित्यगतं नित्यम् । अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्रानित्यमेव ।

मानव्यवहारासाधारणकारणं परिमाणम् । नवद्रव्यवृत्ति । तच्चतुर्विधम् । अणु महद्दीर्घं ह्रस्वं चेति ।

आलोक-व्याख्या

तथाहि - एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावती एकत्वरूपा संख्या । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? एकत्वत्वरूपा जातिरपि । तादृशजातिमत्त्वं द्वित्वरूपसंख्यायां नास्तीति अव्याप्तिरिति चेत्, न । गुणत्वव्याप्ये साक्षात्पदस्य निवेशनात् । तथा च लक्षणम् - **एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्** । एवञ्च नाव्याप्तिः । तथाहि - एकत्वादिनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावती एकत्वरूपा संख्या । तद्वृत्तिर्या गुणत्वसाक्षाद्व्याप्या जातिरिति चेत् ? एकत्वत्वजातिर्न स्वीकर्तुं शक्यते । एकत्वत्वस्य गुणत्वसाक्षाद्व्याप्यत्वाभावात्, गुणत्वव्याप्यव्याप्यत्वात् । गुणत्वव्याप्या संख्यात्वजातिः । तद्व्याप्या एकत्वत्वजातिः । अत एकत्वत्वजातिः स्वीकर्तुं न शक्यते । गुणत्वसाक्षाद्व्याप्या जातिस्तु संख्यात्वजातिरेव । तादृशसंख्यात्वजातिमत्त्वं तु द्वित्वादिरूपसंख्यास्वपि वर्तत इति लक्षणसमन्वयान्नाव्याप्तिः । संपूर्णं लक्षणम् **एकत्वादिनिष्ठविषयतानिरूपक-(विषयतानिरूपितविषयिताश्रय)ज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्** इति।।

परिमाणं निरूपयति - **मानेति** । मानस्य व्यवहारो मानव्यवहारः । असाधारणं च तत् कारणम् इत्यसाधारणकारणम् । मानव्यवहारस्या-

आलोक-व्याख्या

साधारणकारणं मानव्यवहारासाधारणकारणम् । 'मानस्य' इत्यत्र मानपदस्य परिमाणमर्थः । षष्ठ्या विषयत्वमर्थः । प्रकृत्यर्थस्याधेयतासम्बन्धेन षष्ठ्यर्थविषयतायामन्वयः । तथा च परिमाणनिष्ठविषयता । व्यवहारो नाम ज्ञानजनकशब्दप्रयोगः । षष्ठ्यर्थविषयताया व्यवहारपदार्थैकदेशे ज्ञाने निरूपकत्व (स्वनिरूपितविषयिताश्रयत्व)सम्बन्धेनान्वयः । तथा च परिमाणनिष्ठ-विषयतानिरूपक (निरूपितविषयिताश्रय)ज्ञानजनकशब्दप्रयोग इति खण्डबोधः। व्यवहारो नाम ज्ञानजनकशब्दप्रयोगः । 'व्यवहारस्य' इत्यत्र षष्ठ्याः कार्यत्वमर्थः। प्रकृत्यर्थस्य व्यवहारस्य (ज्ञानजनकशब्दप्रयोगस्य) षष्ठ्यर्थकार्यतायाम् आधेयतासम्बन्धेनान्वयः । तथा च ज्ञानजनकशब्दप्रयोगनिष्ठकार्यता । असाधारणकारणम् इत्यस्य असाधारणकारणतावत् अर्थः । षष्ठ्यर्थकार्यताया हेतुपदार्थैकदेशासाधारणकारणतायां निरूपितत्वसम्बन्धेनान्वयः । असाधारणकारणतावतश्चाभेदसम्बन्धेन परिमाणेऽन्वयः । तथा चाखण्डबोधः **परिमाणनिष्ठविषयतानिरूपक(विषयतानिरूपितविषयिताश्रय) ज्ञानजनकशव्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावदभिन्नं परिमाणम्** । लक्षणं तु - परिमाणनिष्ठविषयतानिरूपकज्ञानजनक-शब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणत्वम् । अस्य लक्षणस्य महत्त्वाल्पत्वादिरूपपरिमाणेषु समन्वयः । तथा च माननिष्ठविषयतानिरूपकं ज्ञानं किमिति चेत् 'अयं महान्' इत्याकारकं ज्ञानम् । तादृशज्ञानजनक-शब्दप्रयोगश्चेत् 'अयं महान्' इत्याकारकशब्दप्रयोगः । तादृशशब्दप्रयोगनिष्ठा कार्यता । तादृशकार्यतानिरूपितासाधारणकारणत्वं महदादिपरिमाणे वर्तत इति लक्षणसमन्वयः । लक्षणे प्रथमत एवासाधारणदलनिवेशनात् कालादावतिव्याप्तिर्न भवति । कालादीनां कार्यसामान्यं प्रति साधारणकारणत्वेन, असाधारणकारणत्वाभावात् ।।

नन्वेवं सत्यप्यस्य लक्षणस्य यत्रास्माकमत्यन्तापरिचितवस्तु-

आलोक-व्याख्या

गतपरिमाणस्य व्यवहार एव नाभूत्, तत्र परिमाणे 'महान् वृक्षः' इत्यादिव्यवहारस्याभावात्, परिमाणनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणत्वं नास्तीति लक्षणासमन्वयात् अव्याप्तिरिति चेत्, न । जातिघटिततया लक्षणपरिष्कारात् । तथा च लक्षणम् - **परिमाणनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिजातिमत्त्वम्** । एवञ्च नाव्याप्तिः । तथाहि - परिमाणनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावत् यत्रास्माकं परिचितं 'महान्' इत्याकारकमहत्त्वपरिमाणविषयकस्थलं, तत् स्वीकर्तव्यम् । तद्वृत्तिर्या जातिरिति चेत् ? परिमाणत्वजातिः । तादृशजातिमत्त्वं त्वत्यन्तापरिचितपरिमाणेऽपि वर्तत इति लक्षणसमन्वयान्नाव्याप्तिः।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः रूपादावतिव्याप्तिर्दुष्परिहरा । तथाहि -- - परिमाणनिष्ठविषयतानिरूपितविषयिताश्रयज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावत् परिमाणम् । तद्वृत्तिर्या जातिरिति चेत् ? यथा परिमाणत्वजातिस्तथा गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं रूपेऽपि वर्तत इति अतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **परिमाणनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** । एवञ्च नातिव्याप्तिः । तथाहि - परिमाणनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावत् परिमाणम् । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवति । स्वस्य स्वव्याप्यत्वाभावात् । अतो गुणत्वव्याप्या जातिः परिमाणत्वजातिरेव भवति । तादृशजातिमत्त्वं परिमाण एव वर्तते, न

आलोक-व्याख्या

तु रूपादाविति नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य ह्रस्वत्वरूपपरिमाणेऽव्याप्तिर्दुरुद्धरा । तथाहि - परिमाणनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता-निरूपितासाधारणकारणतावत् महत्त्वपरिमाणम् । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् महत्त्वत्वजातिः। तादृशजातिमत्त्वं ह्रस्वत्वरूपपरिमाणे नास्तीति अव्याप्तिरिति चेत् - न । गुणत्वसाक्षाद्व्याप्येति निवेशनात् । तथा च लक्षणम् - **परिमाणनिष्ठविषयतानिरूपकज्ञानजनकशब्द-प्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिगुणत्वसाक्षाद्व्या-प्यजातिमत्त्वम् ।** एवञ्च नाव्याप्तिः । तथाहि - परिमाणनिष्ठविषयतानिरूपक-ज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावत् परिमाणम् । तद्वृत्तिर्या गुणत्वसाक्षाद्व्याप्या जातिरिति चेत् ? महत्त्वत्वजातिर्न भवति । तस्या गुणत्वव्याप्यव्याप्यत्वात् । स्वम् — गुणत्वम् । स्वव्याप्या जातिः— परिमाणत्वरूपा जातिः । तद्व्याप्यत्वं महत्त्वे वर्तते । अतो महत्त्वत्वादीनां गुणत्वसाक्षाद्व्याप्यत्वाभावात्, सा जातिः स्वीकर्तुं न शक्यते । अतो गुणत्वसाक्षाद्व्याप्या जातिस्तु परिमाणत्वमेव । तादृशजातिमत्त्वं ह्रस्वत्वादिपरिमाणेऽपि वर्तत इति लक्षणसमन्वयान्नाव्याप्तिः ।।

मूलेऽण्वादिपदमणुत्वादिपरं ज्ञेयम् । अणुत्वमिति सूक्ष्मपरिमाणं परमाणौ विश्राम्यति । महत्त्वमिति स्थूलपरिमाणं गगनादौ विभौ विश्राम्यति। दीर्घत्वमिति दण्डादौ, ह्रस्वत्वमिति तद्विपरीते । द्व्यणुकं ह्रस्वतमम् । **'महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्'** (ब्र.सू.२-२-१०) इत्यत्र वैशेषिकम-तानुवादे परिमण्डलपदेन परमाणुः, ह्रस्वपदेन द्व्यणुकम्, महत्पदेन त्र्यणुकम्, दीर्घपदेन परमाण्वपेक्षया द्व्यणुकं चाभिहितं द्रष्टव्यम् ।।

पृथक्त्वं निरूपयति - **पृथगित्यादि** । पृथगिति व्यवहारः पृथग्व्यवहारः।

पृथग्व्यहारासाधारणकारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।

आलोक-व्याख्या

असाधारणं च तत् कारणम् असाधारणकारणम् । पृथग्व्यवहारस्यासाधारणकारणं पृथग्व्यवहारासाधारणकारणम् । 'पृथक्' इति शब्दो यदि प्रकारवाची, तदा पृथक्पदस्य पृथक्त्वमर्थः । पृथग् इति शब्देऽव्ययत्वेन लुप्तायाः षष्ठ्या विषयत्वमर्थः । प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वयः। तथा च पृथक्त्वनिष्ठा विषयता इत्यासीत् । व्यवहारो नाम ज्ञानजनकशब्दप्रयोगः । विषयताया निरूपकतासंबन्धेन व्यवहारपदार्थैकदेशज्ञानेऽन्वयः । तथा च पृथक्त्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोग इति बोधः । 'व्यवहारस्य' इत्यत्र षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वयः। ज्ञानजनकशब्दप्रयोगनिष्ठकार्यता इत्यासीत् । असाधारणकारणं नाम - असाधारणकारणतावत् इत्यर्थः । षष्ठ्यर्थकार्यताया असाधारणकारण-पदार्थैकदेशेऽसाधारणकारणतायां निरूपितत्वसम्बन्धेनान्वयः । असाधारणकारणतावतोऽभेदसम्बन्धेन पृथक्त्वेऽन्वयः। तथा चाखण्डबोधः - **पृथक्त्वनिष्ठविषयतानिरूपक(निरूपितविषयिताश्रय) ज्ञानजनकशब्द-प्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावदभिन्नं पृथक्त्वम्** इति। लक्षणं तु - **पृथक्त्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोग-निष्ठकार्यतानिरूपितासाधारणकारणत्वम्** इति । लक्षणस्यास्य 'अयं घटः, तस्मात् पृथक्' इत्यत्र पृथक्त्वे समन्वयः । तथा हि - पृथक्त्वनिष्ठविषयता केति चेत् ? 'अयं घटः, तस्मात् पृथक्' इत्याकारकव्यवहारविषयपृथक्त्वनिष्ठा विषयता । तादृशविषयतानिरूपकं ज्ञानं किमिति चेत् ? पृथगिति ज्ञानम् । तादृशज्ञानजनकशब्दप्रयोगनिष्ठा कार्यता केति चेत् ? 'अयं घटः, तस्मात् पृथक्' इति व्यवहारनिष्ठा कार्यता । तन्निरूपितासाधारणकारणता पृथक्त्वे वर्तत इति लक्षणसमन्वयः । लक्षणे कारणतायाम् 'असाधारणम्' इत्या-

आलोक-व्याख्या

कारकविशेषणस्य विद्यमानत्वात् कालादौ नातिव्याप्तिः। तेषां (कालादीनाम्) असाधारणकारणत्वाभावात् ।।

नन्वेवं सत्यप्यस्य लक्षणस्य अपरिचितस्थले यत्रास्माकम् 'अयं, तस्मात् पृथक्' इत्याकारकव्यवहार एव न जातः, तत्र पृथक्त्वनिष्ठ-विषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणत्वं नास्तीति अव्याप्तिरिति चेत् - न । जातिघटितलक्षणपरिष्कारात् । तथा च लक्षणम् - **'पृथक्त्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता-निरूपितासाधारणकारणता-वद्वृत्तिजातिमत्त्वम्'** । तथा च नाव्याप्तिः। तथाहि -- पृथक्त्वनिष्ठविषयता-निरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता-निरूपितासाधारणकारणतावदित्यनेन यत्रास्माकमत्यन्तपरिचितस्थले 'अयं घटः, तस्मात् पृथक्' इति पृथक्त्वव्यवहार उत्पन्नः, तादृशपरिचितपृथक्त्वस्थलं स्वीकर्तव्यम् । तद्वृत्तिर्या जातिरिति चेत् ? पृथक्त्वत्वजातिः । तादृशजातिमत्त्वमत्यन्तापरिचितपृथक्त्वेऽपि वर्तत इति लक्षणसमन्वयान्ना-व्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुनः रूपादावतिव्याप्तिर्दुर्वारा । तथाहि - पृथक्त्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपिता-साधारणकारणतावत् पृथक्त्वम् । तद्वृत्तिर्या जातिरिति चेत् ? यथा पृथक्त्वत्वजातिः, तथा गुणत्वजातिरपि । तादृशजातिमत्त्वं रूपादावपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **पृथक्त्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोग-निष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** इति । एवञ्च नातिव्याप्तिः। पृथक्त्वनिष्ठविषयतानिरूपकज्ञानजनकशब्द-प्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावत् पृथक्त्वम् । तद्वृत्तिर्या

संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः ।

आलोक-व्याख्या

गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवति । स्वस्य स्वव्याप्यत्वाभावात्। गुणत्वव्याप्या जातिस्तु पृथक्त्वत्वजातिरेव भवति । तादृशजातिमत्त्वस्य रूपादावभावान्नातिव्याप्तिः। अत्र प्रयोजनाभावात् साक्षाद्व्याप्यत्वं न निवेशनीयम् ।।

पृथक्त्वम् अन्योन्याभावप्रयोजकम्, अतस्तेनास्य न चारितार्थ्यप्रश्नः। 'नीलो घटः' 'नीलः पटः' इत्यादिप्रतीत्या रूपादिगुणानां भेदो हि घटपटाद्याश्रयभेदादेवेति सर्वानुभवसिद्धम् । घटपटभेदस्तु घटत्वपटत्वरूप-जातिभेदादेवेति च सिद्धम् । घटयोर्द्वयोः, पटयोर्वा द्वयोः परिदृश्यमानो भेदः कथमभूदिति प्रश्ने, तत्तदवयवभेदादिति चानुभवसिद्धम्। 'अयं घटः, एतत्कपालद्वयजन्यत्वात्, तत्कपालद्वयजन्यतद्घटात् भिन्नोऽभूत्' इति खलूत्तरं वक्तव्यम् । ततश्चावयविभेदोऽवयवभेदाधीन इति द्व्यणुकपर्यन्तं वक्तुं शक्यम् - 'इदं द्व्यणुकम्, तद्द्व्यणुकभिन्नम्, एतत्परमाणुद्वयजन्यत्वात्' इति । अयं परमाणुस्तत्परमाणुभिन्नः कुतोऽभूदिति प्रश्ने तु, परमाणूनां निरवयवत्वात् अवयवभेदान्न वक्तुं शक्यो भेदस्तयोः । रूपादिभेदाद्भेदकथनेऽन्योन्याश्रयः। परमाणुभेदे सिद्धे रूपादिभेदसिद्धिः, रूपादिभेदे सिद्धे परमाणुभेदसिद्धिरिति। अतः परमाणुभेदसाधको विशेष एव । एवञ्च विशेषवशात् परमाण्वोः प्रत्येकीभाव इति, विशेषः, पृथक्त्वम्, भेदः इति भेदव्यवहारविकासक्रमः । अतो विशेषोऽन्यः, पृथक्त्वमन्यत्, अन्योन्याभावश्चान्य एव ।।

संयोगं निरूपयति - **संयुक्तेति** । संयुक्तस्य व्यवहारः संयुक्तव्यवहारः। संयुक्तव्यवहारस्य हेतुः संयुक्तव्यवहारहेतुः । संयुक्तपदस्य भावप्रधानत्वात् संयोगोऽर्थः । षष्ठ्या विषयत्वमर्थः । प्रकृत्यर्थस्य संयोगस्य षष्ठ्यर्थविषयता-यामाधेयतासम्बन्धेनान्वयः । तथा च संयोगनिष्ठा विषयता । व्यवहारो नाम

आलोक-व्याख्या

ज्ञानजनकशब्दप्रयोगः । षष्ठ्यर्थविषयताया ज्ञानजनकशब्दप्रयोगैकदेशे ज्ञाने निरूपकत्वसंबन्धेनान्वयः । तथा च संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगः। 'व्यवहारस्य' इत्यत्र षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्याधेयतासम्बन्धेन षष्ठ्यर्थकार्यतायामन्वयः । तथा च व्यवहार(ज्ञानजनकशब्दप्रयोग)निष्ठकार्यता । हेतुरित्यस्य कारणतावान् अर्थः। षष्ठ्यर्थकार्यताया हेत्वर्थैकदेशे कारणतायां निरूपितत्वसम्बन्धेनान्वयः । कारणतावतश्चाभेदसम्बन्धेन विशेष्ये संयोगेऽन्वयः । तथा च **संयोगनिष्ठविषयतानिरूपकज्ञानजनकशव्दप्रयोगनिष्ठकार्यतानिरूपितकारणतावदभिन्नः संयोग** इति बोधः । लक्षणं तु **संयोगनिष्ठविषयतानिरूपकज्ञानजनकशव्दप्रयोगनिष्ठकार्यतानिरूपितकारणत्वम्** । संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगः कः ? इति चेत् 'इमौ संयुक्तौ' इत्याकारकज्ञानजनकशब्दप्रयोगः । तादृशशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणत्वं संयोगे वर्तत इति लक्षणसमन्वयः।।

नन्वेवं सत्यप्यस्य लक्षणस्य कालादावतिव्याप्तिर्दुष्परिहरा । तथाहि— कालेश्वरादृष्टादीनां कार्यसामान्यं प्रति कारणत्वात्, संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणत्वं कालादावपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । कारणतायामसाधारणदलनिवेशनात् । तथा च लक्षणम् - **संयोगनिष्ठविषयतानिरूपकज्ञानजनकशव्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणत्वम्** । तथा च नातिव्याप्तिः । तथाहि -- कारणत्वं द्विविधं वर्तते । एकं साधारणकारणत्वम्, अन्यत् असाधारणकारणत्वम् इति । संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणत्वं यद्यपि कालेश्वरादृष्टादीनां वर्तते,

आलोक-व्याख्या

किन्तु सा कारणता साधारणकारणता । न त्वसाधारणकारणता । 'इमौ घटौ संयुक्तौ' इत्याकारकसंयुक्तव्यवहारं प्रति तु विषयविधयाऽसाधारणकारणत्वं संयोगस्यैव वर्तते । संयोगमन्तरा 'इमौ द्वौ संयुक्तौ' इत्याकारकव्यवहार एव नोत्पद्यते । अतो विषयविधया तत्र संयोगस्यैव कारणत्वात्, कालेश्वरादीनां तथाविधकारणत्वाभावात् तत्र नातिव्याप्तिः ।।

ननु यत्रात्यन्तापरिचितवस्तुनिष्ठसंयोगस्य व्यवहार एव कस्यापि नोत्पन्नः, तादृशस्थले संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोग-निष्ठकार्यतानिरूपितासाधारणकारणत्वं नास्तीति अस्य लक्षणस्याव्याप्तिरिति चेत्, न । लक्षणस्यास्य जातिघटितत्वेन परिष्कारात् । तथा च लक्षणम् - **संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता-निरूपितासाधारणकारणतावद्वृत्तिजातिमत्त्वम्** । एवञ्च नाव्याप्तिः। तथाहि -- संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपिता-साधारणकारणतावान् इत्यनेन, अस्माकं यत्रात्यन्तपरिचितसंयोगस्थले 'इमौ घटौ संयुक्तौ' इत्याकारको यो व्यवहार उत्पद्यते, तादृशस्थलीयसंयोगः स्वीकर्तव्यः । तद्वृत्तिर्या जातिरिति चेत् ? संयोगत्वजातिः । तादृशजातिमत्त्वं त्वत्यन्तापरिचितसंयोगेऽपि वर्तत इति लक्षणसमन्वयान्नाव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य रूपादावतिव्याप्तिर्दुष्परिहरा । तथाहि - संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपिता-साधारणकारणतावान् संयोगः । तद्वृत्तिर्या जातिरिति चेत् ? यथा संयोगत्वजातिस्तथा गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं रूपादावपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्द-प्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिगुण-**

आलोक-व्याख्या

त्वव्याप्यजातिमत्त्वम् । एवञ्च नातिव्याप्तिः । तथाहि - संयोग-निष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारण-कारणतावान् संयोगः । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवितुमर्हति । स्वस्य स्वव्याप्यत्वाभावात् । अतस्तादृशगुणत्वव्याप्या जातिः संयोगत्वजातिरेव भवति । तादृशजाते रूपादावभावात् नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य 'नोदनाख्य'संयोगेऽव्याप्तिर्दुष्परिहरा । तथाहि — संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता-निरूपतासाधारणकारणतावान् अभिघाताख्यसंयोगः । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? यथा संयोगत्वजातिः, तथा अभिघातत्वजातिरपि वर्तते । तादृशजातिमत्त्वं नोदनाख्यसंयोगे नास्तीत्यव्याप्तिरिति चेत्, न । गुणत्वव्याप्ये साक्षात्पदस्य निवेशनात् । तथा च लक्षणम् - **संयोगनिष्ठविषयता-निरूपकज्ञानजनकशव्दप्रयोगनिष्ठकार्यतानिरूपितासाधारण-कारणतावद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्** । एवञ्च नाव्याप्तिः । तथाहि - संयोगनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता-निरूपितासाधारणकारणतावान् संयोगः । तद्वृत्तिर्या गुणत्वसाक्षाद्व्याप्या जाति-रिति चेत् ? अभिघातत्वजातिर्न स्वीकर्तुं शक्यते। तस्या गुणत्वसाक्षाद्व्याप्यत्वा-भावात् । सा जातिर्गुणत्वव्याप्यव्याप्या । स्वम् - गुणत्वम् । तद्व्याप्या - संयोगत्वजातिः । तद्व्याप्यत्वमभिघातत्वरूपजातौ वर्तत इत्यतः साक्षाद्व्याप्या संयोगत्वरूपा जातिः । तादृशजातिमत्त्वं नोदनाख्यसंयोगेऽपि वर्तत इति नाव्याप्तिः ।।

संयोगः— **अभिघातः, नोदनम्** इति द्विविधः । शब्दहेतुः संयोगः— अभिघातः। शब्दाहेतुस्संयोगः— नोदनम् । संयोगस्सर्वोऽप्यनित्य एव । संयोगस्य क्रियाजन्यत्वात् विभुषु क्रियाया असंभवात्, संयोगोऽपि न

संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।

आलोक-व्याख्या

भवति । ननु विभूनां सर्वगतत्वात् आकाशकालदिगात्मनामेकदेशावच्छेदेनावस्थानस्यावर्जनीयत्वात्, अवयवावयविभावरहितद्रव्ययोस्संयोगस्यैव संभवात्, विभुद्वयसंयोगो दुर्वार इति चेन्न । संयोगस्य क्रियाजन्यत्वात् विभुद्वयस्य क्रियाया अभावेन संयोगासंभवात् । अन्ततः स्वरूपमेव तत्र संबन्धः । अत्र वक्तव्यमधिकं विभागनिरूपणान्ते द्रष्टव्यम् ।।

विभागं निरूपयति - **संयोगेत्यादि** । संयोगस्य नाशकः— संयोगनाशकः । नाशयतीति नाशकः । 'संयोगस्य' इत्यत्र संयोगपदस्य संयोगोऽर्थः । षष्ठ्याः प्रतियोगित्वमर्थः । प्रकृत्यर्थस्य संयोगस्याधेयतासम्बन्धेन षष्ठ्यर्थप्रतियोगितायामन्वयः । तथा च संयोगनिष्ठप्रतियोगिता । नाशक इत्यस्य नाशहेतुः - ध्वंसनिष्ठकार्यतानिरूपितकारणतावान् अर्थः । षष्ठ्यर्थप्रतियोगिताया नाशक इत्यत्र एकदेशे नाशे(ध्वंसे) निरूपकतासम्बन्धेनान्वयः । तथा च संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठकार्यतानिरूपितकारणतावान् इति बोधः । कारणतावतोऽभेदसम्बन्धेन विभागेऽन्वयः । तथा च-- **संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठकार्यतानिरूपितकारणतावदभिन्नो गुणाभिन्नो विभाग** इति अखण्डबोधः। लक्षणं तु - **संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठकार्यतानिरूपितकारणत्वे सति गुणत्वम्** ।

यत्र कुत्रचित् चलनात्मिका क्रिया यदा जायते, तदा क्रमेण क्रिया, विभागः, पूर्वसंयोगनाशः, उत्तरसंयोगोत्पत्तिश्चेति कार्याणि नियमेन भवन्ति । ततः पञ्चमक्षणे क्रियानाशः । यौ द्वौ घटौ संयुक्तौ, तत्र तयोर्मध्येऽन्यतरस्मिन् चलनरूपक्रियायां जातायां, तया क्रियया प्रथमं घटद्वयविभागो भवति । ततः प्राक्तनघटद्वयसंयोगनाशो भवति । ततो विभक्तस्य घटस्याऽऽकाश-

आलोक-व्याख्या

देशान्तरेण संयोगो जायते । तत्र प्राक्तनघटद्वयसंयोगनाशं प्रति तत्पूर्वं जातो विभाग एव कारणम् । अतो विभागः संयोगनाशं प्रति कारणमित्युच्यते। एवं च - 'इमौ द्वौ घटौ विभक्तौ' इत्यत्र विभागे लक्षणसमन्वयः । संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठकार्यता का ? इति चेत् 'इमौ द्वौ विभक्तौ' इत्याकारकप्रतीतिसिद्धा द्वयोः संयोगध्वंसनिष्ठा कार्यता । तादृशसंयोगध्वंसनिष्ठकार्यतानिरूपितकारणत्वं विभागे वर्तते, तत्र गुणत्वञ्च वर्तत इति लक्षणसमन्वयः । 'गुणत्व'मात्रोक्तौ रूपादावतिव्याप्तिः । अतः 'संयोगनाशक' इति दलम् । 'संयोगनाशकत्व'मात्रोक्तौ कालादावतिव्याप्तिः। अतो गुणपदम् । अथैवमपि कार्यसामान्यकारणेऽदृष्टेऽतिव्याप्तिः, धर्माधर्मरूपादृष्टस्य गुणत्वादिति चेत्, न , गुणपदस्य सामान्यगुणपरत्वात्। अदृष्टस्य च विशेषगुणत्वात् ।।

नन्वेवं सत्यप्यस्य लक्षणस्य 'हिमवद्विन्ध्यौ विभक्तौ' इत्याकारक-व्यवहारविषये विभागेऽव्याप्तिर्दुष्परिहरा । तत्र संयोगनिष्ठप्रतियोगिता-निरूपकध्वंसनिष्ठकार्यतानिरूपितकारणत्वस्याभावात् लक्षणस्याव्याप्तिरिति चेत्, न । तत्र विभागव्यवहारस्यैवाप्रामाणिकत्वात् । यद्याग्रहः, तर्हि लक्षणस्य जातिघटितपरिष्कारात् । तथा च लक्षणम् -- **संयोगनिष्ठप्रतियोगिता-निरूपकध्वंसनिष्ठकार्यतानिरूपितकारणतावद्वृत्तिजातिमत्त्वम्** इति । तथा च नाव्याप्तिः । तथाहि यत्रास्माकं विभागव्यवहार उपलभ्यते, तादृशपरिचितस्थलं स्वीकर्तव्यम् । तत्र संयोगनिष्ठप्रतियोगितानिरूपक-ध्वंसनिष्ठकार्यतानिरूपितकारणतावान् विभागः । तद्वृत्तिर्या जातिरिति चेत्? विभागत्वजातिः । तादृशजातिमत्त्वमुक्तस्थलेऽपि वर्तत इति लक्षण-समन्वयान्नाव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य रूपादावतिव्याप्तिर्दुष्परिहरा । तथाहि

आलोक-व्याख्या

- संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठकार्यतानिरूपितकारणतावान् विभागः। तद्वृत्तिर्या जातिरिति चेत् ? यथा विभागत्वजातिः, तथा गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं रूपादावपि वर्तत इत्यतिव्याप्तिरिति चेत् , न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् -- **संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठकार्यतानिरूपितकारणतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** इति । एवञ्च नातिव्याप्तिः । तथाहि - संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठकार्यतानिरूपितकारणतावान् विभागः। तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवति । किन्तु विभागत्वजातिरेव भवति । तादृशजातिमत्त्वं विभाग एव वर्तते, न तु रूपादाविति नातिव्याप्तिः ।। अत्र लक्षणे प्रयोजनाभावात् गुणत्वसाक्षाद्व्याप्यत्वनिवेशनावश्यकता नास्ति अथवा संयोगनिष्ठप्रतियोगितानिरूपकध्वंसनिष्ठकार्यतानिरूपितकारणतायामसाधारणपदविशेषणेऽदृष्टस्य साधारणकारणत्वान्नातिव्याप्तिः । तर्हि गुणपदं किमर्थमिति चेत् ? तत् स्वरूपकीर्तनम्, न लक्षणे निवेश्यम् ।।

संयोगविभागौ परस्परसापेक्षौ । अत एवान्यतरेणान्यतरस्य चारितार्थ्यं न संभवति५ प्रत्येकं घटपटौ यदा पश्यति, तदा 'इमौ संयुक्तौ' इति बुद्धिर्न भवति, उभयोर्मेलने तु भवति । पूर्वबुद्ध्यपेक्षयोत्तरबुद्धौ अधिको विषयः

टिप्पणी

संयोगः त्रिविधः— १. अन्यतरकर्मजः २. उभयकर्मजः ३. संयोगजश्चेति। १. आद्यस्तावत् यदा कश्चन पक्षी वृक्षादिषु तिष्ठति तदा पक्षिमात्रस्य क्रियया वृक्षपक्षिणोः संयोगो जायते । संयुक्तयोरुभयोर्मध्येऽन्यतरस्यैव क्रियया जायमानत्वात् अन्यतरकर्मजोऽयं संयोगः । २. द्वितीयस्तु यदा मल्लयोः मेषयोर्वा युद्धं भवति तदा युगपदेव मल्लद्वये मेषद्वये वा विद्यमानाभ्यां क्रियाभ्यां संयोगो जायते । अतोऽयं संयोगः = उभयकर्मज इत्युच्यते । ३. तृतीयस्तु - यदा अस्माकं शरीरावयवस्य हस्तादेः

आलोक-व्याख्या

कः? घटपटौ तूभयत्र समानौ । अत उत्तरज्ञाने विषयाधिक्यमावश्यकम् । स एव संयोग उच्यते । अन्तरालाभावमात्रं न संयोगः, अभावमात्रेण बुद्धेर्विषयाधिक्यनिर्वाहासंभवात् । बुद्धिः किल सविषया नियमेन, निर्विषयाया बुद्धेः कुत्राप्यदर्शनात् । अभावालम्बना तु बुद्धिर्न विलक्षणव्यवहारनिर्वाहक्षमा, सुषुप्तावपि व्यवहारविजृम्भणप्रसङ्गात् । ननु कं भीषयसि ? निरन्तरालौ घटौ पश्यन् 'इमौ संयुक्तौ' इति व्यवहरति । तत्र स्त एव घटपटौ विषयौ। ततश्च सविषयैव बुद्धिः, न निर्विषया । अत एव न सुषुप्त्यविशेषप्रसङ्गः इति चेत्, न , पुनरपि बालिशतामेव प्रकटयसि त्वम् । संयोगाभाव एव विभागः कुतो न स्यात् ? अस्तु तथैव अन्यतर एवालमिति चेत्, उक्तमेवात्रोत्तरमपि विनिगमकाभावान्नान्यतरचारितार्थ्यमिति ।।

किं बहुना ! औषधयोगादौ हि प्रत्येकमदृष्टा अतिशया विचित्र-

टिप्पणी

पुस्तकादिभिः सह संयोगो जायते, ततः पुनः अवयविनोऽखण्डस्य शरीरस्यापि पुस्तकादिभिः सह संयोगो जायते । अयं तु शरीराद्यवयविसंयोगः, हस्ताद्यवयवसंयोगात् भिन्न एव । कुतः ? इति चेत्, सिद्धान्ते अवयवावयविनोर्भेदस्वीकारात् । अत्र यः द्वितीयः शरीराद्यवयविपुस्तकसंयोगः, स प्राक्तनहस्ताद्यवयवपुस्तकसंयोगाज्जायते, न तु क्रियया । शरीरादौ अवयविनि क्रियाभावेऽपि शरीरपुस्तकसंयोगस्य दृष्टत्वात् । अतोऽयं संयोगः संयोगजसंयोग इत्युच्यते ।।

एवमेव विभागोऽपि त्रिविधः- १. अन्यतरकर्मजः २. उभयकर्मजः ३. विभागजश्चेति। १. अत्रापि वृक्षपक्षिणोः संयोगानन्तरं पक्षिमात्रस्य क्रियया जायमानो विभागः =अन्यतरकर्मजः विभाग इत्युच्यते । २. यदा मल्लयोः मेषयोर्वा युगपद् संयोगानन्तरं युगपदेव विभागो जायते, तदा द्वयोः विद्यमानक्रियाभ्यां विभागस्य जातत्वात् उभयकर्मज इत्युच्यते । ३. तृतीयः=विभागजः विभागस्तु द्विविधः । (क) कारणाकारणविभागजन्यः विभाग एकः । (ख) कारणमात्रविभागजन्यः विभागश्चापरः । अनयोर्मध्ये (क) प्रथमः— हस्तपुस्तकसंयोगानन्तरं क्रियया यदा

आलोक-व्याख्या

कार्यकरा दृष्टाः । हरिद्राचूर्णसंयोगाद्रक्तरूपोत्पत्तिर्दृश्यते । किण्वादिभ्यो मादकशक्तिस्तु प्रसिद्धैव । जगदेवेदं प्रकृतिपुरुषसंयोगमूलकमामनन्ति । इदं सर्वं केवलमभावमूलकमिति को वा स्वाधीनमतिर्वदेत् ? । तर्ह्यस्तु संयोगोऽतिरिक्तः, मास्तु विभागोऽतिरिक्त इति चेत्, उपक्रान्तं संगीतकं पुनरपि । संश्लेषवत् विश्लेषोऽपि बहुविधकार्यकारी दृश्यते । किं बहुना

टिप्पणी

हस्तपुस्तकयोः विभागो जायते, तदा शरीरादपि पुस्तकस्य विभागो जायते । अयं शरीरपुस्तकयोः विभागः, हस्तपुस्तकविभागाद् भिन्न एव । अत्र अवयविभूतस्य शरीरस्य कारणम् अवयवः हस्तः, पुस्तकं तु शरीरस्य नावयवः, अत एव तद्दृष्ट्या अकारणं च । एवञ्चात्र शरीरकारणीभूतहस्तस्य तदकारणीभूतस्य पुस्तकस्य च विभागात् जातः विभाग एव कारणाकारणविभागजन्यः (कार्याकार्य)विभाग इत्युच्यते । (ख) द्वितीयस्तु— कारणमात्रविभागजन्यः विभागः । यदा घटकारणीभूतयोः कपालयोः क्रिया जायते, तदा प्रथमं तादृशकारणमात्रविद्यमानक्रियया घटारम्भकसंयोगनाशकः कपालद्वयविभाग उत्पद्यते । तस्मात् विभागाद् घटारम्भकसंयोगनाशो भवति । ततः घटासमवायिकारणस्य कपालद्वयसंयोगस्य नाशात् घटनाशो भवति । तत्रादौ जातेन विभागेन कपालस्य प्राक्तनदेशावच्छिन्नाकाशादपि विभागो जायते । अयं च कपालाकाशविभागो घटकारणीभूतकपालद्वयमात्रविभागाद् जन्यः । अत एव कारणमात्रविभागजन्यः विभाग इत्युच्यते ।।

अत्रायं प्रश्नः — प्रथमं तावत् कपालयोः क्रिया जायते, ततः कपालद्वयविभागः, ततः घटारम्भककपालद्वयसंयोगनाशः, ततः घटनाशः । अत्र कपालद्वयविभागात् कपालाकाशविभागः, ततः कपालाकाशसंयोगनाशः, ततः उत्तरदेशसंयोगः, तदनन्तरमेव क्रियानाश इति क्रमः । अत्र द्वितीयक्षणे जातेन कपालद्वयविभागेन कपालाकाशविभागो जायत इत्युक्तम् । तत् कुतः ? यया क्रियया प्रथमः कपालद्वयविभागो जायते तयैव कपालाकाशविभागोऽपि जायत इति वक्तुं न शक्यते वा ? लोकेऽस्माकम् अनुभवोऽपि कपालद्वयविभागकाले एव कपालाकाशविभागोऽपि जात इव भवति ।।

आलोक-व्याख्या

प्रकृतिपुरुषसंयोगात् सृष्टिः, विश्लेषाच्चापवर्ग इति तत्त्वविदः । अतो विश्लेषरूपो विभागोऽप्यतिरिक्त आवश्यक एव । ननु प्रकृतिपुरुषयोरुभयोरपि विभुत्वात् कथं विश्लेषसंभवः? हन्त ! शास्त्रान्तरकथेयम् । **'मन एव मनुष्याणां**

टिप्पणी

अस्याः समाधानम् — घटारम्भककपालद्वयसंयोगस्य नाशिका या क्रिया, सैव तदनारम्भककपालाकाशसंयोगस्य नाशिका न भवेत् । कुतः ? इति चेत्, या क्रिया घटारम्भककपालद्वयसंयोगनाशकं विभागं जनयति, सैव यदि घटानारम्भककपालाकाश-संयोगनाशकं विभागमपि जनयेत्, तर्हि एकैव क्रिया कार्यारम्भकसंयोगतदनार-म्भकसंयोगनाशकविभागस्य जनिकेति स्वीकारे विकसत्कमलकुड्मलभङ्गप्रसङ्गः। कथमिति चेत् ? कमलस्यावस्थाद्वयं वर्तते, एका कुड्मलावस्था, अन्या कुसुमावस्था। कुड्मलं विकसितं चेत्, कुसुमं भवति । कुड्मलस्य विकासो नाम कुड्मलदलानाम् अग्रदेशावच्छेदेन चलनम् । अनया हि चलनरूपक्रियया दलानामग्रदेशावच्छेदन प्राक्तनदेशावच्छिन्नाकाशाद् विभागो जायते । तदैव कमलं विकसतीत्युच्यते । एवञ्च दलेऽग्रदेशावच्छेदेनोत्पन्नक्रियया केवलम् दलानाम् प्राक्तनदेशावच्छिन्नाकाशाद् कमलानारम्भकसंयोगनाशकविभागो जायते, यदि इयमेव कमलानारम्भकसंयोगनाशकविभागजनिका क्रिया कमलारम्भकसंयोगनाशकं विभागमपि जनयेत्, तर्हि तेन विभागेन कमलारम्भकसंयोग-नाशो भवेत्, ततश्च वृन्तदलसंयोगस्यासमवायिकारणस्य नाशेन कमलस्यापि नाशो भवेत् । एवं कमलसमवायिकारणदलवृन्तदलसंयोगस्य नाशे विकसत्कमलस्यापि नाशः स्यात् । तस्मात् सुष्ठूक्तम् — विकसत्कमलकुड्मलभङ्गप्रसङ्ग इति ।।

वस्तुतस्तु — वृन्तदलसंयोगः कमलारम्भकसंयोगः। तत्रैव दलानामग्रदेशा-वच्छेदेन विद्यमानो दलाकाशसंयोगो दलाग्रे जायमानक्रियाजन्यविभागेन नश्यति । दलानां कमलावयवत्वेन समवायिकारणत्वेऽपि, आकाशस्य कारणत्वाभावात् कारणाकारणविभागः स भवति । क्रियायास्तत्तत्प्रदेशेनापि भेदस्यावश्यकत्वात्, दलानामग्रे जायमाना क्रिया, दलवृन्तसंयोगं न नाशयेत् इत्युपपादनं वरम् ।।

परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादि-चतुष्टयमनोवृत्तिनी । ते द्विविधे । दिक्कृते कालकृते चेति । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् ।

आलोक-व्याख्या

कारणं वन्धमोक्षयोः' इति न श्रुतम् ? प्रकृतिपुरुषसंयोगविभागौ तन्मूलकावित्याद्यन्यत्र विस्तरः। परस्पराभावरूपयोर्विनिगमकाभावे नान्यतरेणान्यतरस्य चारितार्थ्यमिति संयोगविभागावावश्यकौ ।।

परत्वापरत्वे निरूपयति - **परापरेत्यादि ।** परं चापरं चेति परापरे। परापरयोर्व्यवहारः परापरव्यवहारः । न साधारणे असाधारणे । असाधारणे च ते कारणे असाधारणकारणे । परापरव्यवहारयोरसाधारणकारणे परापरव्यवहारासाधारणकारणे । परापरयोरित्यत्र परापरपदयोः परत्वमपरत्वं चार्थः । षष्ठ्या विषयत्वमर्थः । प्रकृत्यर्थस्याधेयतासम्बन्धेन षष्ठ्यर्थविषयतायामन्वयः । तथा च परत्वापरत्वनिष्ठविषयता । व्यवहारो नाम ज्ञानजनकशब्दप्रयोगः । षष्ठ्यर्थविषयताया व्यवहारपदार्थैकदेशे ज्ञाने निरूपकता (स्वनिरूपितविषयिताश्रयत्व)सम्बन्धेनान्वयः । तथा च परत्वापरत्वनिष्ठविषयता-निरूपक(निरूपितविषयिताश्रयत्व)ज्ञानजनकशब्दप्रयोग इति बोधः । 'व्यवहारस्य' इत्यत्र षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्य व्यवहारार्थस्य ज्ञानजनकशब्दप्रयोगस्य षष्ठ्यर्थकार्यतायामाधेयतासम्बन्धेनान्वयः । तथा च ज्ञानजनकशब्दप्रयोगनिष्ठकार्यता । असाधारणकारणे इत्यस्य असाधारणकारणतावती इत्यर्थः । षष्ठ्यर्थकार्यताया निरूपितत्वसम्बन्धेना-साधारणकारणपदार्थैकदेशेऽसाधारणकारणतायामन्वयः । कारणताव-तोश्चाभेदसम्बन्धेन परत्वापरत्वयोरन्वयः । तथा च - **परत्वापरत्वनिष्ठ-विषयतानिरूपक** (निरूपितविषयिताश्रयत्व)**ज्ञानजनकशव्दप्रयोगनिष्ठ-**

आलोक-व्याख्या

कार्यतानिरूपितासाधारणकारणतावदभिन्ने परत्वापरत्वे इति बोधः। लक्षणं तु - **परत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठ-कार्यतानिरूपितासाधारणकारणत्वं परत्वम्** इति । लक्षणस्यास्य 'अयम् अस्मात् परः' इत्यत्र समन्वयः। परत्वनिष्ठविषयता का ? इति चेत् 'अयम् अस्मात् परः' इत्याकारकपरत्वनिष्ठविषयता । व्यवहारे व्यवहर्तव्यस्य विषयत्वात्, 'अयम् अस्मात् पर इत्याकारकव्यवहारे परत्वं विषयः, परत्वं विना तादृशव्यवहारानुपपत्तेः । अतस्तादृशपरत्वनिष्ठविषयतानिरूपकं ज्ञानम् 'अयम् अस्मात् पर इत्याकारकम् । तादृशज्ञानजनकशब्दप्रयोगनिष्ठकार्यता केति चेत् ? 'अयम् अस्मात् पर इत्याकारकव्यवहारनिष्ठा कार्यता । तन्निरूपितासाधारणकारणत्वं व्यवहारे व्यवहर्तव्यस्य कारणत्वात् परत्वे वर्तत इति लक्षणसमन्वयः ।।

अत्र परत्वापरत्वयोर्लक्षणे कारणत्वेऽसाधारणपदस्य प्रथममेव निवेशनात् कालादावतिव्याप्तिरूपदोषो नास्ति । कालादीनां कार्यसामान्यं प्रति साधारणकारणत्वात्, असाधारणकारणत्वाभावात् ।। नन्वेवं सत्यप्यस्य लक्षणस्य यत्रास्माकमपरिचितवस्तुनि परत्वव्यवहार एव नोत्पन्नस्तादृशस्थले परत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणत्वस्याभावात् अव्याप्तिरिति चेत्, न । जातिघटितलक्षणपरिष्कारात् । तथा च लक्षणम् - **परत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठ-कार्यतानिरूपितासाधारणकारणतावद्वृत्तिजातिमत्त्वम्** इति । एवञ्च नाव्याप्तिः । तथाहि - यत्रास्माकम् 'अयं अस्मात् पर इति व्यवहार उपलभ्यते, तादृशपरत्वं स्वीकार्यम् । तद्वृत्तिर्या जातिरिति चेत् ? परत्वत्वजातिः । तादृशजातिमत्त्वमपरिचितस्थलीयपरत्वेऽपि वर्तत इति नाव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य रूपादावतिव्याप्तिः । परत्वनिष्ठ-

आलोक-व्याख्या

विषयतानिरूपकव्यवहारनिष्ठकार्यतानिरूपितासाधारणकारणतावत् परत्वम् । तद्वृत्तिर्या जातिरिति चेत् ? यथा परत्वत्वजातिः, तद्वत् गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं तु रूपादावपि वर्तत इति अतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **परत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यता-निरूपितासाधारणकारणतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** इति । एवञ्च नातिव्याप्तिः। तथाहि - परत्वनिष्ठविषयतानिरूपकव्यवहारनिष्ठकार्यता-निरूपितासाधारणकारणतावत् परत्वम् । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवति । स्वस्य स्वव्याप्यत्वाभावात् । अतो गुणत्वव्याप्या जातिश्चेत् ? परत्वत्वजातिरेव । तादृशजातिमत्त्वं तु रूपादौ नास्तीति नातिव्याप्तिः । अत्रापि प्रयोजनाभावात् गुणत्वसाक्षाद्व्याप्यत्वं न निवेशनीयम्।।

एवम् **अपरत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठ-कार्यतानिरूपितासाधारणकारणत्वम्** इति अपरत्वस्य लक्षणम् । लक्षणस्यास्य 'अयम् अस्मादपरः' इत्यत्र समन्वयः। अपरत्वनिष्ठविषयता का ? इति चेत् 'अयम् अस्मादपरः' इत्याकारकापरत्वनिष्ठविषयता । व्यवहारे व्यवहर्तव्यस्य विषयत्वात् 'अयम् अस्मात् अपर इत्याकारकव्यवहारे अपरत्वं विषयः । अपरत्वं विना तादृशव्यवहारानुपपत्तेः । अतस्तादृशापरत्व-निष्ठविषयतानिरूपकं ज्ञानम् 'अयम् अस्मात् अपर इत्याकारकम् । तादृशज्ञानजनकशब्दप्रयोगनिष्ठकार्यता केति चेत् ? अयम् अस्मात् अपरः' इत्याकारकव्यवहारनिष्ठा कार्यता । तन्निरूपितासाधारणकारणत्वं व्यवहारे व्यवहर्तव्यस्य कारणत्वात् अपरत्वे वर्तत इति लक्षणसमन्वयः ।।

अत्र परत्वापरत्वयोर्लक्षणे कारणत्वेऽसाधारणपदस्य प्रथममेव निवेशनात् कालादावतिव्याप्तिरूपदोषो नास्ति । कालादीनां कार्यसामान्यं प्रति

आलोक-व्याख्या

साधारणकारणत्वात्, असाधारणकारणत्वाभावात् ।।

नन्वेवं सति यत्रास्माकमपरिचितवस्तुनि अपरत्वव्यवहार एव नोत्पन्नस्तादृशस्थले अपरत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणत्वस्याभावात् अव्याप्तिरिति चेत्, न । अत्रापि जातिघटितलक्षणपरिष्कारात् । तथा च लक्षणम् - **अपरत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिजातिमत्त्वम्** इति । एवञ्च नाव्याप्तिः । तथाहि - यत्रास्माकम् 'अयमस्मात् अपरः' इति व्यवहार उपलभ्यते, तादृशापरत्वं स्वीकार्यम् । तद्वृत्तिर्या जातिरिति चेत् ? अपरत्वत्वजातिः । तादृशजातिमत्त्वमपरिचितस्थलीयापरत्वेऽपि वर्तत इति नाव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य रूपादावतिव्याप्तिः । अपरत्वनिष्ठविषयतानिरूपकव्यवहारनिष्ठकार्यतानिरूपितासाधारणकारणतावत् अपरत्वम्। तद्वृत्तिर्या जातिरिति चेत् ? यथा अपरत्वत्वजातिः, तद्वत् गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं तु रूपादावपि वर्तत इति अतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् — **अपरत्वनिष्ठविषयतानिरूपकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितासाधारणकारणतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** इति । एवञ्च नातिव्याप्तिः। तथाहि - अपरत्वनिष्ठविषयतानिरूपकव्यवहारनिष्ठकार्यतानिरूपितासाधारणकारणतावत् अपरत्वम् । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवति । स्वस्य स्वव्याप्यत्वाभावात् । अतो गुणत्वव्याप्या जातिश्चेत् ? अपरत्वत्वजातिरेव । तादृशजातिमत्त्वं तु रूपादौ नास्तीति नातिव्याप्तिः । अत्रापि प्रयोजनाभावात् गुणत्वसाक्षाद्व्याप्यत्वं न निवेशनीयम्। परत्वापरत्वयोर्नियमेन परस्परसापेक्षत्वादुभयोस्सहैव लक्षणमुक्तं मूलकारेण,

आद्यपतनासमवायिकारणं गुरुत्वम् । पृथिवीजलवृत्ति ।

आलोक-व्याख्या

अस्माभिस्तु छात्राणां व्युत्पत्त्यर्थं प्रत्येकं पृथक्कृत्योक्तम् ।।

यद्यपि परत्वापरत्व आपेक्षिके, तावता न बुद्धिविशेषविषयत्वरूपे ते । तथा सति सुखदुःखादीनामपि परस्परसापेक्षत्वादसिद्धिप्रसङ्गात् ।।

गुरुत्वं निरूपयति - **आद्येत्यादि ।** आद्यं च तत्पतनं चाद्यपतनम्। न समवायिकारणम् असमवायिकारणम् । आद्यपतनस्यासमवायिकारणम् आद्यपतनासमवायिकारणम् । आद्यत्वं नाम प्रथमत्वम् । पतनं नाम पतनरूपा क्रिया । प्रकृत्यर्थस्याद्यत्वस्य पतनरूपक्रियायामभेदसम्बन्धेनान्वयः । तथा च— आद्याभिन्नपतनक्रिया । 'आद्यपतनस्य' इत्यत्र षष्ठ्याः कार्यत्वमर्थः। प्रकृत्यर्थस्याद्यपतनरूपक्रियाया आधेयतासम्बन्धेन षष्ठ्यर्थकार्यतायामन्वयः। तथा च— आद्याभिन्नपतनक्रियानिष्ठकार्यता । असमवायिकारणं नाम असमवायिकारणतावत् । षष्ठ्यर्थकार्यताया असमवायिकारणपदार्थैकदेशे कारणतायां निरूपितत्वसम्बन्धेनान्वयः । तथा चाखण्डबोधः— **आद्याभिन्न-पतनक्रियानिष्ठकार्यतानिरूपितासमवायिकारणतावदभिन्नं गुरुत्वम्** इति । लक्षणम् तु - **आद्याभिन्नपतनरूपक्रियानिष्ठकार्यतानिरूपिता-समवायिकारणत्वम्** इति । आद्यपतननिष्ठकार्यता केति चेत् ? 'इदं फलं पतति' इत्याकारकपतनक्रियानिष्ठकार्यता । तादृशकार्यता-निरूपितासमवायिकारणत्वं गुरुत्वे वर्तत इति लक्षणसमन्वयः। 'पतनासमवायिकारणत्व'मात्रोक्तौ वेगेऽतिव्याप्तिः, द्वितीयादिपतने वेगस्याप्य-समवायिकारणत्वात् । अतः 'आद्ये'ति विशेषणम् । यद्यपि पतनरूपक्रियां प्रति वेगोऽप्यसमवायिकारणम्, अथाऽपि आद्यपतनरूपक्रियायां वेगस्या-भावेनासमवायिकारणत्वाभावात्, द्वितीयादिपतनरूपक्रियां प्रत्येवासम-वायिकारणत्वम् । अत आद्यपतनं प्रति तु गुरुत्वमेवासमवायिकारणम् इति

आलोक-व्याख्या

वेगे नातिव्याप्तिः ।।

अत्र 'असमवायि'पदाभावे कालादावतिव्याप्तिः । आद्यपतननिष्ठकार्यतानिरूपितकारणत्वं कालादावपि कार्यसामान्यकारणत्वात् वर्तत इत्यतिव्याप्तिस्स्यात् । असमवायिपदनिवेशे तु कालस्य कार्यसामान्यं प्रति निमित्तकारणत्वेनासमवायिकारणत्वाभावान्नातिव्याप्तिः । नन्वेवं सत्यपि यादृशेन गुरुत्वेन पतनरूपं कार्यं न जातम्, तत्राद्यपतननिष्ठकार्यतानिरूपितासमवायिकारणत्वस्याभावादव्याप्तिरिति चेत्, न । आद्यपतननिष्ठकार्यतानिरूपितासमवायिकारणतावद्वृत्तिजातिमत्त्वस्य लक्षणत्वात् । आद्यपतननिष्ठकार्यतानिरूपितासमवायिकारणतावत्, येन गुरुत्वेन पतनं जातम्, तादृशं गुरुत्वम् । तद्वृत्तिर्जातिः - गुरुत्वत्वरूपा जातिः । तादृशजातिमत्त्वं, यस्मात् पतनरूपं कार्यं न जातम्, तत्रापि वर्तत इति नाव्याप्तिः ।।

अथैवमपि रूपादावतिव्याप्तिः । आद्यपतननिष्ठकार्यतानिरूपितासमवायिकारणतावत् गुरुत्वम् । तद्वृत्तिर्जातिः- गुणत्वजातिरपि भवति । तद्वत्त्वं रूपेऽपि वर्तत इति रूपेऽतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्यापि विशेषणात् । तथा च **आद्यपतननिष्ठकार्यतानिरूपितासमवायिकारणतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** इति लक्षणम् । एवञ्चाद्यपतननिष्ठकार्यतानिरूपितासमवायिकारणतावत् गुरुत्वम् । तद्वृत्तिर्गुणत्वव्याप्या जातिः- गुणत्वं न भवति, स्वस्य स्वव्याप्यत्वाभावात् । किन्तु गुरुत्वत्वजातिरेव। तद्वत्त्वं गुरुत्व एव वर्तते, न तु रूपादाविति नातिव्याप्तिः । अत्रापि प्रयोजनाभावात् 'साक्षात्' इति विशेषणं न देयम् ।।

यद्यपि भूमेराकर्षणशक्तिरेव गुरुत्वमिति नव्यविज्ञानिनः; तथापि कार्यस्य सर्वत्र परस्परसापेक्षत्वावश्यम्भावात्, सर्वानपि पदार्थान् भूमिर्नाकर्षितुमलमिति व्यवस्थादर्शनात्, आकर्षकयोग्यतावत् आकृष्य-

आद्यस्यन्दनासमवायिकारणं द्रवत्वम् । पृथिवीजलतेजो-वृत्ति । तद् द्विविधम् । सांसिद्धिकं नैमित्तिकं चेति । सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम् । तेजसि सुवर्णादौ ।

आलोक-व्याख्या

योग्यताऽप्यावश्यकीति सैव गुरुत्वमुच्यत इति भाव्यम् ।।

द्रवत्वं निरूपयति - **आद्येत्यादि** । *द्रवति* इति व्यवहारसिद्धं जलनिष्ठविलक्षणक्रियाहेतुभूतं द्रवत्वमित्यर्थः । आद्यं च तत् स्यन्दनं चेति आद्यस्यन्दनम् । न समवायिकारणम् असमवायिकारणम् । आद्यस्यन्दनस्या-समवायिकारणमिति आद्यस्यन्दनासमवायिकारणम् । आद्यं नाम प्रथमम् । स्यन्दनं नाम स्यन्दनरूपा क्रिया । आद्यार्थकस्य प्रथमस्य स्यन्दनरूपक्रिया-यामभेदसम्बन्धेनान्वयः । तथा च आद्याभिन्नस्यन्दनक्रिया । 'आद्यस्यन्दनस्य' इत्यत्र षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्य आद्यस्यन्दनक्रियाया आधेयतासम्बन्धेन षष्ठ्यर्थकार्यतायामन्वयः । तथा च - आद्यस्यन्दननिष्ठ-कार्यता । 'असमवायिकारणम्' इत्यस्यासमवायिकारणतावदित्यर्थः। षष्ठ्यर्थकार्यताया असमवायिकारणपदार्थैकदेशेऽसमवायिकारणतायां निरू-पितत्वसम्बन्धेनान्वयः । कारणतावतश्चाभेदसम्बन्धेन द्रवत्वेऽन्वयः । तथा चाखण्डबोधः - **आद्यस्यन्दननिष्ठकार्यतानिरूपितासमवायिकारणता-वदभिन्नं द्रवत्वम्** इति । लक्षणं तु - **आद्यस्यन्दननिष्ठकार्यता-निरूपितासमवायिकारणत्वम्** इति । आद्यस्यन्दननिष्ठकार्यता केति चेत् ? 'आद्यजलं स्यन्दते' इति प्रतीतिसिद्धा स्यन्दनक्रियानिष्ठा कार्यता। तादृशकार्यतानिरूपितासमवायिकारणत्वं द्रवत्वे वर्तत इति लक्षणसमन्वयः। 'स्यन्दनासमवायिकारणम्' इत्येतावन्मात्रोक्तौ वेगेऽतिव्याप्तिः । अतः 'आद्य' इति विशेषणम् । द्वितीयादिस्यन्दनक्रियां प्रति वेगोऽप्यसमवायिकारणम्,

आलोक-व्याख्या

आद्यस्यन्दनं प्रति तु नासमवायिकारणम्, तदानीं वेगस्यानुत्पन्नत्वात् । अत आद्यस्यन्दननिष्ठकार्यतानिरूपितकारणत्वाभावात् वेगे नातिव्याप्तिः ।।

अत्र 'असमवायि' इति विशेषणाभावे, कालादावतिव्याप्तिर्दुर्वारा स्यात् । असमवायिपदनिवेशे तु कालेश्वरादृष्टादेः कार्यसामान्यं प्रति निमित्तकारणत्वेनासमवायिकारणत्वाभावान्नातिव्याप्तिः ।।

नन्वेवं सत्यपि येन द्रवत्वेन स्यन्दनमेव कदाचिदपि न जातम्, तत्र आद्यस्यन्दननिष्ठकार्यतानिरूपितासमवायिकारणत्वस्याभावादव्याप्तिरिति चेत्, न । **आद्यस्यन्दननिष्ठकार्यतानिरूपितासमवायिकारणतावद्वृत्ति-जातिमत्त्वस्य** लक्षणत्वात् । आद्यस्यन्दननिष्ठकार्यतानिरूपितासमवायि-कारणतावत्, येन द्रवत्वेन स्यन्दनं जातम्, तादृशद्रवत्वं भवति । तद्वृत्तिर्जातिर्द्रवत्वत्वरूपा जातिः । तादृशजातिमत्त्वं, येन द्रवत्वेन स्यन्दनमेव न जातम्, तादृशेऽपि द्रवत्वे वर्तत इति नातिव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य पुना रूपादावतिव्याप्तिर्दुर्वारा । तथाहि - आद्यस्यन्दननिष्ठकार्यतानिरूपितासमवायिकारणतावत् द्रवत्वम् । तद्वृत्तिर्या जातिरिति चेत् ? यथा द्रवत्वत्वजातिस्तथा गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं रूपादावपि वर्तत इति तत्रातिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **आद्यस्यन्दननिष्ठ-कार्यतानिरूपितासमवायिकारणतावद्वृत्तिगुणत्वव्याप्यजातिमत्त्वम्** इति। एवञ्च नातिव्याप्तिः । तथाहि - आद्यस्यन्दननिष्ठकार्यतानिरूपितासम-वायिकारणतावत् द्रवत्वम् । तद्वृत्तिर्गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवति । स्वस्य स्वव्याप्यत्वाभावात् । तादृशगुणत्वव्याप्या जातिस्तु द्रवत्वत्वमेव। तादृशजातिमत्त्वं द्रवत्व एव वर्तते नान्यत्र रूपादाविति नातिव्याप्तिः ।।

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।

आलोक-व्याख्या

नन्वेवं सत्यप्यस्य लक्षणस्य नैमित्तिकद्रवत्वेऽव्याप्तिर्दुर्वारा । तथाहि - आद्यस्यन्दननिष्ठकार्यतानिरूपितासमवायिकारणतावत् सांसिद्धिकद्रवत्वम्। तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? सांसिद्धिकत्वजातिरपि भवति । सांसिद्धकत्वस्य विलक्षणजातित्वात् । तादृशजातिमत्त्वं नैमित्तिकद्रवत्वे नास्तीति तत्र लक्षणासमन्वयात् अव्याप्तिरिति चेत्, न । गुणत्वव्याप्ये साक्षात्पदस्य निवेशनात् । तथाच लक्षणम् - **आद्यस्यन्दननिष्ठकार्यता-निरूपितासमवायिकारणतावद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्** । एवञ्च नाव्याप्तिः । तथाहि - आद्यस्यन्दननिष्ठकार्यतानिरूपिता-समवायिकारणतावत् द्रवत्वम् । तद्वृत्तिर्या गुणत्वसाक्षाद्व्याप्या जातिरिति चेत् ? इदानीं सांसिद्धिकत्वजातिर्न भवति । तस्या गुणत्वव्याप्यव्याप्यत्वात्। गुणत्वसाक्षाद्व्याप्या जातिस्तु द्रवत्वत्वमेव । तादृशजातिमत्त्वं नैमित्तिकद्रवत्वेऽपि वर्तत इति नाव्याप्तिः । संपूर्णं लक्षणं तु - **आद्यस्यन्दननिष्ठकार्यता-निरूपितासमवायिकारणतावद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्** इति।।

स्नेहं निरूपयति - **चूर्णादीति** । नायमान्तरप्रीतिविशेषरूपः, तस्य चेतनगुणत्वात् । किन्तु चूर्णादीनां पिण्डीभावहेतुर्जलनिष्ठोऽतिशयविशेषः । चूर्णादीनां पिण्डीभावः चूर्णादिपिण्डीभावः । चूर्णादिपिण्डीभावस्य हेतुः— चूर्णादिपिण्डीभावहेतुः। चूर्णादीनाम् इत्यत्र आदिपदेन सक्तूनां ग्रहणं कर्तव्यम्। षष्ठ्याः समवेतत्वमर्थः । तथा च चूर्णादिसमवेत इति । पिण्डीभावो नाम धारणाकर्षणहेतुभूतविलक्षणसंयोगः । पिण्डीभावस्येत्यत्र षष्ठ्याः कार्यत्वमर्थः। प्रकृत्यर्थस्याधेयतासम्बन्धेन षष्ठ्यर्थकार्यतायामन्वयः । तथा च धारणाकर्षणहेतु-भूतविलक्षणसंयोगनिष्ठकार्यता । हेतुरित्यस्य कारणतावान् अर्थः । षष्ठ्यर्थकार्यताया हेत्वर्थैकदेशे कारणतायां निरूपितत्वसम्बन्धेनान्वयः ।

आलोक-व्याख्या

गुण इत्यस्य गुणत्ववान् अर्थः । तस्य चाभेदसंबन्धेन गुणेऽन्वयः । तथा च **चूर्णादिसमवेतधारणाकर्षणहेतुभूतविलक्षणसंयोगनिष्ठकार्यता-निरूपितकारणतावदभिन्नो गुणाभिन्नः स्नेहः** इति बोधः । लक्षणं तु - **चूर्णादिसमवेतधारणाकर्षणहेतुभूतविलक्षणसंयोगनिष्ठकार्यता-निरूपितकारणत्वे सति गुणत्वम्** इति । तथाहि - चूर्णादिसमवेत-धारणाकर्षणहेतुभूतविलक्षणसंयोगनिष्ठकार्यता केति चेत् ? 'एते रेणवः पिण्डीभूताः' इत्याकारकप्रतीतिसिद्धा कार्यता । तादृशकार्यतानिरूपितकारणत्वं गुणत्वं च स्नेहे वर्तत इति समन्वयः । चूर्णादिपिण्डीभावहेतुत्वमात्रोक्तौ कालादावतिव्याप्तिः स्यात् । कार्यसामान्यं प्रति कालेश्वरादृष्टादीनां कारणत्वात्। अतश्चूर्णादिसमवेतधारणाकर्षणहेतुभूतविलक्षणसंयोगनिष्ठकार्यता-निरूपितकारणत्वं कालादावपि वर्तत इत्यतिव्याप्तिः। तदर्थं गुणत्वम् । कालस्य द्रव्यत्वात् गुणत्वाभावात्, तत्र नातिव्याप्तिः । गुणत्वमात्रोक्तौ रूपादावतिव्याप्तिः । अतश्चूर्णादिपिण्डीभावहेतुत्वम् ।।

यद्यपि लक्षणे कार्यतानिरूपितकारणतायामसाधारणत्वपदनिवेशनेनापि कालादावतिव्याप्तिर्वारयितुं शक्यते, तथापि असाधारणदलनिवेशनेऽपि स्नेहसमवायिकारणे चूर्णादावेवातिव्याप्तिः । तथाहि - चूर्णादिसमवेतधारणा-कर्षणहेतुभूतविलक्षणसंयोगनिष्ठकार्यता केति इति चेत् ? 'एते चूर्णाः पिण्डीभूताः' इत्याकारकप्रतीतिसिद्धा धारणाकर्षणसंयोगनिष्ठकार्यता । तादृशकार्यतानिरूपितासाधारणकारणत्वं यथा स्नेहे वर्तते तथा चूर्णादावपि वर्तते । चूर्णमपि तादृशपिण्डीभावेऽसाधारणहेतुरेव । चूर्णं विना पिण्डीभाव एव कथं घटेत । अतो लक्षणेऽसाधारणकारणत्वनिवेशेनापि, नातिव्याप्तेर्निस्तारो भवति । तदर्थं गुणपदं निवेशनीयमेव । प्रकृते चूर्णादीनां द्रव्यत्वात् गुणत्वाभावाच्च तत्र नातिव्याप्तिः ।।

आलोक-व्याख्या

नन्वेवं सत्यपि येन स्नेहेन पिण्डीभाव एव न जातः, तत्र चूर्णादिसमवेतसंयोगस्य कार्यस्यैवाभावात् तादृशकार्यतानिरूपितकारणत्वं स्नेहे नास्तीत्यव्याप्तिरिति चेत्, न । जातिघटितपरिष्कारात् । तथा च लक्षणम् - **'चूर्णादिसमवेतधारणाकर्षणहेतुभूतविलक्षणसंयोग-निष्ठकार्यतानिरूपितकारणतावद्वृत्तिजातिमत्त्वे सति गुणत्वम्'** इति। एवञ्च नाव्याप्तिः । तथाहि - चूर्णादिसमवेतधारणाकर्षणहेतुभूतविलक्षणसंयोग-निष्ठकार्यतानिरूपितकारणतावान् येन स्नेहेन पिण्डीभावो जातः, तादृशः स्नेहः । तद्वृत्तिर्या जातिरिति चेत् ? स्नेहत्वजातिः । तादृशजातिमत्त्वं तु येन स्नेहेन पिण्डीभाव एव न जातः, तादृशस्नेहेऽपि वर्तत इति नाव्याप्तिः।। नन्वेवं सत्यप्यस्य लक्षणस्य रूपादावतिव्याप्तिर्दुष्परिहरा । तथाहि - चूर्णादिसमवेतधारणाकर्षणहेतुभूतविलक्षणसंयोगनिष्ठकार्यतानिरूपित-कारणतावान् स्नेहः। तद्वृत्तिर्यथा स्नेहत्वजातिः, तथा गुणत्वजातिरपि भवति। तादृशजातिमत्त्वं रूपादावपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **चूर्णादिसमवेतधारणा-कर्षणहेतुभूतविलक्षणसंयोगनिष्ठकार्यतानिरूपितासाधारणकारणता-वद्वृत्तिगुणत्वव्याप्यजातिमत्त्वे सति गुणत्वम्** इति । एवञ्च नाव्याप्तिः। तथाहि - चूर्णादिनिरूपितासाधारणकारणतावान् स्नेहः । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वजातिर्न भवति । स्वस्य स्वव्याप्यत्वाभावात् । किन्तु स्नेहत्वजातिरेव । तादृशजातिमत्त्वं रूपादौ नास्तीति नातिव्याप्तिः । अत्र साक्षात्पदस्यावश्यकता नास्ति, स्नेहस्यानेकविधत्वाभावात् । तादृशजातिपदेन स्नेहत्वस्यैव ग्राह्यत्वात्, तद्वत्त्वं कालादौ नास्तीति गुणत्वनिवेशनाभावेऽपि न हानिः ।।

श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः ।
स द्विविधः । ध्वन्यात्मको वर्णात्मकश्चेति । ध्वन्यात्मको भेर्यादौ ।
वर्णात्मकः संस्कृतभाषादिरूपः ।

आलोक-व्याख्या

शब्दं लक्षयति - **श्रोत्रेति** । श्रोत्रेण ग्राह्यः - श्रोत्रग्राह्यः । 'श्रोत्रेण' इत्यत्र तृतीयाया जनकत्वमर्थः । श्रोत्रपदस्य श्रोत्रेन्द्रियमर्थः । प्रकृत्यर्थस्य श्रोत्रेन्द्रियस्य तृतीयार्थजनकतायामाधेयतासम्बन्धेनान्वयः । तथा च श्रोत्रेन्द्रियनिष्ठजनकता । ग्राह्य इत्यत्र ग्रहधातोः प्रत्यक्षमर्थः । ण्यत्प्रत्ययस्य विषयतावानर्थः । प्रकृत्यर्थस्य ग्रहधात्वर्थप्रत्यक्षस्य निरूपितत्वसम्बन्धेन ण्यत्प्रत्ययार्थैकदेशे विषयत्वेऽन्वयः । तथा च प्रत्यक्षनिरूपितविषयता । तृतीयार्थजनकताया ग्रहधात्वर्थप्रत्यक्षे निरूपकत्व(अथवा स्वनिरूपित-जन्यताश्रयत्व) सम्बन्धेनान्वयः । अथवा श्रोत्रेणेत्यत्र तृतीयाया जन्यत्वमर्थः। प्रकृत्यर्थस्य स्वनिष्ठजनकतानिरूपितत्वसंबन्धेन जन्यतायामन्वयः । जन्यताया आश्रयतासंबन्धेन प्रत्यक्षेऽन्वयः । विषयतावतश्चाभेदसम्बन्धेन शब्देऽन्वयः। तथा च **श्रोत्रेन्द्रियनिष्ठजनकतानिरूपितजन्यताश्रयप्रत्यक्षनिरूपित-विषयतावदभिन्नो गुणाभिन्नः शब्दः** इति बोधः । लक्षणं तु - **श्रोत्रेन्द्रियनिष्ठजनकतानिरूपक(जनकतानिरूपितजन्यताश्रय)प्रत्यक्ष-निरूपितविषयत्वे सति गुणत्वम्** इति । श्रोत्रेन्द्रियनिष्ठजनकतानिरूपित-जन्यताश्रयप्रत्यक्षं किमिति चेत् ? 'अयं शब्दः' इत्याकारकं प्रत्यक्षम् । तादृशप्रत्यक्षनिरूपिता विषयता शब्दनिष्ठा विषयता । तथा च श्रोत्रेन्द्रियजन्य-प्रत्यक्षनिरूपितविषयताश्रयत्वं शब्दे वर्तते । एवं गुणत्वमपि शब्दे वर्तत इति लक्षणसमन्वयः । 'गुणत्व'मात्रोक्तौ रूपादावतिव्याप्तिः । अतः 'श्रोत्रग्राह्यः' इति दलम् । 'श्रोत्रग्राह्यत्व'मात्रोक्तौ शब्दत्वे शब्दाभावे चातिव्याप्तिः, तदर्थं गुणपदम् । तथा च शब्दत्वस्य जातित्वात्, शब्दाभावस्य चाभावत्वादुभयत्र गुणत्वाभावात् तत्र नातिव्याप्तिः ।।

आलोक-व्याख्या

नन्वेवं सत्यप्यस्य लक्षणस्य यत्किञ्चित्प्रदेशावच्छिन्न आकाशे जातः शब्दः केनापि यदा न श्रूयते, तत्र श्रोत्रग्राह्यत्वं शब्दे नास्तीत्यव्याप्तिरिति चेत्, न, जातिघटितलक्षणपरिष्कारात् । तथा च लक्षणम् - **श्रोत्रेन्द्रियनिष्ठजनकतानिरूपक(जनकतानिरूपितजन्यताश्रय)प्रत्यक्ष-निरूपितविषयतावद्वृत्तिजातिमत्त्वे सति गुणत्त्वम्** इति । एवञ्च नाव्याप्तिः। तथाहि - श्रोत्रेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयतावान् श्रोत्रेण गृहीतश्शब्दः । तद्वृत्तिर्या जातिरिति चेत् ? शब्दत्वजातिः । तादृश-जातिमत्त्वं तु यः शब्दः केनापि न गृहीतः, तादृशशब्देऽपि वर्तत एवं गुणत्वमपि वर्तत इति लक्षणसमन्वयान्नाव्याप्तिः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य रूपादावतिव्याप्तिर्दुष्परिहरा । तथाहि 'श्रोत्रेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयतावान् शब्दः । तद्वृत्तिर्या जातिरिति चेत् ? यथा शब्दत्वजातिस्तथा गुणत्वजातिरपि भवति । तादृशजातिमत्त्वं रूपादावपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । जातौ गुणत्वव्याप्यत्वस्य निवेशनात् । तथा च लक्षणम् - **श्रोत्रेन्द्रियनिष्ठजनकता-निरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयतावद्वृत्तिगुणत्वव्याप्य जातिमत्त्वे सति गुणत्वम्** इति । एवञ्च नातिव्याप्तिः । श्रोत्रेन्द्रियनिष्ठ-जनकतानिरूपकप्रत्यक्षनिरूपितविषयतावान् शब्दः । तद्वृत्तिर्या गुणत्वव्याप्या जातिरिति चेत् ? गुणत्वं न भवति, स्वस्य स्वव्याप्यत्वाभावात् । तादृशगुणत्वव्याप्या जातिस्तु शब्दत्वमेव भवति । तादृशजातिमत्त्वं शब्दमात्रे वर्तते रूपादौ नास्तीति नातिव्याप्तिः।।

नन्वेवं सत्यप्यस्य लक्षणस्य गकारादावव्याप्तिर्दुष्परिहरा । तथाहि - 'श्रोत्रेन्द्रियनिष्ठजनकतानिरूपकप्रत्यक्षनिरूपितविषयतावान् ककारः । तद्वृत्तिर्या गुणत्वव्याप्या जातिर्यथा शब्दत्वं, तथा कत्वादिकमपि । तादृशजातिमत्त्वं

सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः ।

आलोक-व्याख्या

गकारादिरूपवर्णादौ नास्तीत्यव्याप्तिरिति चेत्, न । गुणत्वव्याप्ये साक्षात्पदस्य निवेशनात् । संपूर्णं लक्षणं तु - **श्रोत्रेन्द्रियनिष्ठजनकतानिरूपित-जन्यताश्रयप्रत्यक्षनिरूपितविषयतावद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वे सति गुणत्त्वम्** । एवञ्च नाव्याप्तिः । तथाहि - श्रोत्रेन्द्रियनिष्ठजनकता-निरूपितजन्यताश्रयप्रत्यक्षनिरूपितविषयतावान् ककारः । तद्वृत्तिर्या गुणत्व-साक्षाद्व्याप्या जातिरिति चेत् ? कत्वादिरूपा जातिर्न स्वीकर्तुं शक्यते। तस्या गुणत्वसाक्षाद्व्याप्यत्वाभावात् । अतस्तादृशगुणत्वसाक्षाद्व्याप्यजातिस्तु शब्दत्वमेव भवति । तादृशं शब्दत्वं गकारादिरूपवर्णादावपि वर्तत इति नाव्याप्तिः ।।

नन्वेवं सति कालादौ तादृशशब्दत्वरूपजात्यभावादेव नातिव्याप्तिरिति गुणपदं व्यर्थमिति चेत्, निष्कृष्टलक्षणे मास्तु तत्पदम्, दोषाभावात् ।।

यद्यपि स्पर्शानन्तरं शब्दो निरूपणीयः, विशेषगुणत्वात्, तथापि शब्द आकाशमात्रविशेषगुणः, आकाशसाधक इति विशेषसत्त्वात्, तादृशगुणसङ्घाते आद्यतयास्य निरूपणम् । बुद्ध्यादिकं हि जीवसाधकं लिङ्गम्, शब्दोऽप्याकाशस्येत्येत्यत्र क्रमीकृता गुणा इति द्रष्टव्यम् ।।

क्रमप्राप्तां बुद्धिं निरूपयति - **सर्वव्यवहार** इत्यादि । सर्वे च ते व्यवहाराः सर्वव्यवहारा इति विग्रहः, न तु सर्व इति व्यवहार इति । व्यवहारसामान्यकारणत्वस्यैव विवक्षितत्वात् । सर्वव्यवहाराणां हेतुः सर्वव्यवहारहेतुः । सर्वव्यवहाराणामित्यत्र प्रकृतेः सर्वविधव्यवहारोऽर्थः । षष्ठ्याः कार्यत्वमर्थः । प्रकृत्यर्थस्य सर्वविधव्यवहारार्थस्य षष्ठ्यर्थकार्यतायामाधेयतासम्बन्धेनान्वयः । तथा च सर्वविधव्यवहारनिष्ठकार्यता। हेतुरित्यस्य कारणतावान् अर्थः । षष्ठ्यर्थकार्यताया निरूपितत्वसम्बन्धेन हेत्वर्थैकदेशे

आलोक-व्याख्या

कारणतायामन्वयः । कारणतावतश्चाभेदसम्बन्धेन ज्ञाने । अत्र कार्यतायां सर्वपदसमभिव्याहारवशात् कार्यता व्यवहारत्वावच्छिन्ना बोध्या । तथा च **व्यवहारत्वावच्छिन्नकार्यतानिरूपितकारणतावदभिन्नं ज्ञानं बुद्धिः** इति बोधः । वस्तुतस्तु मुख्यो व्यवहारपदार्थो हानोपादानादिरेव । ज्ञानं तु तद्धेतुभूतम् । लक्षणं तु - **व्यवहारत्वावच्छिन्नकार्यतानिरूपितकारणत्वम्** इति । व्यवहारत्वावच्छिन्नकार्यता केति चेत् ? 'अयं घटः' 'अयं पटः' इत्याकारकज्ञानजनकशब्दप्रयोगरूपव्यवहारनिष्ठाकार्यता । तादृशशब्दप्रयोगं प्रति घटादिज्ञानस्य कारणत्वात् तादृशकार्यतानिरूपितकारणत्वं घटादिज्ञाने वर्तत इति समन्वयः । सांख्यैर्ज्ञानमन्यत्, बुद्धिश्चान्येत्यङ्गीकारात् तन्निराकरणार्थमुभयोः पर्यायत्वसूचनाय 'ज्ञानं बुद्धिः' इति पदद्वयं प्रयुक्तम्। अतो न पुनरुक्तिः, न वा लक्षणे पदद्वयनिवेशः ।।

नन्वेवं सत्यप्यस्य लक्षणस्य कालेऽतिव्याप्तिर्दुष्परिहरा । तथाहि - **'कार्यसामान्यं प्रति कालस्य कारणत्वात्'** व्यवहारत्वावच्छिन्नकार्यता-निरूपितकारणता केति चेत् ? कालनिष्ठा कारणतापि भवतीत्यतिव्याप्तिरिति चेत्, न । कारणतावान् इत्यत्र कारणतायामसाधारणपदनिवेशनात् । तथा च लक्षणम् - **'व्यवहारत्वावच्छिन्नकार्यतानिरूपितासाधारणकारणत्वम्'** इति । एवञ्च नातिव्याप्तिः । तथाहि - कालस्य कार्यसामान्यं प्रति साधारणकारणत्वे सत्यपि, असाधारणकारणत्वाभावात् 'अयं घटः' 'अयं पटः' इत्याकारकव्यवहारत्वावच्छिन्नकार्यतां प्रत्यसाधारणकारणत्वं ज्ञानस्यैव, न तु कालस्येति तत्र नातिव्याप्तिः ।।

बुद्ध्यादयस्त्वात्मविशेषगुणा आत्मसद्भावलिङ्गरूपाः । यद्यप्यात्मा 'अहम्'प्रतीतिसिद्ध इति वदन्ति, अथापि 'अहं' प्रतीतेश्शरीरादावपि दर्शनाद्वि-प्रतिपत्तिसत्त्वेन, परकीयात्मनश्च स्वेन 'अहमिति' प्रतीतिं कर्तुमशक्यत्वात्,

सा द्विविधा - स्मृतिरनुभवश्चेति । संस्कारमात्रजन्यं ज्ञानं स्मृतिः ।

आलोक-व्याख्या

तादृशप्रतीतिविषयत्वासंभवात्, आत्मनोऽनुमेयत्वाभिधानम् । न्यायवैशेषिकयोस्समानतन्त्रत्वात् परस्परपूरकत्वं सिद्धम् । तत्र न्यायशास्त्रं प्रमाणप्रधानम्, वैशेषिकं तु प्रमेयप्रधानम् । अनयोरुभयोर्मध्ये व्यवहारे प्रमाणं प्रधानम्, स्वविषये तु प्रमेयं प्रधानम् । किञ्च प्रमाणस्यापि प्रमेयत्वमनिवार्यम्, प्रमेयत्वस्य केवलान्वयित्वात् । अतः सप्तपदार्थरूपप्रमेये गुणवर्गे बुद्धौ प्रमाणानामन्तर्भावात् बुद्धिनिरूपणे प्रमाणनिरूपणमतिसमञ्जसम् । अतो बुद्धिं विभजते - **सा द्विविधेति** । अनुभवानामनुगतलक्षणापेक्षया स्मृतेरनुगतलक्षणं सुवचम् । स्मृतेर्लक्षणे ज्ञाते तद्भिन्नज्ञानत्वेनानुभवानां लक्षणं सुवचमिति प्रथमं स्मृतेर्लक्षणं उक्तम् ।।

तत्र प्रथमोद्दिष्टायास्स्मृतेर्लक्षणमाह - **संस्कारेत्यादि** । संस्कार एव संस्कारमात्रम् । संस्कारमात्रेण जन्यम् - संस्कारमात्रजन्यमिति विग्रहः । मात्रपदस्य भिन्नः, अभावश्चार्थः । तृतीयाया जनकत्वमर्थः । जन्यमित्यस्य जन्यतावदित्यर्थः । तृतीयार्थजनकताया आधेयतासंबन्धेन संस्कारपदार्थेऽन्वयः। एवं संस्कारपदार्थस्य मात्रपदार्थैकदेशे भेदेऽपि स्वनिष्ठप्रतियोगितानिरूपकत्वसंबन्धेनान्वयः। भिन्नपदार्थस्यापि तृतीयार्थजनकतायाम् आधेयतासंबन्धेनान्वयः। जनकतायाश्च निरूपितत्वसंबन्धेन जन्यतायामन्वयः । एवं जन्यताया मात्रपदार्थान्तरेऽभावे च स्वनिष्ठप्रतियोगितानिरूपकत्वसंबन्धेनान्वयः । तथा च **संस्कारनिष्ठजनकतानिरूपितजन्यतावदभिन्नम्, संस्कारनिष्ठप्रतियोगितानिरूपकभेदवन्निष्ठजनकतानिरूपितजन्यत्वनिष्ठप्रतियोगितानिरूपकाभाववदभिन्नं ज्ञानं स्मृतिरिति** बोधः ।। **संस्कारजन्यत्वे सति, संस्कारेतराजन्यत्वे सति ज्ञानत्वं स्मृतेर्लक्षणम्** । ज्ञानत्वमात्रो-

तद्भिन्नं ज्ञानमनुभवः । स द्विविधः - यथार्थोऽयथार्थश्चेति ।

आलोक-व्याख्या

क्तावनुभवेऽतिव्याप्तिः । अतः संस्कारजन्यत्वम् । एतावन्मात्रोक्तौ 'सोऽयं घटः' इत्यादिप्रत्यभिज्ञाप्रत्यक्षे तत्तांशस्य (विशेषणांशस्य) संस्कार-जन्यत्वादतिव्याप्तिः । अतः संस्कारेतराजन्यत्वम् । प्रत्यभिज्ञाप्रत्यक्षस्य इदंतांशे (विशेष्यांशे) संस्कारेतरेन्द्रियजन्यत्वात् संस्कारेतराजन्यत्वं नास्तीति नातिव्याप्तिः । संस्कारेतराजन्यत्वे सति ज्ञानत्वमात्रोक्तौ यद्यपि पूर्वोक्तरीत्याऽ-नुभवे नातिव्याप्तिः, अनुभवस्य संस्कारेतरेन्द्रियादिजन्यत्वेन संस्कारेतराजन्यत्व-स्याभावात्; अथापीश्वरप्रत्यक्षस्य नित्यत्वेन जन्यत्वस्यैवाभावेन, संस्कारेत-राजन्यत्वं सुतरां वर्तत ज्ञानत्वं च वर्तत इत्यतिव्याप्तिः । अतः संस्कारजन्यत्व-मावश्यकम् । ईश्वरज्ञानस्य नित्यत्वेन संस्कारजन्यत्वाभावान्नातिव्याप्तिः । **'ईश्वरस्य तु सर्वं प्रत्यक्षमेव, तस्य स्मृतिर्नास्ति'** । ज्ञानत्वानुपादाने संस्कारध्वंसेऽतिव्याप्तिः । अतो ज्ञानत्वम् । अथैवं मनसो ज्ञानसामान्यकारणत्वात् स्मृतिं प्रत्यपि कारणत्वेन संस्कारेतराजन्यत्वाभावादसंभव इति चेत्, न । तद्बलस्य बाह्येन्द्रियजन्यत्वाभावतात्पर्यकत्वेन दोषाभावान्न काप्यनुपपत्तिः । तथा च **संस्कारजन्यत्वे सति, बाह्येन्द्रियाजन्यत्वे सति ज्ञानत्वं** स्मृते-र्लक्षणम् ।।

अनुभवस्य लक्षणमाह - **तद्भिन्नमिति** । तत्पदस्य स्मृतिरर्थः । तस्याः(स्मृतेः) भिन्नम् तद्भिन्नमिति विग्रहः । 'तस्याः' इत्यत्र प्रकृत्याः स्मृतिरर्थः । पञ्चम्याः प्रतियोगित्वमर्थः । तत्र च प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वयः। तथा च स्मृतिनिष्ठप्रतियोगिता इति । भिन्नमित्यस्य भेदवत् (अन्योन्याभाववत्) अर्थः । पञ्चम्यर्थप्रतियोगितायाः भेदवत् इत्यत्रैकदेशे भेदे (अन्योन्याभावे) निरूपकत्वसम्बन्धेनान्वयः । भेदवतश्चाभेदसम्बन्धेनानुभवेऽन्वयः । तथा च **स्मृतिनिष्ठप्रतियोगितानिरूपकान्योन्याभावाश्रयाभिन्नो ज्ञानत्वाश्रया-**

तद्वति तत्प्रकारकानुभवो यथार्थः । सैव प्रमेत्युच्यते । यथा रजते इदं रजतम् इति ज्ञानम् ।

आलोक-व्याख्या

भिन्नोऽनुभवः इति बोधः । लक्षणं तु - **स्मृतिनिष्ठप्रतियोगितानिरूपकाऽन्योन्याभावाश्रयत्वे सति ज्ञानत्वम्** इति । स्मृतिनिष्ठप्रतियोगितानिरूपकः भेदः क इति चेत् ? 'अयं घटः' इत्याकारकप्रत्यक्षात्मकज्ञाने 'स्मृतिर्न' इति प्रतीतिसिद्धो भेदः । सः 'अयं घटः' इत्याकारकप्रत्यक्षात्मकानुभवे वर्तते, ज्ञानत्वमपि वर्तत इति लक्षणसमन्वयः। ज्ञानत्वम् इत्येतावन्मात्रोक्तौ स्मृतावतिव्याप्तिः, स्मृतेरपि ज्ञानत्वात् । अतः 'स्मृतिभिन्नम्' इति पदमुपात्तम् । 'स्मृतिभिन्नम्' इत्येतावन्मात्रोक्तौ घटादावतिव्याप्तिः, तस्यापि स्मृतिभिन्नत्वात् । अतः 'ज्ञानम्' इत्युपात्तम् । घटस्य ज्ञानरूपत्वाभावात्, तत्र नातिव्याप्तिः ।।

यथार्थानुभवस्य लक्षणमाह - **तद्वतीत्यादि** । तत् अस्मिन् अस्तीति तद्वत् । तस्मिन् तद्वति । 'अस्मिन्' इत्यत्र इदंशब्दस्य विशेष्यभूतरजतादिकमर्थः । सप्तम्या अधिकरणत्वमर्थः । प्रकृत्यर्थस्य रजतादेः सप्तम्यर्थाधिकरणतायामाधेयतासम्बन्धेनान्वयः। तथा च रजतादिनिष्ठाधिकरणता इति बोधः । 'अस्ति' इत्यत्र असधातोराधेयत्वमर्थः। 'ति' इत्याख्यातस्याश्रयत्वमर्थः। 'तत्'पदेन प्रकारीभूतो धर्मो रजतत्वादिर्ग्राह्यः। आख्यातार्थाश्रयताया-स्तत्पदार्थभूतप्रकारीभूतधर्मे (रजतत्वादौ) अन्वयः । तथा च **'तद्वन्निष्ठा(रजतादिधर्मिनिष्ठा)धिकरणतानिरूपिताधेयताश्रयस्तद्धर्मः (रजतत्वादिधर्मः)'** इति बोधः ।।

'अन्यपदार्थप्रधानसमासादिवृत्तिस्थले विग्रहवाक्यात् यादृशो विशेषणविशेष्यभावापन्नो वोधो जायते समासादिवृत्तिवाक्यात् तद्विपरीतविशेषणविशेष्यभावापन्नो वोधो जायते' इति नियमानुरोधेन

आलोक-व्याख्या

पूर्वं विशेषणभूतं रजतादिकम् इदानीं विशेष्यं भवति । पूर्वं विशेष्यभूतं रजत्वादिकम् इदानीं विशेषणं भवति । तथा च **'तन्निष्ठा(रजतत्वादिनिष्ठा)धेयतानिरूपिताधिकरणतावत्(आश्रयो रजतादिकम्)'**इति 'तद्वत्' इत्याकारकपदस्य बोधः । 'तद्वति' इत्यत्र सप्तम्या विशेष्यत्वमर्थः। प्रकृत्यर्थस्य तद्वतः (रजतत्त्ववतः रजतस्य) सप्तम्यर्थ-विशेष्यतायामाधेयतासम्बन्धेनान्वयः। तथा च तद्वन्निष्ठा(रजतत्वावच्छिन्न-रजतनिष्ठा)विशेष्यता इत्यासीत् । सप्तम्यर्थविशेष्यताया निरूपकत्वसम्बन्धेना-नुभवेऽन्वयः । तथा च - **तन्निष्ठा(रजतत्वनिष्ठा)धेयतानिरूपिता-धिकरणतावन्निष्ठ(रजतनिष्ठ)विशेष्यतानिरूपकोऽनुभवः** इति 'तद्वति' इत्यस्य पदस्य बोधः ।।

तत्प्रकारक इत्यत्र 'स प्रकारो यस्मिन्, तत्प्रकारक इति विग्रहः । बहुव्रीहिसमासान्त'क'प्रत्ययः कर्मधारयसमासभ्रान्तिवारणार्थः । 'यस्मिन्' इत्यत्र 'यत्' शब्दस्यानुभवोऽर्थः । सप्तम्या विषयित्वम् (प्रकारित्वम्) अर्थः। प्रकृत्यर्थस्यानुभवस्य सप्तम्यर्थप्रकारितायमाधेयतासम्बन्धेनान्वयः । तथा च अनुभवनिष्ठ(तन्निष्ठ)प्रकारिता (विषयिता) इति बोधः । 'प्रकारः' इत्यस्य प्रकारतावान् अर्थः । सप्तम्यर्थविषयितायाः (प्रकारितायाः) प्रकारशब्दार्थैकदेशे प्रकारतायां निरूपितत्वसम्बन्धेनान्वयः । 'तत्'पदेन प्रकारीभूतो धर्मो (रजतत्वादिः) ग्राह्यः । तथा च - **अनुभवनिष्ठ-प्रकारितानिरूपितप्रकारतावान्(प्रकारताश्रयः) स (रजतत्त्वम्)** इति विग्रहवाक्यबोधः । **'अन्यपदार्थप्रधानसमासादिस्थले'** इत्यादिनियमेन समासे विशेषणविशेष्यभावः विपरिवर्तते । **'तन्निष्ठ(रजतत्वनिष्ठ) प्रकारतानिरूपितप्रकारिता(विषयिता) श्रयाभिन्नोऽनुभवः** इति खण्डबोधः। अखण्डबोधस्तु **तन्निष्ठा(रजतत्वादिनिष्ठा)धेयतानिरूपिता-**

आलोक-व्याख्या

धिकरणतावन्निष्ठ(रजतादिनिष्ठ)विशेष्यतानिरूपकः, तन्निष्ठ (रजतत्वादिनिष्ठ)प्रकारतानिरूपितप्रकारिता(विषयिता) श्रयाभिन्नोऽनुभवो यथार्थः इति । लक्षणं तु - **तद्वन्निष्ठ(रजतत्वादिमन्निष्ठ) विशेष्यतानिरूपकत्वे सति, तन्निष्ठ(रजतत्वादिनिष्ठ) प्रकारतानिरूपकत्वे सति, अनुभवत्वम्** इति । रजते 'इदं रजतम्' इत्यत्र प्रमायां विशेष्यता रजतनिष्ठा । प्रकारता रजतत्वनिष्ठा । 'तद्वन्निष्ठविशेष्यतानिरूपकत्वम्' इत्यत्र 'तत्'पदेन रजतत्वं ग्राह्यम् । तद्वत् - रजतम् । तन्निष्ठा विशेष्यता । तादृशविशेष्यतानिरूपकत्वं रजते 'इदं रजतम्' इत्याकारकज्ञाने वर्तते । एवं तन्निष्ठप्रकारतानिरूपकत्वम् इत्यत्र 'तत्'पदेन रजतत्वस्य ग्रहणात् रजतत्वनिष्ठ-प्रकारतानिरूपकत्वमपि रजते 'इदं रजतम्' इति ज्ञाने वर्तत इत्यतस्तद्वन्निष्ठविशेष्यता-निरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सति, अनुभवत्त्वम् रजते 'इदं रजतम्' इत्याकारकयथार्थानुभवे वर्तत इति लक्षणसमन्वयः ।।

अस्मिन् लक्षणे 'अनुभवत्वम्'इत्येतावन्मात्रोक्तावयथार्थानुभवेऽतिव्याप्तिः । तस्यापि स्मृतिभिन्नत्वेनानुभवत्वाविशेषात् । अतः 'तद्वन्निष्ठविशेष्यतानिरूपकत्वम्' इति दलं निवेशनीयम् । तथा च लक्षणम् -**'तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति, अनुभवत्वम्'।** एवञ्च नातिव्याप्तिः। यद्यप्ययथार्थानुभवेऽनुभवत्वं वर्तते, अथापि तद्वन्निष्ठविशेष्यतानिरूपकत्वं नास्ति । तथाहि - शुक्तौ 'इदं रजतम्' इत्ययथार्थानुभवे 'तत्' पदेन प्रकारीभूतरजतत्वं ग्राह्यम्। तद्वत् - रजतत्ववद्रजतम् । तत्र रजतत्ववन्निष्ठ-विशेष्यतानिरूपकत्वं नास्ति। किन्तु रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपकत्वमेव वर्तत इति नातिव्याप्तिः।।

'तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति, अनुभवत्वम्' इत्येतावन्मात्रोक्तौ

आलोक-व्याख्या

शुक्तौ 'इदं रजतम्' भ्रमेऽतिव्याप्तिस्तथैव स्यात्। 'तत्' पदस्य सर्वनामपदत्वेन, तेन शुक्तित्वस्य ग्रहणे तत् - शुक्तित्वम्। तद्वती - शुक्तित्ववती - शुक्तिः। तन्निष्ठा विशेष्यता। तन्निरूपकत्वं शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमात्मकज्ञाने वर्तते। एवमनुभवत्वमपि वर्तत इत्यतिव्याप्तिः। अतः 'तन्निष्ठप्रकारतानिरूपकत्वम्'। तथा च लक्षणम् - **तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वम्**। एवञ्च नातिव्याप्तिः। तथाहि - शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमस्थले 'तत्'पदेन शुक्तित्वस्य ग्रहणात् तद्वन्निष्ठविशेष्यतानिरूपकत्वम् उक्तभ्रमात्मकज्ञाने वर्तते, एवमनुभवत्वमपि वर्तते। किन्तु तत्र तन्निष्ठप्रकारतानिरूपकत्वं नास्ति। तथाहि 'तत्'पदेन शुक्तित्वस्यैव ग्रहणात्, तत् - शुक्तित्वम्। तन्निष्ठा प्रकारता - शुक्तित्वनिष्ठा प्रकारता। तन्निरूपकत्वं शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमात्मकज्ञाने नास्ति। किन्तु रजतत्वनिष्ठप्रकारतानिरूपकत्वमेव वर्तत इति नातिव्याप्तिः ।।

'तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वम्' इत्येतावन्मात्रोक्तौ, पुनः शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमात्मकज्ञानेऽतिव्याप्तिः स्यात्। तथाहि - प्रकृते 'तत्' पदेन रजतत्वस्य ग्रहणात्, तत् - रजतत्वम्। तन्निष्ठा प्रकारता - रजतत्वनिष्ठा प्रकारता। तादृशप्रकारतानिरूपकत्वे सति, अनुभवत्वं शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमात्मकज्ञाने वर्तत इत्यतिव्याप्तिः। अतः 'तद्वन्निष्ठविशेष्यतानिरूपकत्व'रूपदलमप्यावश्यकम्। तथा च लक्षणम् - **तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वम्** इति। तथा च नातिव्याप्तिः। तथाहि - यद्यपि शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमे तत्पदेन रजतत्वग्रहणात् 'तन्निष्ठ(रजतत्वनिष्ठ) प्रकारतानिरूपकत्वे सति, अनुभवत्वम्' वर्तते। परन्तु तत्र

आलोक-व्याख्या

तद्वन्निष्ठविशेष्यतानिरूपकत्वं नास्ति । तथाहि 'तत्' पदेन रजतत्वस्य ग्रहणात्, तत् - रजतत्वम् । तद्वत् - रजतम् । रजतत्व-वद्रजतनिष्ठविशेष्यता-निरूपकत्वं शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमस्थले नास्ति । किन्तु तत्र (तदभाववन्निष्ठ)रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपकत्वमेव वर्तत इति तत्र नातिव्याप्तिः ।।

'अनुभवत्वम्' इति दलाभावे केवलं 'तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वम्' यथार्थानुभवस्य लक्षणम् इत्येतावन्मात्रोक्तौ यथार्थानुभव-जन्यस्मृतावतिव्याप्तिः । तथाहि - 'अयं घटः' इत्याकारकयथार्थानुभवजन्यायां स्मृतौ (घटविषयकस्मृतौ) 'तत्' पदेन घटत्वस्य ग्रहणात्, तत् - घटत्वम् । तद्वान् - घटत्ववान् घटः । तन्निष्ठा विशेष्यता। तन्निरूपकत्वम् 'अयं घटः' इत्याकारिकायां स्मृतौ वर्तते । एवं 'तत्' पदेन घटत्वस्य ग्रहणात्, तत् - घटत्वम् । तन्निष्ठा प्रकारता इति चेत् ? घटत्वनिष्ठाप्रकारता । तन्निरूपकत्वं च 'अयं घटः' इत्याकारकस्मृतिरूपज्ञाने वर्तत इति तत्रातिव्याप्तिः । अतोऽनुभवत्वदलम् । एवञ्च नातिव्याप्तिः । तथाहि - यद्यपि 'अयं घटः' इत्याकारिकायां यथार्थस्मृतौ तद्वन्निष्ठ-विशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वं वर्तते, तथापि स्मृतिभिन्नत्वस्यैवानुभवत्वात्, स्मृतावनुभवत्वं नास्तीति नातिव्याप्तिः ।।

अथैवमपि शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमेऽतिव्याप्तिर्दुर्वारा । प्रथमतत्पदेन शुक्तित्वग्रहणे तद्वती शुक्तिः । तद्वन्निष्ठा - शुक्तित्ववन्निष्ठा विशेष्यता भवति । तादृशविशेष्यतानिरूपकत्वं ज्ञाने वर्तते । द्वितीयतत्पदेन रजतत्वग्रहणे रजतत्व-निष्ठप्रकारतानिरूपकत्वं च तद्ज्ञाने वर्तते । अनुभवत्वं च वर्तत इत्यतिव्याप्तिः । ननु 'स राजा आगच्छति, तं पश्य' इत्यादिप्रयोगात् **'एकत्रोच्चरितयोस्तच्छब्दयोरेकार्थबोधकत्वमि'ति** नियमात्, तत्पदद्वयेनापि

आलोक-व्याख्या

एक एव धर्मो ग्राह्यः । प्रथमतत्पदेन शुक्तित्वग्रहणेन शुक्तित्ववच्छुक्ति-निष्ठविशेष्यतानिरूपकत्वसत्त्वेऽपि, द्वितीयतत्पदेनापि शुक्तित्वस्यैव ग्राह्यत्वात् - 'तन्निष्ठप्रकारता' इत्यनेन शुक्तित्वनिष्ठप्रकारतैव भवति । तत्र रजतत्वस्यैव प्रकारत्वात्, शुक्तित्वनिष्ठप्रकारतानिरूपकत्वं नास्तीति कथमतिव्याप्तिरिति चेत्; एवमपि रङ्गरजते दृष्ट्वा 'इमे रजतरङ्गे' इति समूहालम्बन-भ्रमेऽतिव्याप्तिर्दुर्वारा । नानाविशेषणविशेष्यकज्ञानं समूहालम्बनज्ञानमित्युच्यते। उक्तज्ञाने शुक्तिः रजतं चेति द्वयं विशेष्यम् । शुक्तित्वं रजतत्वं चेति द्वयमपि विशेषणम् । अतस्तत्र तत्पदेन रजतत्वग्रहणे रजतत्ववद्रजतनिष्ठा विशेष्यतापि वर्तते, रजतत्वनिष्ठप्रकारतापि वर्तते । एवं तत्पदेन रङ्गत्वग्रहणे रङ्गत्ववद्रङ्गनिष्ठापि विशेष्यता वर्तते, रङ्गत्वनिष्ठा प्रकारतापि वर्तत इति तद्वन्निष्ठविशेष्यतानिरूपकत्वं तन्निष्ठप्रकारतानिरूपकत्वमनुभवत्वं च वर्तत इत्यतिव्याप्तिः स्यादेवेति चेत्, न । एकज्ञानीययोर्विशेष्यत्वप्रकारत्वयोः परस्परं निरूप्यनिरूपकभावस्य भानात्, तद्वन्निष्ठविशेष्यतानिरूपिता या तन्निष्ठा प्रकारता, तन्निरूपकत्वस्य ज्ञाने निवेशान्नातिव्याप्तिः । पूर्वं तु विशेष्यतानिरूपकत्वं प्रकारतायां न निविष्टम्, किन्तु ज्ञाने निविष्टम् । इदानीं तु प्रकारतायां निविष्टमिति विशेषः । एवञ्चोक्तसमूहालम्बनभ्रमे रङ्गनिष्ठापि विशेष्यता, रजतनिष्ठापि विशेष्यता, रङ्गत्वनिष्ठापि प्रकारता रजतत्वनिष्ठापि प्रकारता भवति । अतस्तद्वन्निष्ठविशेष्यतानिरूपकत्वम्, तन्निष्ठप्रकारतानिरूपकत्वं च ज्ञाने प्रत्येकं वर्तत इत्यतिव्याप्तिरुक्ता । इदानीं तूक्तज्ञाने तत्पदेन रङ्गत्वस्य स्वीकारे, तद्वत् - रङ्गत्ववत् रङ्गम् । तन्निष्ठविशेष्यतानिरूपिता तु प्रकारता रजतत्वे वर्तते, न रङ्गत्वे । अतस्तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठ-प्रकारताशालित्वमुक्तसमूहालम्बने नास्ति । तत्पदेन रजतत्वस्वीकारेऽपि, तद्वत् रजतम् । तन्निष्ठविशेष्यतानिरूपिता प्रकारता रङ्गत्व एव वर्तते, न तु

तदभाववति तत्प्रकारकानुभवोऽयथार्थः । सैवाप्रमेत्युच्यते । (स एव भ्रम इत्युच्यते ।) यथा शुक्तौ इदं रजतम् इति ज्ञानम् ।

आलोक-व्याख्या

रजतत्वे । अतस्तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमुक्तसमूहालम्बने नास्तीति नातिव्याप्तिः ।। तथा च **तद्वन्निष्ठविशेष्यतानिरूपित-तन्निष्ठप्रकारताशालित्वे सति अनुभवत्वं यथार्थानुभवस्य लक्षणम्**।।

अथैवमपि रङ्गरजते दृष्ट्वा 'इमे रजते' इति समूहालम्बन-भ्रमेऽतिव्याप्तिर्दुर्वारा । तत्र रङ्गे, रजते उभयत्रापि रजतत्वं रङ्गत्वं च प्रकारः। तत्पदेन रजतत्वस्वीकारे, तद्वत् रजतम् । तन्निष्ठविशेष्यतानिरूपिता रजतत्वनिष्ठा प्रकारता भवत्येव । अतस्तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारता-शालित्वसत्त्वादुक्तभ्रमेऽतिव्याप्तिर्दुर्वारेति चेत्, न । तद्वन्निष्ठविशेष्यता-निरूपितत्वस्थाने तदभाववन्निष्ठविशेष्यत्वानिरूपितत्वस्य विवक्षणात् । तथा च **तदभाववन्निष्ठविशेष्यत्वानिरूपिततन्निष्ठप्रकारताशालित्वे सत्यनुभवत्वं** लक्षणम् । रजते 'इदं रजतम्' इति प्रमायां तत्पदेन रजतत्वग्रहणे। तदभावः रजतत्वाभावः । तद्वत् रङ्गम् । तन्निष्ठविशेष्यत्वानिरूपितत्वं रजतत्वनिष्ठप्रकारतायामस्तीति लक्षणसमन्वयः । एवञ्चोक्तसमूहालम्बनभ्रमे, रङ्गांशेऽपि रजतत्वस्य प्रकारतया भानात्, तत्पदेन रजतत्वस्य स्वीकारे, तदभाववत् - रजतत्वाभाववत् रङ्गं भवति । तादृशरङ्गनिष्ठविशेष्यतानिरूपितैव रजतत्वनिष्ठप्रकारता भवति, रजत इव रङ्गेऽपि रजतत्वस्यैव प्रकारतया भानात् । तथा च तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्व-मेवोक्तभ्रमे वर्तते, न तु तदभाववन्निष्ठविशेष्यत्वनिरूपिततन्निष्ठप्रकारता-शालित्वमिति नातिव्याप्तिः । एवञ्च **तदभाववन्निष्ठविशेष्यत्वानिरूपित-तन्निष्ठप्रकारताशालित्वे सति अनुभवत्वं** यथार्थानुभवस्य लक्षणम्।।

अयथार्थानुभवस्य लक्षणमाह - **तदभाववतीत्यादि** । तस्याभावः-

आलोक-व्याख्या

तदभावः। तदभावोऽस्मिन् अस्तीति तदभाववत् । तस्मिन् तदभाववति । 'तस्य' इत्यत्र तच्छब्दस्य प्रकारतया भासमानो धर्मोऽर्थः । षष्ठ्याः प्रतियोगित्वमर्थः । तत्र प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वयः । तथा च तन्निष्ठप्रतियोगिता । षष्ठ्यर्थप्रतियोगिताया अभावे निरूपकतासम्बन्धेनान्वयः। तथा च तन्निष्ठप्रतियोगितानिरूपकाभावः । 'अस्मिन्'इत्यत्र इदं शब्दस्य विशेष्यतया भासमानपदार्थोऽर्थः । सप्तम्या अधिकरणत्वमर्थः । प्रकृत्यर्थस्य - विशेष्यतया भासमानपदार्थस्याधेयतासम्बन्धेन सप्तम्यर्थाधिकरणतायामन्वयः। तथा च - विशेष्यतया भासमानपदार्थनिष्ठाधिकरणता । 'अस्ति' इत्यत्र असधातोराधेयत्वमर्थः । आख्यातस्याश्रयत्वमर्थः । आश्रयताया अभावेऽन्वयः। अधिकरणताया असधात्वर्थाधेयतायां निरूपितत्वसम्बन्धेनान्वयः । तथा च - विशेष्यतया भासमानपदार्थनिष्ठाधिकरणतानिरूपिताधेयताश्रयः इति खण्डवाक्यबोधः । एवञ्च - **विशेष्यतया भासमानपदार्थनिष्ठाधिकरणता-निरूपिताधेयताश्रयः प्रकारतया भासमानधर्मनिष्ठप्रतियोगितानिरूपकः अभावः** इति तदभावोऽस्मिन् अस्तीति विग्रहवाक्याद् बोधः ।।

'अन्यपदार्थप्रधानसमासादिवृत्तिस्थले' इत्यादिपूर्वोक्तनियमेन पूर्वं विशेष्यभूतोऽभाव इदानीं विशेषणं भवति । एवं पूर्वं विशेषणभूतो विशेष्यतया भासमानः पदार्थ इदानीं विशेष्यो भवति । तथा च - **तन्निष्ठप्रतियोगिता-निरूपकाभावनिष्ठाधेयतानिरूपिताधिकरणताश्रयो विशेष्यतया भासमानः पदार्थः** इति तदभाववान् इति समस्तवाक्याद् बोधः । 'तदभाववति' इत्यत्र सप्तम्या विशेष्यत्वमर्थः । प्रकृत्यर्थस्य - तदभाववतः सप्तम्यर्थविशेष्यतायामाधेयतासम्बन्धेनान्वयः । विशेष्यतायाः निरूपकत्व-सम्बन्धेनानुभवेऽन्वयः । तथा च - 'तदभाववति' इत्यस्य **तन्निष्ठ-प्रतियोगितानिरूपकाभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठ-विशेष्यतानिरूपकः'** इति बोधः ।।

आलोक-व्याख्या

'तत्प्रकारकः' इत्यत्र स प्रकारो यस्मिन् स इति तत्प्रकारकः । 'यस्मिन्' इत्यत्र यच्छब्दस्यानुभवोऽर्थः । सप्तम्याः प्रकारित्वमर्थः । तत्र च प्रकृत्यर्थस्याधेयतासम्बन्धेनान्वयः । तथा च - अनुभवनिष्ठप्रकारिता । 'प्रकार' इत्यस्य प्रकारतावान् अर्थः । सप्तम्यर्थप्रकारितायाः प्रकारतावान् इत्यस्यैकदेशे प्रकारतायां निरूपितत्वसम्बन्धेनान्वयः । 'तत्'शब्दस्य प्रकारीभूतो धर्मोऽर्थः । तथा च **'अनुभवनिष्ठ-प्रकारितानिरूपितप्रकारतावदभिन्नः सः = प्रकारीभूतो धर्म** इति विग्रहवाक्यबोधः ।।

'अन्यपदार्थप्रधानसमासादिवृत्तिस्थले' इति पूर्वोक्तनियमेन विशेषणविशेष्यभावव्यत्यासे कृते **'तन्निष्ठप्रकारतानिरूपितप्रकारिताश्रयाभिन्नोऽनुभव** इति समस्तवाक्याद् बोधः । आहत्य संपूर्णवाक्यस्याखण्डबोधस्तु - **'तन्निष्ठप्रतियोगितानिरूपकाभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठविशेष्यतानिरूपकाभिन्नः तन्निष्ठप्रकारतानिरूपितप्रकारिताश्रयाभिन्नोऽनुभवः'** इति । लक्षणं तु - **'तदभाववन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वम्'** इति। प्रकारतानिरूपितप्रकारिताश्रयः, प्रकारतानिरूपक इति द्वयं समानम् । शुक्तौ 'इदं रजतम्' इति भ्रमे लक्षणसमन्वयः । अत्र तत्पदेन रजतत्वं ग्राह्यम् । तदभावः=रजतत्वाभावः । रजतत्वाभाववती=शुक्तिः । तन्निष्ठा विशेष्यता। तन्निरूपकत्वं शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमे वर्तते । एवं 'तन्निष्ठप्रकारतानिरूपकत्वम्' इत्यत्र तत्पदेन रजतत्वस्य ग्रहणात् तन्निष्ठा प्रकारता=रजतत्वनिष्ठप्रकारता । तन्निरूपकत्वमपि शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमात्मकानुभवे वर्तते । एवं स्मृतिभिन्नत्वात् अनुभवत्वमपि वर्तत इति तदभाववन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वं शुक्तौ 'इदं रजतम्' इत्याकारकेऽयथार्थानुभवे वर्तत इति लक्षणसमन्वयः ।।

आलोक-व्याख्या

केवलं 'अनुभवत्व'मात्रोक्तौ रजते 'इदं रजतम्' इत्याकारकयथार्थानुभवेऽतिव्याप्तिः । तस्याप्यनुभवत्वात् (स्मृतिभिन्नत्वात्) । अतः 'तदभाववन्निष्ठविशेष्यतानिरूपकत्वं' इति विशेषणम् । तथा च नातिव्याप्तिः। तथाहि - रजते 'इदं रजतम्' इत्याकारकयथार्थानुभवे यद्यपि अनुभवत्वं वर्तते । तथाऽपि तत्र तदभाववन्निष्ठविशेष्यतानिरूपकत्वं नास्ति । प्रकृते चात्र तत् पदेन रजतत्वं ग्राह्यम् । तत् - रजतत्वम् । तद्वत्- रजतम् । तद्वन्निष्ठविशेष्यता रजतनिष्ठविशेष्यता । तादृशविशेष्यतानिरूपकत्वमेव वर्तते रजते 'इदं रजतम्' इत्याकारकज्ञाने, न तु तदभाववन्निष्ठविशेष्यतानिरूपकत्वमिति नातिव्याप्तिः ।।

'तदभाववन्निष्ठविशेष्यतानिरूपकत्वे सति अनुभवत्वम्' इत्येतावन्मात्रोक्तौ 'तन्निष्ठप्रकारतानिरूपकत्वम्' इत्येतद्वलाभावे पुनः रजते 'इदं रजतम्' इत्याकारकयथार्थप्रमायामतिव्याप्तिर्दुष्परिहरा । तथाहि - अत्र तत् पदेन (तत्पदस्य सर्वनामत्वात् बुद्धिस्थपरामर्शे) शुक्तित्वस्य ग्रहणे तत्—शुक्तित्वम् । तदभावः — शुक्तित्वाभावः । तदभाववत् = शुक्तित्वाभाववत् रजतम् । तन्निष्ठविशेष्यता शुक्तित्वाभाववद्रजतनिष्ठाविशेष्यता । तादृशविशेष्यतानिरूपकत्वे सति अनुभवत्वं रजते 'इदं रजतम्' इत्याकारकप्रमात्मकानुभवे वर्तत इति तत्रातिव्याप्तिः । अतः 'तन्निष्ठप्रकारतानिरूपकत्वम्' इत्युक्तम् । तथा च लक्षणम् - **तदभाववन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वम्** इति । तथा च नातिव्याप्तिः। तथाहि - यद्यपि रजते 'इदं रजतम्' इत्यत्र तत्पदेन शुक्तित्वग्रहणे तदभाववन्निष्ठविशेष्यतानिरूपकत्वे सति अनुभवत्वं वर्तते । तथाऽपि **'एकत्रोच्चरितयोः सर्वनामशब्दयोरेकार्थवोधकत्वम्'** इति नियमेन पूर्वं 'तत्'शब्देन शुक्तित्वस्य ग्रहणे

आलोक-व्याख्या

इदानीमपि शुक्तित्वमेव ग्राह्यम् । तथा च तत् - शुक्तित्वम् । तन्निष्ठप्रकारता-निरूपकत्वं रजते 'इदं रजतम्' इत्यत्र यथार्थज्ञाने नास्ति, किन्तु रजतत्वनिष्ठप्रकारतानिरूपकत्वमेवास्तीति तत्र नातिव्याप्तिः ।।

'तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वम्' इत्येतावन्मात्रोक्तौ 'तदभाववन्निष्ठविशेष्यतानिरूपकत्वम्' इत्येतद्लाभावे पुनः रजते 'इदं रजतम्' इत्यत्र यथार्थप्रमायामेवातिव्याप्तिर्दुष्परिहरा । तथाहि - 'तत्'पदेन रजतत्वस्य ग्रहणे तत् रजतत्वम् । तन्निष्ठप्रकारतानिरूपकत्वं रजते 'इदं रजतम्' इत्याकारिकायां यथार्थप्रमायां वर्तते । एवमनुभवत्वमपि वर्तत इति तत्राऽतिव्याप्तिः । अतः तदभाववन्निष्ठविशेष्यतानिरूपकत्वमुक्तम् । तथा च नातिव्याप्तिः । यद्यपि रजते 'इदं रजतम्' इत्याकारकयथार्थानुभवे रजतत्वनिष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वम् वर्तते, तथाऽपि तत्र तदभाववन्निष्ठविशेष्यतानिरूपकत्वं नास्ति । 'तत्'पदेन रजतत्वस्य ग्रहणात्, तदभाववत् - रजतत्वाभाववत् रजतं न भवति । रजतत्वस्य रजते विद्यमानत्वात्। अतः तत्र तद्वन्निष्ठविशेष्यतानिरूपकत्वमेव वर्तते, न तु तदभाववन्निष्ठ-विशेष्यतानिरूपकत्वम् । तदभाववन्निष्ठविशेष्यतानिरूपकत्वे सति अनुभवत्वं तु शुक्तौ 'इदं रजतम्' इत्याकारकभ्रमात्मके स्मृतिभिन्नेऽयथार्थानुभव एव वर्तत इति तत्र नातिव्याप्तिः ।।

'तदभाववन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वम्' अयथार्थानुभवस्य लक्षणम् इत्येतावन्मात्रोक्तौ 'अनुभवत्व'रूपपदस्या-निवेशेऽयथार्थस्मृतौ अतिव्याप्तिः । तथाहि - शुक्तिं दृष्ट्वा 'इदं रजतम्' इत्यनुभवानन्तरं कदाचित् जायमाने तादृशस्मृतिरूपज्ञाने तदभाववन्निष्ठ-विशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वं वर्तत इति तत्रातिव्याप्तिः । अतः 'अनुभवत्व'रूपदलमपि उक्तम् । एवञ्च नातिव्याप्तिः - यद्यपि

आलोक-व्याख्या

शुक्तौ 'इदं रजतम्' इत्याकारकायथार्थानुस्मृतौ तदभाववन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वं वर्तते, किन्तु अनुभवत्वं नास्ति । स्मृतेरनुभवभिन्नत्वात् । अतो नातिव्याप्तिः ।।

नन्वेवं सत्यपि रङ्गरजते दृष्ट्वा 'इमे रङ्गरजते' इत्याकारकसमूहालम्बन-प्रमायामतिव्याप्तिर्दुर्वारा । अस्यां हि प्रमायां रङ्गम्, रजतं च विशेष्ये । रङ्गत्वम्, रजतत्वं च यथासंख्यं विशेषणे । अत्र तत्पदेन रङ्गत्वस्य ग्रहणे, तदभावः=रङ्गत्वाभावः । तद्वत् रजतम् । तन्निष्ठविशेष्यता-निरूपकत्वं ज्ञाने वर्तते। एवं रङ्गत्वनिष्ठप्रकारतानिरूपकत्वं च वर्तते । अनुभवत्वं च वर्तत इत्यतिव्याप्तिः । एवं तत्पदेन रजतत्वस्वीकारेऽपि, तदभावः=रजतत्वाभावः । तद्वत् रङ्गम् । तन्निष्ठविशेष्यतानिरूपकत्वं ज्ञाने वर्तते । रजतत्वनिष्ठप्रकारतानिरूपकत्वं च वर्तते । अनुभवत्वं च वर्तत एवेत्यतिव्याप्तिरिति चेत्, न । प्रकारतानिरूपकत्वं विशेष्यतानिरूपकत्वं च साक्षात् ज्ञानेऽनिवेश्य, तदभाववन्निष्ठविशेष्यतानिरूपिता या तन्निष्ठप्रकारता, तन्निरूपकत्वविवक्षणेनातिव्याप्तेः परिहारात् । तत्पदेन रङ्गत्वस्वीकारे, तदभाववत् रजतम् । तन्निष्ठविशेष्यतानिरूपिता प्रकारता रजतत्वनिष्ठैव भवति, नतु रङ्गत्वनिष्ठा भवति । रजते रजतत्वस्यैव विशेषणतया भानात् । एवं तत्पदेन रजतत्वस्वीकारे, तदभाववत् रङ्गम् । तत्र रङ्गे रङ्गत्वस्यैव विशेषणतया भानात् । रजतत्वाभाववद्रङ्गनिष्ठविशेष्यतानिरूपिता प्रकारता रङ्गत्वनिष्ठा भवति, न तु रजतत्वनिष्ठा । अतः 'तदभाववन्निष्ठविशेष्यतानिरूपिता या तन्निष्ठा प्रकारता' इत्यस्याभावात्, तादृशप्रकारतानिरूपकत्वम् उक्तसमूहालम्बनप्रमायां नास्तीति नातिव्याप्तिः ।।

अस्मिन्नपि लक्षणे यथार्थानुभवलक्षण इव तदभाववन्निष्ठविशेष्यत्वा-वच्छिन्नतन्निष्ठप्रकारताशालित्वमेव विवक्षणीयम् इत्यादिविचारः समानः ।।

आलोक-व्याख्या

एवमस्य भ्रमस्य तदभाववति तत्प्रकारकत्वादेव, भ्रमोऽयमन्यथा-ख्यातिरित्युच्यते । अनन्तरं 'शुक्तिरेव रजततया मया गृहीता' इत्युल्लेखात् अन्यथाख्यातिरेव स्वरसा । 'इदम्' इति पुरोवर्तिशुक्तिविषयकं ज्ञानं प्रत्यक्षम्। 'रजतम्' इति तु स्मृतिरूपमन्यत् ज्ञानमिति प्राचीनमीमांसकाः । एवं ज्ञानद्वयरूपं सदपीदं तथा न ज्ञायत इत्यस्या अख्यातिरिति नाम । परं तु उभयोर्भिन्नज्ञानत्वेन उभयोः परस्परं निरूप्यनिरूपकभावासंभवात्, विशेषणविशेष्यभावोऽपि न स्यात् । दृश्यते च 'इदं रजतम्' इति ज्ञाने इदन्त्वावच्छिन्नविशेष्यतानिरूपिता रजतत्वनिष्ठा प्रकारता । अत इदमेकं विशिष्टं ज्ञानमित्यन्यथाख्यातिरेव साधीयसी ।।*

टिप्पणी

*ननु कथमन्यथाख्यातिरेव साधीयसी? शुक्तिं दृष्ट्वा रजतमिति ज्ञानं हि प्रत्यक्षम्। तथैव 'रजतं पश्यामि' इत्येवाभिलपन्ति सर्वेऽपि । प्रत्यक्षं चेन्द्रियसन्निकर्षजन्यम् । सन्निकर्षश्च चक्षुस्संयुक्तसमवेतत्वरूपः। चक्षुस्संयुक्ते घटादौ समवेतं किल घटत्वादिकं चक्षुषा गृह्यत इति वस्तुस्थितिः। प्रकृते चक्षुस्संयोगः शुक्त्या सहैव वर्तते । तत्समवायस्तु शुक्तित्व एव स्यात्, न तु रजतत्वे । एवं सति कथं रजतत्वस्य भानम्। न च रजतत्वेन यदि सन्निकर्षः स्यात्तदा कथं स भ्रमो भवेत्? अतोऽयं प्रश्नोऽसमञ्जस एवेति वाच्यम् । प्रश्नानभिज्ञो हि भवान् । पुरोवर्तिनि वस्तुनि विशेषणतया रजतत्वस्याभावेऽपि 'रजतं पश्यामि' इत्युल्लेखः कथं भवतीत्येव प्रश्नः। स उल्लेखः भ्रमरूप एवेति किलोच्यते । अतः को दोषः? यदि रजतत्वेन सन्निकर्षः स्यात् तर्हि कथं भ्रमो भवेदिति चेत्, पुनरभिप्रायानभिज्ञो भवान् । प्रत्यक्षकारणस्य इन्द्रियसन्निकर्षस्याभावेऽपि कथं प्रत्यक्षं भवेदित्येव प्रश्नः।।

अयि भोः! मदाशयानभिज्ञस्त्वमेव देवानाम्प्रियः। यदि रजतत्वेन सन्निकर्षः स्यात्तर्हि कथं स भ्रमो भवेत्? सन्निकर्षाभावेऽपि जायमानत्वादेव हि स भ्रम इत्युच्यते । सन्निकर्षो यदि वक्तव्यः, तर्हि तत्र वस्तुना भवितव्यम् । वस्त्वेव तत्र स्याच्चेत्, स

टिप्पणी

भ्रमः कथं भवेत्, अत एव तत्रासतो भानात्, असत्ख्यातिरेवेयमित्यपि हि केचिद्वदन्ति इति चेत्, असतः कथं ख्यातिरित्येव हि प्रश्नः। तथा संज्ञाकरणमात्रत्वात् कथं समस्यायाः परिहारः? इति चेत्, असुराणां प्रियस्त्वमेव मदाशयानभिज्ञः। 'सन्निकर्षाभावेऽपि' इत्युच्यते, 'जायमानत्वेऽपि' इत्यप्युच्यते। एवं वदता त्वया मेधाविना स्ववचनविरोधोऽपि नाज्ञायि। भ्रमोऽपि कार्यविशेष एव। कार्यं चेत् कारणं किञ्चित्स्यादेव। कारणाभावेऽपि कार्यं कथं स्यात्? सैव खलु समस्या प्रकृतेति चेत्; सत्यम्। समस्यैव कथं परिहर्तव्या? सावधानं श्रूयताम्। एवं पण्डितानां परस्पराशयापरिज्ञानादेव दर्शनप्रभेदा अप्यजायन्तेत्येव वस्तुस्थितिः। अतिस्थूले बाह्ये लौकिक एव विषये समस्यापरिहारमजानताम् अत्यन्तमान्तरे -- **'यस्यामतं तस्य मतम्, अविज्ञातं विजानताम् विज्ञातमविजानताम्'** इति वर्ण्यमानमतिगहनमान्तरमात्मतत्त्वं कियद्वा विवादविषयो भवेदित्यालोच्यताम्॥

प्रकृते चानुभवमेव परिशीलयामः। रज्जुसर्पभ्रमो वा शुक्तिरजतभ्रमो वा कथं भवतीति विचिन्त्यताम्। पुरतो वर्तमानां रज्जुं, शुक्तिं वा प्रथमं पश्यति जनः। ततस्तत्रालोकक्षयवशाद्वा यतः कुतश्चित्कारणतः तत्रत्योऽसाधारणधर्मः रज्जुत्वरूपः, शुक्तित्वरूपो वा न ग्रहीतुं शक्योऽभूत्। तदैव दीर्घत्वभास्वरशुक्लरूपादिसाधारणधर्मज्ञानात्, पूर्वं कदाचिद् दृष्टं सर्पं, रजतं वा स्मरतःपुरुषस्य एतदपि तदिति भ्रमो भवति। न ह्यज्ञातपूर्वसर्पस्य तादृशरजतस्य वा तादृशभ्रमसंभवः। अतो विशेषणांशस्य सर्पत्वस्य, रजतत्वस्य वोपस्थापकसामग्री न सन्निकर्षरूपा, किन्तु स्मृतिरेव। चक्षुस्संयुक्तसमवायस्तु पुरोवर्तिवस्तुगते दैर्घ्यादिरूपे, भास्वरशुक्लादिरूपे वा साधारणधर्मे विश्राम्यति। तदतिरिक्तं सर्पं, रजतं वा स्मर्तुं तदानीं कथं शक्यम्? ननु यदि विशेषणांशः स्मृतिरूप एव चेत् 'सर्पं पश्यामि''रजतं पश्यामि' इत्याकारकोऽनुभवः कथमिति चेत्, विशेष्येण साधारणधर्मेण च साकं चक्षुस्संन्निकर्षस्य सत्त्वात् तथानुभवो भवति।यथा च प्रत्यभिज्ञायामंशतः पूर्वानुभवपूर्वकत्वेऽपि न स्मृतित्वम्, किन्तु प्रत्यक्षत्वमेव। यथा वा 'सुरभि चन्दनम्' इत्यादौ युगपदिन्द्रियद्वयव्यापारासंभवात्, विशेष्यांशस्य चाक्षुषत्वेन तत्प्रभाववशाद्विशिष्टं ज्ञानं प्रत्यक्षमेव, तथैवात्रापि। अत एवात्र भ्रमस्थले **'स्मृतिप्रमोषवादः'** इत्यख्यातिवादिनः।

टिप्पणी

स्मृतिप्रमोषो नाम स्मृतित्वाग्रहणम्। अनुभवस्याभावरूपत्वासंभवात्, न केवलं स्मृतित्वाग्रहणम्, किन्तु प्रत्यक्षत्वग्रहणमपीत्यन्यथाख्यातिवादिनः। अत एव **'स्वारस्यमन्यथाख्यातौ'** इत्यभियुक्ताः॥

'सुरभि चन्दनम्' इत्यादौ तु सौरभं घ्राणेन्द्रियं गृह्णाति; चन्दनं चक्षुरिन्द्रियं गृह्णाति। क्षणभेदस्यातिसूक्ष्मत्वात् युगपद् ग्रहणमिति भाति। विशेषणविशेष्ययोरेकेन्द्रियग्राह्यत्वे न कश्चन क्लेशः। भ्रमस्थले तु अविद्यमानेन कथं चक्षुस्सन्निकर्षः? तदभावे च कथं 'रजतं पश्यामि' इत्युल्लेखः? इति समस्या। वस्तुतः भास्वरशुक्लरूपस्यैव रजतत्वबुद्धिप्रयोजकत्वेन, तस्य च तत्र सत्त्वेन, चक्षुस्संयुक्तसमवायरूपसन्निकर्षस्य सत्त्वे, तथा व्यवहारात्। तस्मात् सुसूक्ष्ममीक्षणेऽन्यथाख्यातिरेव स्वरसा॥

अत्रेदं चिन्तनीयम् -- विशेषणविशेष्योरेकेन्द्रियग्राह्यस्थले प्रमायां भ्रमे वा न कश्चन क्लेशः। भिन्नेन्द्रियग्राह्यत्वे 'सुरभि चन्दनम्' इत्यादौ तु सौरभ्यस्य घ्राणेन्द्रियग्राह्यत्वात्, चन्दनस्य च चक्षुरिन्द्रियग्राह्यत्वात्, युगपदिन्द्रियद्वयप्रवृत्तेरसंभवात्, ज्ञानलक्षणप्रत्यासत्त्यैव विशेषणभानमुपपादनीयम्। एवं सति 'सोऽयम्' इत्यादिप्रत्यभिज्ञायामपि, अतीतस्य तत्तांशस्य ज्ञानलक्षणविधयैव भानसंभवात्, एतदेवात्यन्तं साधीयः। विरुद्धकालद्वयसंबन्ध एकस्य कथमिति तु; कालस्याखण्डत्वेनैक्यात्, अतीतादिभेदस्यौपाधिकत्वेन वस्तुस्थिरत्ववादिनां तावान् कालः घटादेरेक एव काल इति न विरोधगन्धोऽपि। **'अशोकचक्रवर्तिकाले'** इत्यादिव्यवहारे, यावान् कालः अशोकेन राज्यं शासितं तावान् काल एव बोध्यत इत्यवश्याभ्युपगन्तव्यत्वेन, न विरोधः। **'सः'** इति भूततया निर्देशः, **'अयम्'** इति वर्तमाननिर्देशश्चेतरवस्तूपाधिकतयाऽपि संगच्छते। तत्तद्घटादिदृष्ट्या तु तावान् कालोऽखण्ड एक एवेति वस्तूनां स्थिरत्वसिद्धिः। प्रत्यभिज्ञायाः संस्कारसहकृतेन्द्रियजन्यत्वाङ्गीकारे, तस्या ग्रहणस्मरणात्मकत्वमेव वक्तव्यं भवेत्। तथा सति स्मरणस्य तद्धेतुभूतानुभवमुखनिरीक्षणेनैव प्रामाण्यस्योपपादनीयतया स्वतः प्रमाणत्वासंभवेन कालद्वयसंबन्धसिद्ध्या क्षणिकत्वसिद्धिदुराशाया अवकाशो भवेत्। अस्तु सत्यस्य तथात्वे कः प्रद्वेषः क्षणिकत्ववादिषु। तेन गृहधनकनकादिषु स्थिरत्वबुद्ध्या

यथार्थानुभवश्चतुर्विधः । प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ।

आलोक-व्याख्या

यथार्थानुभवं विभजते - **यथार्थेत्यादि** । **तत्करणम्** यथार्थानुभवकरणम्। करणवर्गे पठितस्य प्रत्यक्षपदस्य इन्द्रियमर्थः । कार्यवर्गे पठितस्य प्रत्यक्षस्य प्रत्यक्षज्ञानमर्थः। प्रत्यक्षात्मकानुभवे करणम् इन्द्रियम्, अनुमितौ

टिप्पणी

तेष्वभिमानस्य दुर्जयत्वमपि वारयितुं शक्यते । अन्ततः दीपज्वालायाम्, शरीरे च क्षणिकत्ववादस्यावर्जनीयत्वेन, तत्खण्डनं कथं कर्तुं शक्यमिति चेत्, सत्यम्-शरीरादिषु अभिमानादिनिवृत्त्यर्थं क्षणिकत्वोपदेशो वैदिकानामपीष्टः। **'जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्'** (भ.गी.१३-८)इत्याद्युपदेशा विलसन्त्येव शतशः। परन्तु क्षणिकत्वस्य वस्तुतः दुर्निरूपत्वात्तैः प्रसाध्यमानं क्षणिकत्वमप्रामाणिकम्। अतो वैराग्योपदेशोऽपि यथा प्रामाणिको भवेत् तथा कर्तव्यः। केनापि कारणेनापि असत्यवादो न हितावह इति वस्तुस्थितिकथनमावश्यकम्। तत्रापि तत्त्वनिर्णयार्थमेव प्रवृत्ते शास्त्रेऽतिवादास्त्याज्या एव । लोके क्षणिकपदवत्, स्थिरपदस्यापि विषयो वक्तव्यः। एतद्दृष्ट्यैव वैदिकैः क्षणिकत्ववादो निरस्यत इति ज्ञेयम् ॥

एवञ्च प्रकृते **'सोऽयम्'** इत्यादिप्रत्यभिज्ञायाः स्मृतिप्रत्यक्षसांकर्यरूपतायां, तस्या अप्रामाण्यनिराकरणमावश्यकमिति तन्निराक्रियते । तत्र तत्तांशस्य कथं भानमिति प्रश्ने, साक्षात् संस्कारात्तद्भानापेक्षया संस्कारमूलकस्मृत्या तद्भानं स्वरसम् । न च तथाभानस्यालौकिकसन्निकर्षमूलत्वापेक्षया, लौकिकोपायैरेव तत्समर्थनं युक्ततरमिति भावनीयम्,कार्यकारणभावनिश्चयस्य त्रैकालिकवस्तुप्रतीतिमूलकत्वं ह्यावश्यकम् । वह्नेर्धूमं प्रति कारणत्वं हि न वर्तमानकालमात्रविषयकम्। अतः सामान्यलक्षणप्रत्यासत्तिरावश्यकी । एवं 'सुरभि चन्दनम्' इत्यादौ ज्ञानलक्षणाप्यावश्यकी । योगजधर्मस्तु जगत्प्रसिद्धः। अतोऽलौकिकसन्निकर्षोऽनिवार्यः। प्रसिद्धषड्विधसन्निकर्षविलक्षणमिति दृष्ट्यैवालौकिकपदप्रयोगः। प्रकृते ज्ञानलक्षणसन्निकर्षेणैव प्रत्यभिज्ञायां विशेषणभानसंभवान्न कश्चन क्लेश इत्येव युक्ततरम् ॥

तत्करणमपि चतुर्विधम् - प्रत्यक्षानुमानोपमानशब्दभेदात् ।
असाधारणकारणं करणम् ।

आलोक-व्याख्या

करणम् अनुमानम्, उपमितौ करणम् उपमानम्, शाब्दबोधे करणं शब्द इति यथासंख्यमन्वयः ।।

करणस्य लक्षणमाह - **असाधारणेत्यादि** । न साधारणम् असाधारणम् । असाधारणं च तत् कारणम् असाधारणकारणमिति प्राचीनप्रक्रियानुरोधेन । **कालेश्वरादीनि साधारणकारणानि** । तानि हि मध्ये व्यापारमन्तरा साक्षात्कारणानि । एवञ्चासाधारणकारणं नाम व्यापारद्वारा कारणमिति **प्राचीनाशयः** । न चैवं तर्हि चक्रभ्रमणमपि साधारणकारणं स्यात्, तेषां व्यापारान्तराभावादिति वाच्यम्; दण्डादीनां कारणत्वनिर्वाहार्थं किल मध्ये चक्रभ्रमणकल्पनम् । अतस्तस्य तेनैव सिद्धमसाधारणत्वम् । नैवं कालादाविति ।।

साधारणं च तत् कारणं साधारणकारणम् । न साधारणकारणं असाधारणकारणमिति **नवीनमतानुरोधेन** । प्राचीनप्रक्रियानुसारेण बोधः -- असाधारणत्वं नाम व्यापारवत्त्वम् । व्यापारवत्कारणं करणमित्यर्थः । कारणं नाम कारणतावत् । व्यापारोऽस्मिन्नस्तीति व्यापारवत् । अस्येत्यत्र इदंशब्दस्य कारणमर्थः । सप्तम्या अधिकरणत्मर्थः । प्रकृत्यर्थस्याधेयता-संबन्धेनान्वयः । अस्धातोराधेयत्वमर्थः । आख्यातस्याश्रयत्वमर्थः । सप्तम्यर्थाधिकरणताया निरूपितत्वसंबन्धेनाधेयतायामन्वयः । तथा च **कारणनिष्ठाधिकरणतानिरूपिताधेयताश्रयो व्यापार** इति विग्रह-वाक्यबोधः। **व्यापारनिष्ठाधेयतानिरूपिताधिकरणतावत् कारणम्** इति समासवाक्यबोधः । तथा च व्यापारविशिष्टमिति व्यापारवत्पदस्यार्थः । वैशिष्ट्यं च जनकत्वरूपम् । आधाराधेयभावोऽपि जनकतासंबन्धेन । व्यापारजनकं कारणं करणमित्यर्थः ।।

आलोक-व्याख्या

तज्जन्यत्वे सति तज्जन्यजनको व्यापारः । यथा दण्डश्चक्रभ्रमण-द्वारा घटं जनयति । अतो द्वारभूतं चक्रभ्रमणं व्यापार इत्युच्यते । दण्डजन्यत्वमात्रोक्तौ फले घटेऽतिव्याप्तिः । अतस्तज्जन्यजनकत्वम् । दण्डजन्यघटजनकत्वस्य घटेऽभावान्नातिव्याप्तिः । तज्जन्यजनकत्वमात्रोक्तौ करण एवातिव्याप्तिः । दण्डजन्यघटजनकत्वस्य दण्ड एव सत्त्वात् दण्डो व्यापारो भवेत् । अतस्तज्जन्यत्वम् । दण्डस्य दण्डजन्यत्वाभावान्नातिव्याप्तिः।।

व्यापारवत्त्वे सति कारणत्वं करणस्य लक्षणम् । अस्य लक्षणस्य दण्डरूपकरणे समन्वयः । तथा हि - चक्रभ्रमणरूपव्यापार-निरूपितहेतुत्वं दण्डे वर्तत इति व्यापारवत्त्वं तत्र वर्तते । एवं घटं प्रति कारणत्वमपि वर्तत इति लक्षणसमन्वयः। केवलं 'कारणत्व'मात्रोक्तौ साधारणकारणे कालादावतिव्याप्तिः । अतः 'व्यापारवत्त्वम्' इत्युक्तम् । कालेश्वरादीनां कार्यसामान्यं प्रति साक्षात्कारणत्वम्, न तु सद्वारककारणत्वम्, तेन च तानि व्यापारवत्कारणानि न भवितुमर्हन्तीति नातिव्याप्तिः। केवलं 'व्यापारवत्त्वम्' इत्येतावन्मात्रोक्तौ फले (घटरूपफले) करणलक्षणस्यातिव्याप्तिः। घटरूपकार्येऽपि व्यापारजन्यत्वरूपस्य सम्बन्धस्य विद्यमानत्वात् व्यापारवत्त्वं फले (घटरूपकार्येऽपि) वर्तते इत्यतः 'कारणत्वम्' इति दलम् दत्तम् । तथा च नातिव्याप्तिः । घटरूपफलं न कारणं, किन्तु कार्यम् । अतो न काऽपि हानिः । एतत् **प्राचीनप्रक्रियानुसारेण** बोध्यम्।।

नवीनप्रक्रियानुसारेण तु--साधारणकारणत्वं नाम - **कार्यत्वाव-च्छिन्नकार्यतानिरूपितकारणताश्रयत्वम्** । असाधारणत्वं नाम **कार्यत्व-व्याप्यधर्मावच्छिन्नकार्यता-निरूपितकारणताश्रयत्वम्** । आश्रयत्वस्य चाभेदसम्बन्धेन करणे अन्वयः । तथा च - **कार्यत्वव्याप्य-धर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयाभिन्नं करणम्** इति शाब्दबोधः।

आलोक-व्याख्या

लक्षणं तु - **कार्यत्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणत्वम्** । अस्य लक्षणस्य दण्डादौ समन्वयः । तथाहि - कार्यत्वव्याप्यधर्मावच्छिन्ना कार्यता केति चेत् ? घटत्वाव-च्छिन्ना कार्यता । तादृशकार्यतानिरूपितकारणत्वं दण्डरूपकरणे वर्तत इति समन्वयः।।

ननु केवलं कार्यत्वावच्छिन्नकार्यतानिरूपितकारणत्वम् इति साधारण-कारणत्वमुच्यते चेत्, कालेश्वरादावतिव्याप्तिर्भवेत्, तेषामपि कार्यसामान्यं प्रति कारणत्वात् । तथाहि - कार्यत्वावच्छिन्ना कार्यता इति चेत् ? घटपटकुड्यादिनिष्ठकार्यता । सा कार्यता सर्वसाधारणी कार्यता । तन्निरूपितकारणत्वं तु कालादवपि वर्तत इत्यतिव्याप्तिरिति चेत्, न । अत्र घटनिष्ठकार्यता न कार्यत्वावच्छिन्ना किन्तु कार्यत्वव्याप्यघटत्वादिधर्मावच्छिन्ना। तथा च नातिव्याप्तिः । तथाहि - घटे कार्यताद्वयं वर्तते । एका कार्यत्वावच्छिन्ना सर्वसाधारणी कार्यनिष्ठकार्यता । अन्या तु कार्यत्वव्याप्यघटत्वधर्मावच्छिन्ना विशेषकार्यता । अस्मिन् लक्षणे कार्यत्वव्याप्यघटत्वधर्मावच्छिन्नकार्यताया विवक्षितत्वात् कार्यत्वव्याप्यघटत्वादिधर्मावच्छिन्नकार्यता केति चेत् ? घटत्वावच्छिन्नघटनिष्ठा कार्यता । तादृशकार्यतानिरूपितकारणत्वं दण्डे एव वर्तते न तु कालादौ । कुत इति चेत् ? नवीनानां मते घटत्वावच्छिन्नघटकार्यं प्रति कालादीनां कारणत्वानङ्गीकारात्, कार्यत्वावच्छिन्नघटनिष्ठकार्यं प्रत्येव कालेश्वरादृष्टादीनां कारणत्वात्, इति तत्र लक्षणासमन्वयान्नातिव्याप्तिरिति।।

अर्वाचीनास्तु—फलाव्यवहितप्राक्क्षणावच्छिन्नं कारणं करणमित्याहुः । एतद्दृष्ट्या करणकारणपदार्थौ विपरीतौ भवतः । **'लिङ्ग-परामर्शोऽनुमानम्'** इत्येतदेतन्मतानुसारेण । इदं तु पाणिनिसूत्रादिविरुद्धम्। किन्तु व्यापारवत्कारणं करणमित्येव समीचीनम् ।।

कार्यनियतपूर्ववृत्ति कारणम् ।

आलोक-व्याख्या

कारणलक्षणमाह - **कार्येत्यादि** । नियतं च तत् पूर्ववृत्ति च नियतपूर्ववृत्ति। कार्यस्य नियतपूर्ववृत्ति कार्यनियतपूर्ववृत्तीति विग्रहः । कार्यस्य नियतं कार्यस्य पूर्ववृत्ति चेत्यर्थः । 'कार्यस्य' इत्यत्र षष्ठ्या निरूपितत्वमर्थः। नियतत्वं नाम - व्यापकत्वम् । व्यापकत्वं नाम - **तदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम्** । षष्ठ्यर्थनिरूपितत्वस्याश्रयतासम्बन्धेन अधिकरणतावदेकदेशेऽधिकरणतायामन्वयः । तथा च कार्यनिरूपिताधिकरणतावद्वृत्त्यत्यन्ताभावाप्रतियोगित्वाश्रयः । आश्रयत्वस्याभेदसम्बन्धेन कारणेऽन्वयः। तथा च **कार्यनिरूपिताधिकरणतावद्वृत्त्यत्यन्ताभावाप्रतियोगित्वाश्रयाभिन्नं कारणम्** । एवं कार्यस्य पूर्ववृत्ति इत्यत्र षष्ठ्या निरूपितत्वमर्थः । पूर्ववृत्तित्वस्याश्रयतासम्बन्धेन कारणेऽन्वयः । तथा च - कार्यनिरूपितपूर्ववृत्तित्वाश्रयाभिन्नं कारणम् । तथा च आहत्य बोधः -**'कार्यनिरूपितत्वाश्रयाधिकरणतावद्वृत्त्य(कार्याधिकरणवृत्त्य)त्यन्ताभावाप्रतियोग्यभिन्नं कार्यनिरूपितपूर्ववृत्त्यभिन्नं कारणम्** इति । लक्षणं तु - **कार्याधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वे सति कार्यपूर्ववृत्तित्वं कारणत्वम्** । 'घटं प्रति दण्डः कारणम्' इत्यत्र दण्डरूपकारणे समन्वयः । कार्याधिकरणम् (घटाधिकरणम्) घटोत्पत्तिदेशः । तद्वृत्तिर्योऽत्यन्ताभाव इति चेत् ? न हि दण्डाभावो भवितुमर्हति । किन्तु - पटाद्यभावः । तत्प्रतियोगि पटादिवस्तु। अप्रतियोगी दण्ड इति दण्डे घटाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वं वर्तते, एवं घटपूर्ववृत्तित्वमपि वर्तते । 'कार्यपूर्ववृत्तित्वम्' कारणत्वम् इत्येतावन्मात्रोक्तौ रासभादावतिव्याप्तिः । तस्याऽपि घटपूर्ववृत्तित्वमाकस्मिकतया वर्तते । अतः 'कार्यनियतत्वम्' इति विशेषणम् । यद्यपि रासभादौ कार्यपूर्ववृत्तित्वमस्ति, परन्तु कार्यनियतत्वं नास्ति । कुत इति चेत् ? अन्यत्र कुत्रचित् रासभाभावेऽपि

आलोक-व्याख्या

घटोत्पत्तेर्दर्शनात् तदधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वमेव भवति रासभादौ, अप्रतियोगित्वं न भवतीति तत्र नातिव्याप्तिः । केवलं कार्यनियतत्वमात्रोक्तौ घटे(कार्ये) अतिव्याप्तिः । कार्याधिकरणवृत्त्यत्यन्ताभाव इति चेत्, कार्याधिकरणे न हि घटात्यन्ताभावो भवितुमर्हति । घटाधिकरणे घटाभावः कथं स्यात् ? अतः पटाद्यभावः स्वीकार्यः । तत्प्रतियोगी पटः । अप्रतियोगी घटो भवत्येवेति घटरूपकार्य एव कारणलक्षणस्यातिव्याप्तिः । अतः कार्यपूर्ववृत्तित्वविशेषणम् । स्वस्य स्वपूर्ववृत्तित्वस्य विरुद्धत्वात् घटपूर्ववृत्तित्वं घटे नास्तीति नातिव्याप्तिः ।।*

टिप्पणी

* **अन्यथासिद्धिः** -- कार्यनियतपूर्ववृत्ति कारणमिति कारणलक्षणमुक्तम् । कार्यनियतत्वं च कार्यकारणयोरन्वयव्यतिरेकसहचारदर्शनादवसीयते। यत्सत्त्वे यत्सत्त्वम् -- अन्वयसहचारः। यदभावे यदभाव इति व्यतिरेकसहचारः। यथा - दण्डसत्त्वे घटसत्त्वम्,दण्डाभावे घटाभाव इति । परन्तु दण्डे सति तेन साकमेव दण्डगतरूप-दण्डत्वयोरपि सत्त्वेन अन्वयव्यतिरेकसहचारदर्शनस्य तयोरपि समानत्वात् घटकारणत्वापत्तिरित्याक्षेप इष्टापत्तिरिति न कोऽपि वदति । तत् कुतः? इति विमर्शनीयम् ।। एवं सति दण्डरूपसत्त्वे घटसत्त्वम्, दण्डरूपाभावे घटाभाव इति वा दण्डत्वसत्त्वे घटसत्त्वम्, दण्डत्वाभावे घटाभाव इति वा नियमं न कोऽपि हि वक्ति । तत् कुत इति प्रष्टव्यम् । कारणेन सहाविनाभूतानां बहूनां पदार्थानामन्वयव्यतिरेकयोस्समानत्वेऽपि, कारणत्वं को वा जानाति अनुभवे वर्तमानो जनः? अनुभवदूराणां केवलवाचाटानामेवेयमाशङ्का । स्तनन्धयोऽपि बुभुक्षाशमनं मात्रधीनं जानाति, तामुपसर्पति च । कार्यकारणभावमयो हि लोकस्सर्वं स्वयं ज्ञात्वा सदा प्रयतमानो दृश्यत एवेत्यन्यथासिद्धिशङ्का पुस्तकपण्डितानामेव ।। किञ्चान्ते **अवश्यक ष्तनियतपूर्ववृत्तिभिरेव कार्यसंभवे तद्भिन्नं सर्वमन्यथासिद्धम्** इत्येव पर्यवसानस्य प्रदर्शनेन, तस्मिन् कारणत्वनिर्णायकस्य नियतपूर्ववृत्तित्वस्यैव प्रवेशनेऽन्योन्याश्रयादिश्च । अतः क्षोदक्षमविचारेण ज्ञायते— शब्दवर्धनपराणामनुभवरहितानामेवायमाडम्बरः ।।

कार्यं प्रागभावप्रतियोगि ।

आलोक-व्याख्या

व्यापारवत्कारणं करणमिति **प्राचीनाः** । असाधारणं कारणं करणमिति **नव्याः**। फलाव्यवहितप्राक्क्षणावच्छिन्नं कारणं करणमित्यत्**यर्वाचीनाः** । परन्तु **'साधकतमं करणम्'**इति भगवान् **पाणिनिः** । अतिशयेन साधकं साधकतममिति संप्रतिपन्नम् । अतिशयः कः? अस्योत्तरदानेऽत्यन्तं क्लिश्यन्ति मेधाविनोऽपि । सप्तविधकारकेषु अन्यतमं तु करणकारकम् । तच्च तृतीयान्तपदवाच्यम् । 'असिना छिनत्ति' 'चक्षुषा पश्यति' 'पद्भ्यां गच्छति' इत्यादिव्यापाराविष्टं कारकं करणमिति प्राचीनमतमेव साधीयः । कारकाणां मध्ये तृतीयाप्रकृत्यर्थभूतमेव अस्यादिकमुद्यमनादिरूपकर्तृक्रिययाऽऽविष्टं भवतीति तदेव करणम्, नान्यत्काष्ठादिकम् । काष्ठादिकं तु कर्तृक्रियाजन्यफलशालित्वात् कर्म भवति । चैत्रः असिना काष्ठानि छिनत्ति इति खलु प्रयोगः । अतः त्रिविधकारणेषु यत् क्रियाविष्टम्, तदेव करणम् । अधिकमन्यत्र ।।

कार्यस्य लक्षणमाह - **कार्यमित्यादि** । प्रागभावस्य प्रतियोगि प्रागभाव-प्रतियोगि । 'प्रागभावस्य' इत्यत्र प्रकृतेः प्रागभावोऽर्थः । षष्ठ्या निरूपितत्वमर्थः। 'प्रतियोगि' इत्यस्य प्रतियोगितावत् अर्थः । षष्ठ्यर्थ-निरूपितत्वस्याश्रयतासम्बन्धेन प्रतियोगितावदेकदेशे प्रतियोगितायामन्वयः। तथा च प्रागभावनिरूपितत्वाश्रयप्रतियोगितावत्(प्रतियोगिताश्रयः) इत्यासीत्। आश्रयस्य चाभेदसम्बन्धेन कार्येऽन्वयः। तथा च - **प्रागभावनिरूपित-प्रतियोगितावदभिन्नं कार्यम्** इति बोधः । लक्षणं तु - **प्रागभावप्रतियोगि-त्वम्** । लक्षणस्यास्य घटरूपकार्ये समन्वयः । यस्मिन् कार्ये समन्वयः कर्तव्यः, तस्य प्रागभावो ग्राह्यः । प्रकृते घटरूपकार्ये समन्वयस्य कर्तव्यत्वात् घटप्रागभावः स्वीकर्तव्यः । प्रागभावः घटप्रागभावः । तन्निरूपितप्रतियोगित्वं घटे वर्तत इति लक्षणसमन्वयः । केवलं 'अभावप्रतियोगित्वम्' इत्येतावन्मात्रोक्तौ

आलोक-व्याख्या

नित्येऽप्याकाशे अतिव्याप्तिर्दुष्परिहरा । तथाहि प्रकृते 'अभावः' इत्यनेन अन्योऽन्याभावस्वीकारे 'घटः आकाशो न' इत्याकारकान्योऽन्याभावप्रतीतेः प्रामाणिकत्वात्, तत्प्रतियोगित्वमाकाशे भवति । किन्तु आकाशस्तु नित्यः। तस्य कार्यत्वापत्तिः । अतस्तत्राऽतिव्याप्तिः । अतः प्रागभावेत्युक्तम् । तेन चान्योन्याभावस्य स्वीकर्तुमशक्यत्वात् नातिव्याप्तिः । आकाशस्य नित्यत्वात्, तस्य प्रागभावाभावात् नातिव्याप्तिः ।।

कारणलक्षणस्य प्रदर्शितत्वात्, कारणतानिरूपकं कार्यमिति वस्तु-स्थितिः । पूर्वमसत् कारकव्यापारैर्निष्पाद्यते इति सिद्धान्तात् । **असत्कार्यवादिनो ह्येते** । तद्दृष्ट्या प्रागभावप्रतियोगित्वं लक्षणमुक्तम् । नन्वसतः शशशृङ्गादेः उत्पत्त्यभावात्, कथं कार्यम-सदित्युच्यत इति चेत्, सतो वात्मादेरुत्पत्त्यभावात् सत्कार्यवादो वा कथम् ? वस्तुतस्तु - शशशृङ्गमिति न कश्चन पदार्थः । अतः सर्वथासतः शशशृङ्गादेरपि नोत्पत्तिः । सदा सत आत्मादेरपि उत्पत्ति-र्नास्ति । किन्तु, कदाचिदसतः कदाचित्सत्त्वमेव ज्ञापयति असत्कार्यवादस्य प्रामाणिकताम् । **वस्तुतस्त्वारम्भवादिन एते** । 'कटं कर्तुमारभते' 'घटं कर्तुमारभते' 'पटं कर्तुमारभते' इत्येव व्यवहारात् 'आरम्भवादः' इत्येवास्य नाम । इयमेवैतच्छास्त्रमर्यादा ।।*

टिप्पणी

* कार्यकारणभावस्थलं चतुर्विधं दृश्यते --

(१) **असत्कार्यवादः** अथवा **आरम्भवादः नैयायिकानाम्** ।

(२) **सत्कार्यवादः** अथवा **परिणामवादः सांख्यानाम्** ।

(३) **संघातवादः** बौद्धानां -- **वैभाषिकाणां सौत्रान्तिकानाञ्च** ।

(४) **विवर्तवादः कार्यमिथ्यात्ववादः बौद्धानाम्, निर्विशेषाद्वैतवादिनां शाङ्कराणां, शब्दविवर्तवादिनां वैयाकरणानां च** । बौद्धेष्वपि योगाचाराः विज्ञानविर्तवादिनः,

कारणं त्रिविधम् – समवाय्यसमवायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः ।

आलोक-व्याख्या

समवायिकारणं लक्षयति - **यत्समवेतमित्यादि** । पटादिकं स्वावयवेषु तन्तुषु समवायसंबन्धेनोत्पद्यते, अवयवावयविनोस्समवायात् । अतोऽत्र

टिप्पणी

माध्यमिकास्तु शून्यविवर्तवादिनः । कार्यकारणभाव एव नास्ति, अन्वयतो व्यतिरेकतश्च व्यभिचारात् इति सर्वापलापवादिनः, तदनुयायिनश्च । अतश्च असत्कार्यवादो द्विविधः— पूर्वमसत्, अनन्तरं सदित्येकः । पूर्वमप्यसत्, अनन्तरमप्यसदिति द्वितीयः। आद्यो वैदिकानाम् ,द्वितीयः सर्वापलापवादिनां बौद्धानाम् । वैदिकास्तु सर्वास्तित्ववादिनः । अत एव सत्कार्यवादिनः । न्यायशास्त्रस्य लोकाश्रयत्वात्, पुरुषप्रयत्नस्यास्ति लोके स्थानम् । जानाति, इच्छति,यतत इति खलु लौकिकक्रमः । अत एवैते आरम्भवादिनः। आरम्भः प्रयत्नः । **कटं कर्तुमारभते, घटं कर्तुमारभते** इति खलु व्यवहरन्ति लोके । एतावदेव क्षेत्रं न्यायशास्त्रस्य । बीजं वृक्षरूपेण परिणमते इति तत्र परिणामवाद एव । अलौकिकस्स विषय इति न तत् क्षेत्रं न्यायशास्त्रस्य । इतरवादास्तु तत्त्वमुक्ताकलापव्याख्यायां द्रष्टव्याः ।। अन्वयव्यतिरेकव्यभिचारपरिहारादिकं मङ्गलवादोक्तन्यायेन ज्ञेयम् ।।

सारतस्तु — मनुष्याणामशक्त्या दुर्निरूपत्वविचारोऽन्यः, वस्तुस्थितिवादोऽन्यः । तावता कार्यकारणभाव एव नास्तीत्यादिकम् अहङ्कारादज्ञानाद्वा भवेत् । अन्यथा भोजनादावपि प्रवृत्तिर्न स्यात् । क्षुन्निवृत्तिसाधनत्वं ज्ञात्वा तु प्रतिदिनं भुञ्जते नरः। अत एवोक्तमभियुक्तैः **कार्यकारणभावापलापे चार्वाका निराहारा म्रियेरन्**— इति त्रिकालसत्यम् ।।

विवर्तपरिणामवादयोः स्वरूपादिकं तत्त्वमुक्ताकलापव्याख्यायां सर्वङ्कषाया विस्तरेण प्रदर्शितम् । अधिकं सत्यसिद्धौ द्रष्टव्यम् ।।

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत्कारणमसमवायिकारणम् । यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटगतरूपस्य च ।

आलोक-व्याख्या

कार्यतावच्छेदकसंबन्धः समवायः । तन्त्वादीनां कारणतावच्छेदकसंबन्धस्तु तादात्म्यम् ।कार्यकारणयोरेकाधिकरणवृत्तित्वम्—सामानाधिकरण्यम् आवश्यकम् । अत एव व्यधिकरणयोः कार्यकारणभावः कुत्रापि न भवति । एवं पटगतरूपं प्रति पटः समवायिकारणम् । अत्र रूपं पटे समवायसम्बन्धेन जायते । पटश्च तादात्म्यसंबन्धेन कारणम् । अतश्च **समवायसंवन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंवन्धावच्छिन्नकारणत्वं समवायिकारणस्य लक्षणम् ।।**

प्रथमदलमात्रोक्तौ वक्ष्यमाणेऽसमवायिकारणेऽतिव्याप्तिः । अतो द्वितीयदलम् । द्वितीयदलमात्रोक्तौ प्रत्यक्षज्ञानस्य निमित्तकारणभूते विषयेऽतिव्याप्तिः । विषयतासंबन्धेन घटप्रत्यक्षं प्रति तादात्म्यसंबन्धेन विषयीभूतघटस्य कारणत्वात् । अतः प्रथमदलम् ।।

असमवायिकारणं लक्षयति - **कार्येणेत्यादि** । कार्येण सहैकस्मिन्नर्थे समवेतं सत् कारणमसवायिकारणमित्येकविधम् । कारणेन सहैकस्मिन्नर्थे समवेतं सत् कारणं द्वितीयमसमवायिकारणम् । आद्यं तन्तुसंयोगः पटस्य। द्वितीयं तन्तुरूपं पटरूपस्य । पटो हि तन्तुषु समवायसंबन्धेन जायते । तन्तुसंयोगोऽपि तन्तुषु समवायसंबन्धेन वर्तते, गुणगुणिनोस्समवायात् । तथा च **समवायसंवन्धावच्छिन्नकार्यतानिरूपितसमवायसंवन्धावच्छिन्नकारणत्वं** प्रथमासमवायिकारणस्य लक्षणम् । प्रथमदलमात्रोक्तौ समवायिकारणेऽतिव्याप्तिः स्पष्टा । एवं द्वितीयासमवायिकारणेऽप्यतिव्याप्तिः स्पष्टा । अतो द्वितीयदलम् । द्वितीयदलमात्रोक्तौ घटादिप्रत्यक्षनिमित्तकारणे

आलोक-व्याख्या

रूपादावतिव्याप्तिः । विषयतासंबन्धेन घटप्रत्यक्षं प्रति समवायसंबन्धेन रूपस्य कारणत्वात् । तदर्थं प्रथमदलम्।।

कारणेन सहेत्यादि । द्वितीयासमवायिकारणम् । कारणेन स्वकार्य-समवायिकारणेनेत्यर्थः । यथा तन्तुरूपं पटरूपं प्रत्यसमवायिकारणम् । पटरूपं हि पटे समवायसंबन्धेनोत्पद्यते । तन्तुरूपं च तत्र स्वसमवायि-समवेतत्वसंबन्धेन वर्तते । स्वं तन्तुरूपम् । स्वसमवायिनस्तन्तवः, गुणगुणिनोस्समवायात् । तन्तुषु पटः समवायसंबन्धेन वर्तते, अवयवावयविनोः समवायात् । अतश्च **समवायसंवन्धावच्छिन्नकार्यतानिरूपित-स्वसमवायिसमवेतत्वसंवन्धावच्छिन्नकारणत्वं** द्वितीयासमवायिकार-णत्वम् । प्रथमदलमात्रोक्तौ समवायिकारणेऽतिव्याप्तिः स्पष्टा । अतो द्वितीय-दलम् । द्वितीयदलमात्रोक्तौ विषयतासंबन्धेन घटत्वादिप्रत्यक्षं प्रति निमित्त-कारणभूते रूपादावतिव्याप्तिः । स्वं रूपम् । स्वसमवायि घटः । तत्समवेतं घटत्वम्। अतो रूपं स्वसमवायिसमवेतत्त्वसंबन्धेन घटत्वप्रत्यक्षं प्रति कारणमित्यतिव्याप्तिः । अतः प्रथमदलम् ।।

नन्वत्र स्वसमवायिसमवेतत्वसंबन्धावच्छिन्नकार्यतानिरूपितसमवाय-संबन्धावच्छिन्नं कारणं द्वितीयासमवायिकारणमित्येव कथने का हानिः । स्वं पटरूपम्, स्वसमवायी पटः । तत्समवेताः तन्तवः । अत्रैव तन्तुरूपमपि समवायसंबन्धेन वर्तत इति कारणं भवति । अतः संबन्धयोः वैपरीत्ये का हानिरिति चेत् - न । चित्रपटस्थले पटरूपं प्रति तन्तुरूपस्य कारणत्वानुपपत्तेः। नानारूपैस्तन्तुभिः चित्रपटो निर्मीयते । स्वं चित्रपटरूपम्। स्वसमवायी पटः। तत्समवेतत्वं नीलतन्तुषु वर्तते । तत्र रक्ततन्तुरूपस्य समवायसंबन्धेनासत्त्वात् व्यभिचारापत्तिः । चित्रपटरूपं प्रति हि नीलतन्तवोऽपि कारणम्, रक्ततन्तवोऽपि कारणम् । अतः स्वसमवायिसमवेतत्वपदेन नीलतन्तुस्वीकारे, वा रक्त-

तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य ।

आलोक-व्याख्या

तन्तुस्वीकारे वा कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वात् रूपान्तरस्य व्यभिचारो दुष्परिहरः । अतः समवायसंबन्धावच्छिन्नकार्यतानिरूपित-स्वसमवायिसमवेतत्व-संबन्धावच्छिन्नं कारणत्वमेव वक्तव्यम् । एवं सति तु समवायसंबन्धेन चित्रपटरूपं चित्रपटे वर्तते । चित्रपटे तु नीलतन्तुरूपं रक्ततन्तुरूपमित्यादिरूपं सर्वं स्वसमवायिसमवेतत्वसंबन्धेन वर्तते । स्वं नीलरूपं रक्तरूपमित्यादि । तत्समवेतास्तु नीलतन्तवः, रक्ततन्तव इत्यादयस्सर्वे तन्तवः । तत्समवेतश्चित्रपटः, तत्रैव चित्ररूपं समवायसंबन्धेनोत्पद्यत इति कारणत्वनिर्वाहात् संबन्धविपर्यासो न कर्तुं शक्यः।।

निमित्तकारणं लक्षयति - **तदुभयेत्यादि** । समवायिकारणभिन्नम् असमवायिकारणभिन्नं कारणं निमित्तकारणमित्यर्थः । तुर्यां किल पटः संयोगसंबन्धेनोत्पद्यते । अतः संयोगसंबन्धावच्छिन्नपटत्वावच्छिन्न-कार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्ना कारणता तुर्यां वर्तते । अत्र कार्यतायाः संयोगसंबन्धावच्छिन्नत्वात् तुर्याः समवाय्यसमवायि-कारणत्वव्यावृत्तिः, उभयत्रापि कार्यतायाः समवायसंबन्धावच्छिन्नत्वात् । अतः समवाय्यसमवायिकारणभिन्नं कारणमिति लक्षणसमन्वयः । अत्र यद्यपि घटनिमित्तकारणभूतदण्डादेः स्वगतरूपं प्रति समवायिकारणत्वात्, दण्डः समवायिकारणमपि भवतीति समवायिकारणभिन्नत्वाभावादसंभवः । अथापि कार्यभेदात् कारणतापि भिद्यते। रूपनिरूपितसमवायिकारणता भिन्ना, घटनिरूपितनिमित्तकारणता च भिन्ना, निरूपकभेदात् निरूप्यभेदस्यावश्यकत्वात् । परस्परविरुद्धयोः पुत्रत्वपितृत्व-योर्निरूपकभेदेनैकत्र सत्त्वे विरोधाभावात् । अतश्च **समवायिकारणताभिन्नत्वे सति असमवायिकारणताभिन्नत्वे सति कारणत्वं निमित्तकारणस्य लक्षणम्** । दलप्रयोजनं तु स्पष्टमेव ।।

तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । तद् द्विविधम् - निर्विकल्पकं सविकल्पकं चेति । निष्प्रकारकं ज्ञानं निर्विकल्पकम् । सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयं, पाचकोऽयमिति ।

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसंनिकर्षः षड्विधः ।

आलोक-व्याख्या

एवं कारणानां लक्षणेऽभिहिते, करणमेतदनन्तर्भूतमिति शङ्का मा भूदित्यर्थं करणस्वरूपं प्रदर्शयति - **तदेतदित्यादि** । असाधारणमिति । कालेश्वरादृष्टादिकं मध्ये द्वारमन्तरा साक्षादेव सर्वकार्यकारणम् । अतोऽसाधारणत्वं व्यापारवत्त्वमेव, न तु प्रधान्यादिरूपम्, इत्यादिकमनुपदमेवोक्तम् ।।

निष्प्रकारकमिति । अत एवातीन्द्रियम्, शब्दानभिलप्यं च । विशिष्टबुद्धिं प्रति विशेषणस्य कारणत्वमनुभवसिद्धम् । कारणत्वं च नियतपूर्ववृत्तित्वरूपम् । एवञ्च घटत्वविशिष्टघटज्ञानं प्रति पूर्वं घटत्वज्ञानमावश्यकम् । तदपि विशिष्टविषयकं भवेच्चेदनवस्था । अतो घटत्वमात्रविषयकं निर्विशेषणकम्, अत एव निष्प्रकारकं च तद्ज्ञानम् । अत एवातीन्द्रियञ्च ।।

सप्रकारकमित्यादि स्पष्टम् । डित्थ इति संज्ञा । ब्राह्मण इति जातिविशेषणकम् । श्याम इति गुणविशेषणकम् । पाचक इति क्रियाविशेषणकम् । चत्वारिपदजातानि, संज्ञावाचीनि, गुणवाचीनि, क्रियावाचीनि, जातिवाचीनि च । संज्ञापदान्येव द्रव्यवाचीनि, रूढानि, यदृच्छाशब्दानीति च कथ्यन्ते ।।

प्रत्यक्षज्ञानहेतुः - लौकिकप्रत्यक्षज्ञानहेतुरित्यर्थः । सन्निकर्षः- द्विविधः, लौकिकालौकिकभेदात् । प्रथमस्तु ग्रन्थकारेणैव उच्यते । द्वितीयस्तु अलौकिकसन्निकर्षः अनुपदमुच्यतेऽत्र व्याख्यायाम् ।

संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। चक्षुषा घटप्रत्यक्षजनने संयोगः संनिकर्षः । घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः। चक्षुःसंयुक्ते घटे रूपस्य समवायात् । रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायःसन्निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतम् । तत्र रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः संनिकर्षः । कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वात् । शब्दस्याकाशगुणत्वात् गुणगुणिनोः समवायात् । शब्दत्वसाक्षात्कारे समवेतसमवायः संनिकर्षः । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् । अभावप्रत्यक्षे विशेषणविशेष्यभावः संनिकर्षः,भूतलं घटाभाववत् इत्यत्र चक्षुःसंयुक्तभूतले घटाभावस्य विशेषणत्वात् ।

आलोक-व्याख्या

संयोगस्सन्निकर्ष इति । इन्द्रियाणि हि भौतिकानि, अत एव द्रव्याणि । द्रव्ययोस्संयोगः । अतो घटादिद्रव्यप्रत्यक्षे संयोगस्सन्निकर्षः । इतरत् स्पष्टम् ।।

ननु श्रोत्रेन्द्रियेण दूर उत्पन्नश्शब्दः कथं गृह्यते । शब्दो हि गुणः । न हि तस्य गमनागमनसंभवः । नापि श्रोत्रेन्द्रियं शब्दोत्पत्तिदेशं गच्छेत्, तस्याकाशत्वेन क्रियाभावादिति चेत्, न । दूर उत्पन्नः शब्दो वीचितरङ्गन्यायेन, अन्यं शब्दमुत्पाद्य नश्यति । सोऽप्यन्यमिति तरङ्गात्तरङ्गान्तरक्रमेण श्रोत्रप्रदेशे उत्पन्नः शब्दः श्रोत्रेण गृह्यते ।।

अभावेत्यादि । विशेषणभावः, विशेष्यभाव इति सन्निकर्षद्वयमिति केचित्। 'भूतले घटाभावः' इत्यत्र चक्षुस्संयुक्ते भूतले घटाभावस्य विशेष्यत्वात् विशेष्यत्वं सन्निकर्षः । 'घटाभाववद् भूतलम्' इत्यत्र चक्षुस्संयुक्तभूतलविशेषणत्वं

एवं संनिकर्षजन्यं ज्ञानं प्रत्यक्षम्, तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।।

इति तर्कसंग्रहे प्रत्यक्षपरिच्छेदः समाप्तः।।

आलोक-व्याख्या

सन्निकर्ष इति वदन्ति । परन्तु अभावप्रत्यक्षं प्रति सन्निकर्षत्वादस्य, शाब्दबोधस्य शब्दप्रयोगाधीनत्वेन विशेषणविशेष्यभावपरिवर्तनेऽपि प्रत्यक्षे विशेषण-विशेष्यभावो न कदापि व्यत्यस्तो भवति । प्रत्यक्षस्य वस्तुजन्यत्वात् । अतो विशेषणविशेष्यभाव एक एव सन्निकर्षः, आधाराधेयभाववत् इत्यपरे। चक्षुस्संयुक्ते भूतले विशेषणमभाव इति चक्षुस्संयुक्त-विशेषणतासन्निकर्ष एव विशेषणविशेष्यभाव इत्युच्यते । एवं घटे पटत्वाभावोऽपि चक्षुस्संयुक्तविशेषणता सन्निकर्षेण गृह्यते । घटत्वे पटत्वाभावस्तु चक्षुस्संयुक्तसमवेतविशेषणतया, नीलत्वे पीताभावः चक्षुस्संयुक्तसमवेत-समवेतविशेषणतया च गृह्यत इत्याद्यप्यूह्यम् ।।

एवमभावप्रत्यक्षस्य तत्तदिन्द्रियग्राह्यत्वप्रतिपादनेनानुपलब्धेः प्रमाणान्तरत्वं निरस्तम् । अभावप्रत्यक्षं प्रत्यनुपलब्धिरेव प्रमाणमिति भाट्टाः। परन्तु अधिकरणप्रत्यक्षं प्रति इन्द्रियस्यात्यन्तमावश्यकत्वेनानुपलब्धि-सहकृतेनेन्द्रियेणैवोक्तसन्निकर्षैरभावप्रत्यक्षे संभवति, अतिरिक्तप्रमाणाङ्गीकारे गौरवम् ।।

समवायोऽपि विशेषणविशेष्यभावसन्निकर्षेण गृह्यत इति **नवीनाः**। परन्त्वेवं सति अनुमानेन समवायसाधन एव लाघवतर्कावतारात् समवायस्य प्रत्यक्षत्वे तस्यैकत्वं नित्यत्वं च न स्यात्। सत्तया कार्यकारित्वमेव संबन्धत्वमिति समवायो न प्रत्यक्षः, अनुमेय एवेति **प्राचीनाः** ।।

आलोक-व्याख्या

*इदं सर्वं लौकिकसन्निकर्षरूपम् । अलौकिकस्तु सन्निकर्षः सामान्यलक्षणः, ज्ञानलक्षणः, योगजलक्षणश्चेति त्रिविधः । धूमत्वेन निखिलधूमानां वह्नित्वेन निखिलवह्नीनां च ज्ञानमन्तरा यत्र यत्र धूमस्तत्र वह्निरिति व्याप्तिग्रहणं न संभवेत् । धूमत्वेन निखिलधूमज्ञानं च सामान्यमुखेनैव, देशान्तरधूमानां

टिप्पणी

*सन्निकर्षो द्विविधः -- लौकिकः, अलौकिकश्च । उक्तः षड्विधः सन्निकर्षः लौकिक उच्यते । एतद्विलक्षणसन्निकर्षः अलौकिक उच्यते । '**यत्र यत्र वह्निः, तत्र तत्र धूमः**' इति वह्निधूमयोः कार्यकारणभावे, 'यत्र यत्र धूमः तत्र वह्निः' इति व्याप्यव्यापकभावग्रहणं च त्रैकालिकं दृष्टम् । षड्विधसन्निकर्षस्तु वर्तमानवस्तुष्वेव भवेत् । प्रत्यक्षं हि वर्तमानमात्रविषयकम् । कार्यकारणभावादिस्तु त्रैकालिकः। स कथं पुरोवर्तिवस्तुमात्रविषयको भवेत् । अतः पुरोवर्तिवस्तुगतसामान्यधर्ममादायैव सहचारादिदर्शनमुपपादयितव्यम् । एवं सामान्यमूलकं दर्शनम्, न पुरोऽवस्थितवस्तुमात्रे परिसमाप्तम् । धूमो हि सर्वदैव सर्वत्रैव वह्निजन्य एव । अतश्चास्य सामान्यमूलकत्वात् सामान्यलक्षणा प्रत्यासत्तिरिति संज्ञा ।

एवं 'सुरभि कुसुमम्' 'शीतं शिलातलम् ''मधुरा शर्करा' इत्याद्यनुभवनिर्वाहार्थं ज्ञानलक्षणसन्निकर्ष आवश्यकः । उक्तानुभवेषु हि विशेष्यं कुसुमम्, शिलातलं च चक्षुरिन्द्रियजन्यम् । विशेषणं सौरभं घ्राणेन्द्रियजन्यम्, शैत्यं त्वगिन्द्रियजन्यम्, माधुर्यं च रसनेन्द्रियजन्यम् । युगपत् इन्द्रियद्वयप्रवृत्तेरसंभवात्, विशेष्यग्रहणविशेषणग्रहणयोः सूक्ष्मः कालभेद आवश्यकः। युगपदिन्द्रियद्वयप्रवृत्तौ त्वगिन्द्रियस्य सर्वशरीरव्यापित्वेन, भूतलादिना संयोगस्य सदा वर्तमानत्वेन, चक्षुरादिना रूपादिग्रहणकाले स्पर्शरूपोभयग्रहणमावश्यकं स्यात् । न हि तथानुभूयते । तत्र च कारणं मन एव । मनो यत्रावहितम्, तद्विषयकमेव ज्ञानं भवति। अत एव '**युगपद् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्**'(न्या.सू.१-१-१६) इत्याह महर्षिः । एवञ्च 'सुरभि कुसुमम्' इत्यादौ

आलोक-व्याख्या

चक्षुस्संयोगसन्निकर्षाभावात् । अत इयं सामान्यलक्षणाप्रत्यासत्तिरित्युच्यते।।

एवं 'सुरभि चन्दनम्' इत्यादिप्रतीतौ विशेष्यविशेषणयोर्भिन्नेन्द्रिय-ग्राह्यत्वेन, युगपदिन्द्रियद्वयस्य प्रवृत्तेरसंभवात् विशेषणज्ञानं घ्राणेन्द्रियजन्यं प्रथमं भवति । ततश्चन्दनखण्डस्य चक्षुरिन्द्रियसंयोगे जाते, तत्र पूर्वगृहीतगन्धः स्मृतस्सन् विशेषणतया भासते । अत्र विशेषणभानं ज्ञानलक्षणा-सन्निकर्षवशाद्भवति ।।

योगजलक्षणा तु योगजसिद्धिरूपा, धर्म(पुण्य)विशेषरूपा । सा च योगिनां दूरवर्तिपदार्थप्रत्यक्षं प्रति अतीतानागतविषयकप्रत्यक्षं प्रति च हेतुः । एवमलौकिकसन्निकर्षजन्यं ज्ञानमलौकिकप्रत्यक्षमित्युच्यते । ज्ञानलक्षण-स्योपनीतभानपदेनाप्यस्ति व्यवहारः ।।

।। इति प्रत्यक्षखण्डः ।।

टिप्पणी

कुसुमस्य परोक्षत्वे, घ्राणेन गन्धस्य ग्रहणं प्रथमम्। तेनाश्रयस्य कुसुमस्यानुमित्या गृहीतस्य तत्र विशेष्यतया भानम्। कुसुमस्य पुरत एव सत्त्वे, कुसुमस्य चक्षुषा ग्रहणं प्रथमम्। घ्राणेन्द्रियेण गृहीतस्य गन्धस्य कुसुमे विशेषणतया भानम्। ग्रहणं नाम घ्राणेन्द्रियजन्यं ज्ञानमित्यर्थः। सौरभस्य कुसुमे विशेषणत्वं तादृशज्ञानेन भवति। अस्य ज्ञानलक्षणाप्रत्यासत्तिरिति संज्ञा। प्रत्यासत्तिः सन्निकर्षः। 'नीलो घटः' इति ज्ञानं हि संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवायसन्निकर्षैर्जायते। एवमनेकसन्निकर्षैरेकज्ञानं यथा जायते, तथैव 'सुरभिकुसुमम्' इति ज्ञानमपि लौकिकालौकिकसन्निकर्षद्वयजन्यम्।

एवम् अष्टाङ्गयोगाभ्यासवशात् जायमानोऽलौकिकः शक्तिविशेषः अतीन्द्रियाणां विषये ज्ञानं जनयति। स एव योगजसन्निकर्ष इत्युच्यते।

।। अथ अनुमानखण्डः ।।

अनुमितिकरणमनुमानम् ।

आलोक-व्याख्या

अथ अनुमानखण्डः

क्रमप्राप्तमनुमानं निरूपयति - **अनुमितीत्यादि** । अनुमितेः करणम् - अनुमितिकरणम् । करणम् - करणतावत् - असाधारणकारणतावदित्यर्थः। अनुमितेरित्यत्र षष्ठ्याः कार्यत्वमर्थः । तत्र च प्रकृत्यर्थस्याधेयतासंबन्धेनान्वयः। कार्यताया निरूपितत्वसंबन्धेन असाधारणकारणतायामन्वयः । तथा च **अनुमितिनिष्ठकार्यतानिरूपितासाधारणकारणतावत् अनुमानम्** - इति शाब्दबोधः । लक्षणं तु— **अनुमितिनिष्ठकार्यतानिरूपितासाधारणकारणतावत्त्वम्** इति । अनुमितिनिष्ठा का कार्यतेति चेत् ? 'पर्वतो वह्निमान्' इत्याद्यनुमितिनिष्ठा कार्यता । तन्निरूपितासाधारणकारणता व्याप्तिज्ञाननिष्ठा कारणता । तादृशकारणतावत् व्याप्तिज्ञानं भवतीति व्याप्तिज्ञानमेवानुमानपदवाच्यमित्यर्थः । नव्यमते तु परामर्श एवानुमिति-करणम् । कार्यसामान्यं प्रति कालेश्वरादृष्टादेः कारणत्वात्, अनुमितिनिष्ठ-कार्यतानिरूपितकारणत्वं कालेश्वरादावस्तीत्यतिव्याप्तिः स्यादिति असाधारणेति विशेषणम् । तेषां साधारणकारणत्वान्नातिव्याप्तिः । व्यापारवत् कारणं करणमिति लक्षणे व्याप्तिज्ञानं परामर्शद्वारानुमितिं जनयतीति परमर्शो व्यापारः, तद्वत्करणं व्याप्तिज्ञानमिति समन्वयः ।।

परामर्शजन्यं ज्ञानमनुमितिः । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः। तज्जन्यं 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिः ।

यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः ।

आलोक-व्याख्या

अनुमितिर्नाम का ? अनुमानजन्यं ज्ञानमनुमितिकथन अन्योन्याश्रय इत्यतः - **परामर्शजन्यं ज्ञानमनुमितिरि**त्युक्तम् । वस्तुतस्तु 'अनुमिनोमि' इत्यनुव्यवसायसिद्धो ज्ञानविशेषोऽनुमितिः । तत्करणं व्याप्तिज्ञानमनुमानम्।।

परामर्शो नाम कः? इत्यत्राह - **व्याप्तीत्यादि ।** व्याप्त्या विशिष्टम् = व्याप्तिविशिष्टम् । व्याप्तिविशिष्टस्य पक्षधर्मताज्ञानम् = पक्षवृत्तित्वज्ञानम् = व्याप्तिविशिष्टपक्षधर्मताज्ञानम् । 'पर्वतो वह्निमान्' इत्यनुमितिं प्रति 'वह्निव्याप्यधूमवान् पर्वतः' इति ज्ञानं कारणम् । वह्निव्याप्यः = वह्निनिरूपितव्याप्तिविशिष्टः = धूमः । तस्य पक्षवृत्तित्वज्ञानम् = वह्निव्याप्यधूमवान् पर्वत इति ज्ञानम् । तदेव परामर्शः ।।

अनुमितेः क्रम एवम् - प्रथमं पर्वते धूमं दूरात्पश्यति । तदा 'पर्वतो धूमवान्' इति ज्ञानं जायते । इदमेव पक्षधर्मताज्ञानमित्युच्यते । एतस्मिन् ज्ञाने जाते, अनन्तरं, महानसादौ गृहीतां 'यत्र धूमस्तत्र वह्निः' इति व्याप्तिं स्मरति । ततः वह्निव्याप्यधूमवानिति परामर्शः । ततः 'पर्वतो वह्निमान्' इत्यनुमितिः । ततश्च प्रथमं पक्षधर्मताज्ञानम् । ततः व्याप्तिस्मरणम् । ततः परामर्शः । ततः अनुमितिरिति क्रमः। अत्र व्याप्तिविशिष्टस्य हेतोः पक्षे वैशिष्ट्यावगाहित्वात् परामर्शो विशिष्टवैशिष्ट्यावगाहिज्ञानरूपो भवति ।।

व्याप्तिर्नाम केत्यत्राह - **यत्रेत्यादि** । **'साहचर्यनियमः'** इति व्याप्तेर्लक्षणम्। तदभिलापकं वाक्यम् 'यत्र धूमस्तत्राग्निः' इति । साहचर्यं सामानाधिकरण्यम् । तस्य नियमः - अव्यभिचारः । कादाचित्कं साहचर्यं

आलोक-व्याख्या

न व्याप्तिः । सार्वकालिकं साहचर्यं ययोर्वर्तते, तत्र तयोस्साहचर्यनियमः - नियतं साहचर्यं वा स्यात् । यथा वह्निधूमयोः। यत्र यत्र धूमः स्यात्, तत्र सर्वत्रापि वह्निरपि स्यात् । एतादृशं वह्निसाहचर्यं धूमे वर्तत इति वह्निव्याप्तिर्धूमे वर्तते । तेन च वह्निव्याप्यो धूमश्च भवति । एवमव्यभिचरितः संबन्धो ययोर्वर्तते, तत्र तयोर्व्याप्तिर्वर्तत एव । यत्र तु कादाचित्कं साहचर्यम्, तत्र तु न व्याप्तिः । यथा धनसुखयोः । लोके कश्चित् धनवान् सुखी दृष्ट इति 'अयं सुखी, धनवत्त्वात्' इति यदि ब्रूयात्, तदा व्यभिचारः स्यात् । धनमात्रं न हि सुखसाधनम्, धनवतो रोगपीडायां सुखाभावात् । किन्तु विवेक एव सुखसाधनम् । अतो 'यत्र धनम्, तत्र सुखम्' इति न व्याप्तिः। दुःखवत्यपि धनसत्त्वात् । अतोऽयं व्यभिचरितो हेतुः।।

तथा च साहचर्यनियमो नाम अव्यभिचरितं साहचर्यम् । ततश्चाव्यभिचरितत्वमेव व्याप्तिः । अव्यभिचरितत्वं च व्यभिचाराभावः । व्यभिचारो नाम तदभाववत्यपि सत्त्वम् । यथा 'धूमवान् वह्नेः' इत्युक्ते, धूमवति महानसादौ यद्यपि वह्निर्वर्तते । अथापि धूमाभाववति तड्डायःपिण्डेऽपि वर्तते । अतस्साहचर्यस्य नियमो नास्ति, धूमाभाववद्वृत्तित्वाद्वह्नेः । अयमेव व्यभिचार इत्युच्यते । ततश्च साध्याभाववद्वृत्तित्वं व्यभिचारः । साध्याभाववदवृत्तित्वमव्यभिचारः । इयमेव व्याप्तिरित्युच्यते ।।

'वह्निमान् धूमात्' इत्यादौ लक्षणसमन्वयः । अत्र साध्यो वह्निः । साध्याभावः - वह्न्यभावः । तद्वान् ह्रदादिः । तदवृत्तित्वं धूमे वर्तत इति। 'धूमवान् वह्नेः' इत्यादिव्यभिचारिणि - साध्यो धूमः । साध्याभावो धूमाभावः। तद्वत् अयोगोलकमपि । तद्वृत्तित्वमेव हेतौ वह्नौ वर्तते, न त्ववृत्तित्वमिति नातिव्याप्तिः ।।

अत्र साध्याभावो नाम - साध्यनिष्ठप्रतियोगितानिरूपकोऽभावः ।

आलोक-व्याख्या

तत्र प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा 'पर्वतो वह्निमान् धूमात्' इत्यादिसद्धेतावव्याप्तिः । अत्र साध्यो वह्निः । तन्निष्ठप्रतियोगितानिरूपकोऽभावः 'वह्निर्नास्ति' इति प्रतीतिसिद्धोऽभावः । स च यद्यपि पर्वते न संभवति । परन्तु वह्नेः संयोगसंबन्धेनैव पर्वतादौ सत्त्वात्, 'समवायसम्बन्धेन पर्वते वह्निर्नास्ति' इति प्रतीतेः प्रामाणिकत्वात् समवायसम्बन्धावच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपको वह्न्यभावः पर्वते वर्तते। ततश्च साध्याभाववान्=वह्न्यभाववान् पर्वतः'। तद्वृत्तित्वमेव हेतौ धूमे वर्तते, न त्ववृत्तित्वमित्यव्याप्तिरित्यतः, प्रतियोगितायां साध्यतावच्छेदक-संबन्धावच्छिन्नत्वस्य निवेशनेनाव्याप्तेः परिहारात् । येन संबन्धेन यत् साध्यते, स संबन्धः साध्यतावच्छेदकसंबन्धः । तथा च **साध्यतावच्छेदक-संवन्धावच्छिन्नसाध्यनिष्ठप्रतियोगिता-निरूपकाभाववदवृत्तित्वं व्याप्तिः इति लक्षणम् ।** पर्वते च वह्निः संयोगसंबन्धेन साध्यत इति संयोगसंबन्ध एव साध्यतावच्छेदकसंबन्धः । संयोगसंबन्धावच्छिन्नवह्निनिष्ठप्रतियोगिता-निरूपकाभावस्तु 'संयोगेन वह्निर्नास्ति' इति प्रतीतिसिद्धाभाव एव । स तु पर्वते न स्यात्; संयोगेन वह्नेः पर्वते सत्त्वात् । किन्तु ह्रदादिरेव तादृशा-भाववान् । तदवृत्तित्वं च हेतौ धूमे वर्तत इति नाव्याप्तिः ।।

अथैवमपि पर्वते वह्नेः सत्त्वेऽपि 'पर्वते संयोगसंबन्धेन महानसीयवह्निर्नास्ति' इति प्रतीतेः प्रामाणिकत्वात् संयोगसंबन्धावच्छिन्नवह्नि-निष्ठप्रतियोगितानिरूपकोऽभावः महानसीयवह्न्यभावोऽपि । महानसीयवह्नेरपि वह्नित्वेन महानसीयवह्न्यभावोऽपि वह्न्यभाव एव । स तु पर्वते वर्तत एव। महानसीयवह्नेर्महानस एव सत्त्वात्, पर्वतेऽसंभवात् । तथा च संयोगसंबन्धा-वच्छिन्नवह्निनिष्ठप्रतियोगितानिरूपकाभाववान् पर्वतः। तद्वृत्तित्वमेव हेतौ धूमे वर्तते, न त्ववृत्तित्वमित्यव्याप्तिरिति चेत्, न । प्रतियोगितायां

आलोक-व्याख्या

साध्यतावच्छेदकधर्मावच्छिन्नत्वस्यापि निवेशनात् । येन धर्मेण यः साध्यः, स धर्मः साध्यतावच्छेदकधर्मः । प्रकृते च वह्निर्वह्नित्वरूपधर्मेणैव साध्यः, न तु महानसीयवह्नित्वेन रूपेण, महानसीयवह्नेः पर्वतेऽसंभवात् । साध्यतावच्छेदकीभूतवह्नित्वावच्छिन्नप्रतियोगितानिरूपकस्त्वभावः 'वह्निर्नास्ति' इति प्रतीतिसिद्धाभाव एव । न तु महानसीयवह्न्यभावः । अस्य महानसीय-वह्नित्वावच्छिन्नत्वेन केवलवह्नित्वावच्छिन्नत्वाभावात् । वह्नित्वावच्छिन्नाभावस्तु पर्वते न संभवति, पर्वते वह्नेः संयोगसंबन्धेन सत्त्वात् । अतः संयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगितानिरूपकाभाववान् ह्रदादिरेव। तदवृत्तित्त्वं धूमे वर्तत इति नाव्याप्तिः । तथा च लक्षणम् - **साध्यतावच्छेदकसंवन्धावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्न-प्रतियोगितानिरूपकाभाववदवृत्तित्वं व्याप्तिरिति** संपन्नम् ।।

नन्वेवमपि महानसीयवह्न्यभावीयप्रतियोगितायां महानसीयत्वस्य वह्नित्वस्य चावच्छेदकतया भानात्, सा प्रतियोगिता वह्नित्वावच्छिन्नापि भवतीति महानसीयवह्न्यभावस्य वारणं न भवतीति तादृशाभाववान् पर्वतः। तद्वृत्तित्वमेव हेतौ धूमे वर्तत इत्यव्याप्तिस्तदवस्थैवेति चेत्, न । साध्याभावीयप्रतियोगितायां वैशिष्ट्यानवच्छिन्नत्वस्यापि विशेषणात् । तथा च **साध्यतावच्छेदकसंवन्धावच्छिन्नवैशिष्ट्यानवच्छिन्नसाध्यताव-च्छेदकावच्छिन्नप्रतियोगिताकाभाववदवृत्तित्वं व्याप्तिः** । एवञ्च महानसीयवह्न्यभावप्रतियोगिताया महानसीयत्वविशिष्टवह्नित्वावच्छिन्नत्वेन वैशिष्ट्यावच्छिन्नत्वात्, वैशिष्ट्यानवच्छिन्नप्रतियोगिताकाभावो महानसीय-वह्न्यभावो न भवति, किन्तु शुद्धवह्न्यभाव एव । तद्वांश्च ह्रदादिरेव । न तु पर्वतः । तदवृत्तित्वं धूमे वर्तत इति नाव्याप्तिः ।।

अथैवमपि पर्वतो वह्निमान् धूमात् इत्यत्र अव्याप्तिर्दुर्वारैव । तथाहि

आलोक-व्याख्या

घटवत्यपि भूतले पटस्यासत्त्वे 'घटोपटोभयमस्ति वा?' इति प्रश्ने 'घटपटोभयं नास्ति' इत्येवोत्तरं वक्तव्यम् । एवं पर्वते वह्नेः सत्त्वेऽपि घटस्याभावेन एकसत्त्वेऽपि द्वयं नास्तीति प्रतीतेः प्रामाणिकत्वेन वह्निघटोभयं नास्तीति प्रतीत्या साध्यतावच्छेदकसंबन्धावच्छिन्नवैशिष्ट्यानवच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावो वह्निघटोभयाभावोऽपि भवति । तद्वान् पर्वतोऽपि तद्वृत्तित्वमेव धूमे हेतौ वर्तते । अवृत्तित्वं नास्तीत्यव्याप्तिः ।।

न च वह्निघटोभयाभावीयप्रतियोगिताया वह्नित्वघटत्वोभयधर्मावच्छिन्नत्वेन केवलवह्नित्वावच्छिन्नाभावपदेनोभयाभावः स्वीकर्तुं न शक्य इति कथमव्याप्तिरिति वाच्यम्; उभयस्य प्रत्येकानतिरिक्तत्वेन वह्नित्वघटत्वोभयावच्छिन्नत्वे वह्नित्वावच्छिन्नत्वस्यानपायात्, तादृशवह्नित्वावच्छिन्नाभाव इत्यनेन वह्निघटोभयाभावः स्वीकर्तुं शक्य एवेति अव्याप्तिर्दुर्वारैव ।।

न च घटपटोभयाभावीया प्रतियोगिता वह्निघटोभयनिष्ठा । प्रतियोगितावच्छेदकता तु न केवलं वह्नित्वे घटत्वे च वर्तते, किन्तूभयत्वेऽपि। 'वह्निघटोभयं नास्ति' इत्येव प्रतीतेः । 'वह्निघटौ न स्तः' इति प्रतीतिरपि उभयविषयिण्येव, द्विवचनेनोभ योरपि क्रोडीकारात् । यथोभयाभावीयप्रतियोगितावच्छेदकता घटत्वे पटत्व उभयत्वे चेति त्रिष्वपि वर्तते, उभयत्वस्य व्यासज्यवृत्तिधर्मत्वात् । लक्षणे व्यासज्यवृत्तिधर्मानवच्छिन्नत्वमपि निवेश्यते। एवञ्च **साध्यतावच्छेदकसंबन्धावच्छिन्नवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववदवृत्तित्वं व्याप्तिः** । एवञ्च प्रकृते वह्निघटोभयाभावो न स्वीकर्तुं शक्यः । तदभावीयप्रतियोगिताया वह्नित्वघटत्वोभयावच्छिन्नत्वेन व्यासज्यवृत्तिधर्मावच्छिन्नत्वेन, व्यासज्यवृत्तिधर्मानवच्छिन्नत्वाभावात् । किन्तु शुद्धवह्न्यभाव

आलोक-व्याख्या

एव स्वीकार्यः । तादृशाभाववांस्तु ह्रद एव । तदवृत्तित्वं हेतौ धूमे वर्तत इति नाव्याप्तिरिति वाच्यम् ; एवं सत्युभयसाध्यकसद्धेतावव्याप्तिर्दुर्वारा । तथाहि - नव द्रव्येषु रूपरसौ पृथिवीजलमात्रे वर्तेते । अतः - 'इदं रूपरसोभयवत्, पृथीवीजलान्यतरत्वात्' इति वक्तुं शक्यते । यत्र यत्र पृथिवीजलान्यतरत्वम्, तत्र रूपरसोभयम्, यथा पृथिवी जलं चेत्यन्वयव्याप्तिः। एवं यत्र रूपरसोभयं नास्ति तेज आदौ, तत्र पृथिवीजलान्यतरत्वं नास्तीति व्यतिरेकव्याप्तिः । तथा चायमन्वयव्यतिरेकी सद्धेतुः । अत्र साध्यतावच्छेदक-संबन्धः समवायः । समवायसंबन्धावच्छिन्नवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव इत्यनेन रूपरसोभयाभावो न स्वीकर्तुं शक्यते । अस्योभयत्वरूपव्यासज्यवृत्तिधर्मावच्छिन्नत्वेन व्यासज्यवृत्ति-धर्मानवच्छिन्नप्रतियोगिताकत्वाभावात् । तथा च तत्र लक्षणसमन्वयासंभवा-दव्याप्तिः । अतश्च व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं साध्याभावीयप्रतियोगितायां निवेशयितुं न शक्यम् । अनिवेशे च 'पर्वतो वह्निमान् धूमात्' इत्यादौ वह्निघटोभयाभावमादाया-व्याप्तिर्दुर्वारेति **सेयमुभयतःपाशा रज्जुरिति** चेत् --- अत्रोच्यते । साध्याभावनिरूपितप्रतियोगितावच्छेदकतायाः पर्याप्तेर्निवेशेन सर्वदोषपरिहारः । तथा च लक्षणम् - **साध्यतावच्छेदकसंबन्धा-वच्छिन्नसाध्यता-वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगिताका-भाववदवृत्तित्वमिति** । 'वह्निमान् धूमात्' इत्यादौ तादृशाभावो वह्नित्वावच्छिन्नाभाव एव । न तु महानसीयवह्नित्वावच्छिन्नाभावः। महानसीयवह्न्यभावप्रतियोगितावच्छेदकताया महानसीयत्वे वह्नित्वे चेत्युभयत्र पर्याप्तत्वेन केवलवह्नित्वेऽपर्याप्तत्वेन साध्यतावच्छेदकतापर्याप्त्यधिकरण-धर्मावच्छिन्नप्रतियोगिताकाभाव इत्यनेन महानसीयवह्न्यभावमादाय नाव्याप्तिः। न वा वह्निघटोभयाभावमादायाव्याप्तिः। वह्निघटोभयाभावीयप्रतियोगिता-

आलोक-व्याख्या

वच्छेदकताया वह्नित्वे, घटत्वे, उभयत्वे चेति त्रिषु पर्याप्तत्वेन केवलवह्नित्वेपर्याप्तत्वाभावेन, साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकाभावो वह्निघटोभयाभावो न भवति, किन्तु 'वह्निर्नास्ति' इति प्रतीतिसिद्धाभाव एव । स च ह्रदादावेव संभवति । तत्र च धूमस्यावृत्तेर्नाव्याप्तिः।।

नन्वेवमप्युभयस्य प्रत्येकानतिरिक्तत्वेन, प्रत्येकापर्याप्तस्य समुदाय-पर्याप्तत्वायोगात्, वह्निघटोभयाभावीयप्रतियोगितावच्छेदकता यदि वह्नित्वे, घटत्वे, उभयत्वे च पर्याप्ता, तर्हि वह्नित्वेऽपि पर्याप्तैवेति साध्यतावच्छेद-कतापर्याप्त्यधिकरणधर्मो वह्नित्वमपि । तदवच्छिन्नप्रतियोगिताकाभावो वह्निघटोभयाभावोऽपीति तद्व्यावृत्तेः कर्तुमशक्यत्वेन कथमव्याप्तेः परिहार इति चेत् ; न । **साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्न-पर्याप्तावच्छेदकताकप्रतियोगिकाभावविवक्षणेनो**भयाभावव्यावृत्तेः । तथाहि -- घटवत्यपि भूतले, पटस्यासत्त्वे 'घटपटोभयं नास्ति' इति प्रतीतिः प्रामाणिकी, 'घटो नास्ति' इति प्रतीतिस्तु न प्रामाणिकीति सर्वसंमतम् । अनयोः प्रतीत्योः किं वैलक्षण्यम्? घटाभावीयप्रतियोगितावच्छेदकता घटत्वमात्रे पर्याप्ता । घटपटोभयाभावीया प्रतियोगितावच्छेदकता च घटत्वे, पटत्वे, उभयत्वे चेति त्रिषु पर्याप्ता । उभयस्य प्रत्येकानतिरेकेण, त्रिषु पर्याप्तेति चेत्, प्रत्येकमपि पर्याप्तेत्यप्यावश्यकमेव । अथापि घटत्वावच्छिन्नाभावस्य घटत्वपटत्वोभयत्वावच्छिन्नाभावस्य वैलक्षण्यमावश्यकम् । अत एवं वक्त-व्यम्। घटाभावीयप्रतियोगितावच्छेदकता घटत्वत्वावच्छिन्ने घटत्वे, तद्व्यक्तित्वावच्छिन्ने घटत्वे वा पर्याप्ता । घटपटोभयाभावीयप्रतियोगिता-वच्छेदकता तु घटत्वपटत्वोभयत्वरूपेषु त्रिष्वपि समं पर्याप्ता । अतोऽवच्छेदकतापर्याप्त्यनुयोगि त्रयम् । पर्याप्त्यनुयोगितावच्छेदकता तु

आलोक-व्याख्या

एतत्त्रितयानुगतं त्रित्वम्, त्रित्वावच्छिन्ने त्रयेऽवच्छेदकताया अविशेषेण वर्तमानत्वात् । अतश्चोभयाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मो घटत्वपटत्वोभयत्वानुगतं त्रित्वम्, न तु घटत्वत्वम्, पटत्वत्वम्, उभयत्वत्वं वा, प्रतियोगितावच्छेदकतया अपि त्रिषु व्यासज्य वर्तमानत्वात्। ततश्च घटपटोभयाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकत्रित्वावच्छिन्ने त्रयेऽवच्छेदकतायाः पर्याप्तिः । घटाभावीयप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकं तु घटत्वत्वमात्रम्, घटत्वगततद्व्यक्तित्वं वेति उभयोरभावयोर्वैलक्षण्यम् । एवञ्च प्रकृतेऽपि वह्न्यभाववह्निघटोभयाभावयोरपि वैलक्षण्यमिति, साध्याभावीयप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्तावच्छेदकताकप्रतियोगिताकाभाव इत्यनेनोभयाभावो न स्वीकर्तुं शक्यः, किन्तु केवलवह्न्यभाव एवेति, तद्वान् ह्रदः, तदवृत्तित्वं धूमे वर्तत इति नाव्याप्तिः । तथा च **साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्तावच्छेदकताप्रतियोगिताकाभाववदवृत्तित्वं व्याप्तिरिति** दिक् ।।

नन्वेवमपि 'वह्निमान् धूमात्' इत्यत्राव्याप्तिः । साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नसाध्यतावच्छेदकवह्नित्वधर्मावच्छिन्नप्रतियोगितानिरूपकाभावः - 'संयोगेन वह्निर्नास्ति' इति प्रतीतिसिद्धाभावः । तद्वान् ह्रदादिरिव धूमावयवा अपि । धूमावयवेषु वह्नेरसत्त्वात् । अतः साध्याभाववान् धूमावयवः । तद्वृत्तित्वमेव धूमे हेतौ वर्तते, न त्ववृत्तित्वमित्यव्याप्तिरिति चेत्, न , **अवृत्तित्वप्रतियोगिभूतवृत्तितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वस्यापि** निवेशनीयत्वात् । तथा च संयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगितानिरूपकाभाववन्तो धूमावयवाः । तादृशधूमावयवनिरूपितहेतुतावच्छेदकसंयोगसंबन्धावच्छिन्नवृत्तित्वाभावो धूमे वर्तत एव । धूमावयवेषु हि धूमः

आलोक-व्याख्या

समवायसंबन्धेनैव वर्तते, अवयवावयविनोः समवायात् । संयोगसंबन्धेन तु न वर्तत एवेति संयोगसंबन्धावच्छिन्नवृत्तित्वाभावो धूमे वर्तत इति नाव्याप्तिरिति।।

नन्वेवमपि 'द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्' इत्यादौ अव्याप्तिर्भवेदेव । तथाहि । सत्ताजातिर्द्रव्यगुणकर्मसु त्रिष्वेव वर्तते । गुणकर्मान्यत्वविशिष्टसत्ता तु द्रव्य एव स्यात् । गुणे कर्मणि च गुणकर्मान्यत्वरूपविशेषणस्यासंभवेन गुणकर्मान्यत्वविशिष्टसत्ता गुणे कर्मणि च न स्यात्, किन्तु द्रव्य एव । तथा च यत्र गुणकर्मान्यत्वविशिष्टसत्ता तत्र द्रव्यत्वम्, यत्र च द्रव्यत्वं तत्र गुणकर्मान्यत्वविशिष्टसत्तेति समव्याप्तस्सद्धेतुरयम् । अत्र साध्यतावच्छेदकं द्रव्यत्वम्, साध्यतावच्छेदकसंबन्धश्च समवायः । समवायसंबन्धावच्छिन्न द्रव्यत्वत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभावो द्रव्यत्वाभावः । तद्वान् गुणः कर्म वा । तत्र गुणकर्मान्यत्वविशिष्टसत्ताया असंभवात् तदवृत्तित्वं गुणकर्मान्यत्वविशिष्टसत्तायां हेतौ वर्तत इति समन्वयः कर्तव्यः । परन्तु विशिष्टशुद्धयोरनतिरेकात्, गुणकर्मान्यत्वविशिष्टसत्तायाः शुद्धसत्तायाश्चैकत्वेन साध्याभाववति गुणे सत्तायास्सत्त्वेन, यदि सत्तायां साध्याभाववद्वृत्तित्वमेव स्यात्, न तु साध्याभाववदवृत्तित्वमित्यव्याप्तिरिति चेत्, न । **अत्र केचित्** - विशिष्टशुद्धयोरनतिरेके द्रव्यत्वाभाववति गुणे हेतोस्सत्त्वेन हेतोर्व्यभिचरित्वेन तस्यालक्ष्यत्वात्तत्र लक्षणासमन्वयस्य गुणत्वात् । अतिरेके चाव्याप्तेरेवाप्रसक्तेर्यत्किञ्चिदेतदित्याहुः । **अन्ये तु** - द्रव्यगुणकर्मसु विद्यमानायाः सत्ताया एकत्वेनाखण्डत्वात् किञ्चिद्विशेषणयोजनमात्रेण सखण्डत्वासंभवात् विशिष्टरूपेण भेदेऽपि स्वरूपत ऐक्यमप्यनिवार्यमिति । लक्षणमपि **साध्याभाववन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्न-वृत्तितानवच्छेदकधर्मवत्त्वं व्याप्तिरिति** परिष्करणान्नाव्याप्तिः । एवञ्च प्रकृते साध्यतावच्छेदकेत्याद्यभाववान् गुणः ।

आलोक-व्याख्या

तन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तितायामवच्छेदकं सत्तात्वम् । अनवच्छेदकं तु गुणकर्मान्यत्वविशिष्टसत्तात्त्वम्, गुणे गुणान्यत्वरूपविशषणाभावेन 'गुणः गुणकर्मान्यत्वविशिष्टसत्तावान्' इति प्रतीतेरसंभवात् ।*

तथा च निष्कृष्टं लक्षणम् - **साध्यतावच्छेदकसंबन्धावच्छिन्न-साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्ता-वच्छेदकताकप्रतियोगिताकाभाववन्निरूपितहेतुतावच्छेदकसंबन्धा-वच्छिन्नवृत्तितानवच्छेदकधर्मवत्त्वं व्याप्तिः** ।। अधिकं त्वत्रोत्तर-ग्रन्थेभ्योऽवगन्तव्यम् ।।

ननु 'इदं वाच्यम्, ज्ञेयत्वात्' इत्यादिकेवलान्वयिस्थले साध्यस्य वाच्यत्वस्य सर्वत्र वर्तमानत्वात् तदभावाप्रसिद्ध्या अव्याप्तिरिति चेत्, न ।

टिप्पणी

*नन्वेवमपि 'एतद्वृक्षः कपिसंयोगी, एतद्वृक्षत्वात्' इत्यादौ एतद् वृक्षत्वाधिकरणे एतद्वृक्षे मूले कपिसंयोगाभावस्य सत्त्वात्, हेतोः एतद्वृक्षत्वस्य साध्याभाववद्वृत्तित्वात् व्यभिचारित्वापत्तिः । अतः व्यभिचारिलक्षणे साध्याभावे प्रतियोगि वैयधिकरण्यं विशेषणं देयम् । अत एव व्याप्तिलक्षणेऽपि व्यभिचाराभावरूपत्वाद् व्याप्तेः प्रतियोगिव्यधिकरणसाध्याभाववदवृत्तित्वमेव लक्षणं वक्तव्यमिति चेत् --

अत्रेदं चिन्त्यताम् -- कपेः प्रायो वृक्षाग्रेवर्तमानत्वेऽपि, 'वृक्षे कपिरस्ति न वा?' इति प्रश्ने 'कपिरस्ति' इत्येवोत्तरं वक्तव्यम् । कपेस्सत्त्वेऽपि, कपिसंयोगस्याव्याप्यवृत्तित्वात्, 'मूले कपिसंयोगो नास्ति' इत्येव प्रामाणिकं किलेति चेत्, 'वृक्षेऽस्ति न वा' इति प्रश्ने 'मूले' इत्यादि संयोज्योत्तरमपृष्टोत्तरमेव । भेदस्य व्याप्यवृत्तित्वम्, अभावस्त्वव्याप्यवृत्तिः इत्यादिकं तु कुकल्पनामात्रम् । प्रत्युत अत्यन्ताभावस्तु प्रतियोगिमत्यपि वर्तत इत्येव तत्त्वम् । अत एव 'घटवत्यपि देशे घटात्यन्ताभावबुद्धिः कुतो नोत्पद्यते?' इत्याशङ्क्य, 'घटाभावकालीनभूतलस्वरूपस्यैव संबन्धत्वान्न घटात्यन्ताभावबुद्धिः' इत्याद्युत्तरं संगच्छतेा एवञ्च संयोगस्याव्याप्यवृत्तित्वेऽपि वृक्षे कपिसंयोगोऽस्ति, न वा ? इति प्रश्ने 'अस्ति'

आलोक-व्याख्या

साध्यादिभेदेन व्याप्तेर्भेदात्, तत्स्थलानुसारेण लक्षणान्तरकरणात् अस्य लक्षणस्य केवलान्वयिव्यतिरिक्तस्थले निर्दुष्टत्वान्न परित्यागावश्यकतेति प्राचीनाः। इदानीमेव व्याप्तेरव्यभिचरितत्वं च संगच्छते । अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् ।।

सर्वानुगता व्याप्तिस्तु - **हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगि-साध्यसामानाधिकरण्यम्** । 'वह्निमान् धूमात्' इत्यादौ - हेतुः धूमः । तदधिकरणं पर्वतादिः। तद्वृत्तिरत्यन्ताभावः - घटाद्यभावः । तत्प्रतियोगी घटः । अप्रतियोगी साध्यो वह्निः। तत्सामानाधिकरण्यं हेतौ धूमे वर्तत इति लक्षणसमन्वयः । 'धूमवान् वह्नेः' इत्यादौ व्यभिचारिणि, हेतुर्वह्निः । तदधिकरणम् अयोगोलकमपि । तद्वृत्तिर्धूमाभावोऽपि । तत्प्रतियोगी साध्यो धूमः, न त्वप्रतियोगीति नातिव्याप्तिः । 'इदं वाच्यम् ज्ञेयत्वादित्यादौ । हेतुः ज्ञेयत्वम् । तदधिकरणं घटादिः । तद्वृत्तिर्वाच्यत्वाभावो न भवति, वाच्यत्वस्य सत्त्वात्, किन्तु पटत्वाद्यभावः । तत्प्रतियोगी पटत्वादिः । अप्रतियोगि साध्यं वाच्यत्वम् । तत्सामानाधिकरण्यं हेतौ ज्ञेयत्वे वर्तत इति लक्षणसमन्वयः। परिष्कारादिकं कुशलमतिभिरभ्यूह्यम् ।।

टिप्पणी

इत्येवोत्तरं प्रमाणिकम्। अन्यथा गृहे चात्र वर्तमाने सति 'चैत्रो गृहे न वर्तते, किन्तु गृहैकदेशे क्वचित्कोणे वर्तते' इत्येवोत्तरं वक्तव्यं भवेत्। न हि चैत्रेण गृहे सर्वत्र व्याप्य स्थातुं शक्यम्। अतो 'गृहे वर्तते, न वा' इति प्रश्ने 'वर्तते' इत्येव प्रामाणिकम् ऋजूत्तरं वक्तव्यम्। अतश्च प्रतियोगिवैयधिकरण्यनिवेशादिकम् ऋजुमतीनां दृष्ट्या न देयमेवा अत एव च भ्रमलक्षणे 'तदभाववति' इत्यत्र 'प्रतियोगिव्यधिकरणतदभाववति' इत्यादिपरिष्करणमपि दत्तोत्तरम्। वस्तुतस्तु अभावपदप्रयोगोऽपि शास्त्र एव, न तु लोके। लोके तु 'नास्ति' इत्येव प्रयोगः। अधिकमभावविचारे द्रष्टव्यम्।।

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।

अनुमानं द्विविधम् । स्वार्थं परार्थं चेति ।

स्वार्थं स्वानुमितिहेतुः । तथा हि - स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ धूमे व्याप्तिं गृहीत्वा पर्वतसमीपं गतः,तद्गते चाग्नौ सन्दिहानःपर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति । तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात् पर्वतो वह्निमान् इति अनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् ।

आलोक-व्याख्या

परामर्शघटकस्य व्याप्तेः स्वरूपमभिधाय तद्घटकस्य पक्षधर्मत्वस्य स्वरूपमाह - **व्याप्यस्येत्यादि** । व्याप्यः = व्याप्त्याश्रयो हेतुः । तस्य पक्षे वर्तमानत्वमेव पक्षधर्मतापदार्थः । हेतोः पक्षवृत्तित्वज्ञानं पक्षधर्मताज्ञानमित्युच्यते । पक्षनिरूपितं वृत्तित्वम् = पक्षवृत्तित्त्वम् । तच्च हेतुनिष्ठम् । 'पर्वतो धूमवान्' इति ज्ञानं पक्षधर्मताज्ञानम् । अत्र हि पर्वतो विशेष्यः, धूमो विशेषणम् । विशेषणम् = धर्मः । विशेष्यो = धर्मी । धूमपर्वतयोर्विशेषणविशेष्यभावे पर्वतनिरूपितं धर्मत्वम् = वृत्तित्वम् = विशेषणत्वं धूमे वर्तते । 'यत्र धूमः, तत्र वह्निः' इति व्याप्तिः । तत्र धूमो व्याप्यः, व्यापको वह्निः । वह्निनिरूपिता व्याप्तिर्धूमे वर्तते । अतो व्याप्यो धूमः । तस्य पर्वतवृत्तित्वज्ञानं पक्षधर्मताज्ञानमित्युच्यते । एवञ्च व्याप्तिविशिष्टस्य हेतोः पक्षधर्मताज्ञानं परामर्श इति परामर्शस्वरूपमुक्तं भवति ।।

अनुमानं विभजते - **अनुमानं द्विविधमिति** । स्वार्थम्, परार्थमिति संज्ञा । सैव तयोर्वैलक्षण्यं वक्तीत्यभिप्रायः । एतदुपपादयति - **तथाहीत्यादिना** । प्रथमं महानसादौ वह्निधूमयोर्व्याप्तिग्रहणम् । अनन्तरं कदाचिद्यदा पर्वतादौ

यत्तु स्वयमेव धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्तत्परार्थानुमानम् । यथा पर्वतो वह्निमान् धूमवत्त्वात्, यो यो धूमवान् सोऽग्निमान् यथा महानसः, तथा चायम्, तस्मात्तथा इति । अनेन वाक्येन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । पर्वतो वह्निमान् इति प्रतिज्ञा । धूमवत्त्वात् इति हेतुः । यो यो धूमवान् सोऽग्निमान् यथा महानस इत्युदाहरणम् । तथा चायं इत्युपनयः । तस्मात्तथेति निगमनम् ।

आलोक-व्याख्या

धूमं पश्यति, तदा 'धूमवान् पर्वतः' इति ज्ञानं जायते । इदमेव पक्षधर्मताज्ञानमित्युच्यते । ततः पूर्वं महानसादौ गृहीतां व्याप्तिं स्मरति । इदं व्याप्तिस्मरणमेवानुमानमिति **प्राचीनाः** । ततस्तादृशव्याप्तिविशिष्टस्य धूमादेः पर्वतवृत्तित्वज्ञानात् 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकं ज्ञानं जायते । अयमेव 'परामर्शः' अथवा 'लिङ्गपरामर्शः ' इत्युच्यते । इदमेव अनुमानपदवाच्यमिति **नवीनाः** । ततो व्याप्येन धूमेन व्यापकस्य वह्न्यादेर्निश्चयः पर्वते जायते 'पर्वतो वह्निमान्' इति । इयमेवानुमितिरित्युच्यते । इदमेव 'स्वार्थानुमानम्' इत्युच्यते । **'अनुमीयत अनेनेत्यनुमानम्'** इति करणार्थकप्रत्यये तु ज्ञानकरणमर्थः । अस्यानुमानस्य स्वानुभवरूपत्वात् 'स्वार्थानुमानम्' इति व्यवहारः ।।

परार्थानुमानं निरूपयति - **यत्त्वित्यादिना** । कश्चित् स्वानुभवक्रमेण परस्य पुरुषस्यापि तादृशानुमित्युत्पिपादयिषया वाक्यानि प्रयुङ्क्ते । तानि वाक्यानि श्रृण्वन् परोऽपि तत्फलतया पदार्थनिर्णयं करोति । अत्र तादृशवाक्यप्रयोग एव मूलम् । अतस्तानि वाक्यानि 'परार्थानुमानम्' इत्युच्यन्ते । अत्रानुमानपदं

स्वार्थानुमितिपरार्थानुमित्योः लिङ्गपरामर्श एव करणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ।

आलोक-व्याख्या

करणार्थकम् । तानि च वाक्यानि 'न्यायः' इत्युच्यन्ते । तानि च पञ्च - प्रतिज्ञाहेतूदाहरणोपनयनिगमनसंज्ञकानि **'न्यायावयवाः'** इत्यप्युच्यन्ते । 'पर्वतो वह्निमान्' इति प्रतिज्ञा । 'धूमात्' इति हेतुः । 'यो धूमवान् स वह्निमान्, यथा महानसम्' इति व्याप्तिप्रतिपादकं वाक्यम् उदाहरणम् । 'तथा चायम्' ('वह्निव्याप्यधूमवांश्चायम्') इति परामर्शानुकरणवाक्यम् उपनयः। 'तस्मात्तथा' इति चेत् - 'पर्वतस्य वह्निव्याप्यधूमवत्त्वात् पर्वतो वह्निमान्' इत्युपसंहाररूपं वाक्यं निगमनम् । **एतत्पञ्चावयववाक्यसमुदाय एव न्यायः** इत्युच्यते । प्रतिज्ञादयः प्रत्येकम् 'अवयवाः' अथवा 'न्यायावयवाः' इत्युच्यन्ते । एतत्पञ्चावयववाक्यश्रवणात् श्रोतुर्मानसः 'वह्निव्याप्यधूमवान् पर्वतः' इति परामर्शो जायते । ततः 'पर्वतो वह्निमान्' इति निश्चयऽनुमितिरूपो जायते । परस्यानुमितिं प्रति हेतुत्वात् एतानि पञ्चवाक्यानि 'परार्थानुमानम्' इत्युच्यन्ते । विशिष्य वादिप्रतिवादिनोः परस्परमभिमतार्थस्य प्रतिपादनाय वादरूपे जल्परूपे वा वाक्यार्थेऽस्य परमार्थानुमानस्य प्रधानोपयोगः ।।

स्वार्थानुमितीति । स्वार्थं संपन्ना अनुमितिः स्वार्थानुमितिः । परार्थं संपन्ना अनुमितिः परार्थानुमितिः । उभयोरपि लिङ्गपरामर्श एवानुमित्यव्यवहितपूर्वक्षणे वर्तत इति लिङ्गपरामर्श एवानुमितिकरण-मनुमानपदवाच्यमिति **नवीनाः** । पञ्चावयववाक्यानां परार्थानुमानपदवाच्यत्वं तु अनुमितिहेतुभूतमानसलिङ्गमर्शजनकत्वात्पारिभाषिकम् । पूर्वमेव करणलक्षणेऽयमर्थो विचारितो द्रष्टव्यः ।।

अन्वयव्याप्तिः **'साध्याभाववदवृत्तित्वम्'** इति पूर्वमेवोक्तम् ।

आलोक-व्याख्या

व्यतिरेकव्याप्तिस्तु **'साध्याभावव्यापकीभूताभावप्रतियोगित्वम्'** । 'वह्निमान् धूमात्' इत्यादौ साध्यः वह्निः। तदभावः = वह्न्यभावः । तद्व्यापकीभूतोऽभावः = धूमाभावः । तत्प्रतियोगित्वं धूमे वर्तत इति लक्षणसमन्वयः । 'यत्र साध्याभावः = वह्न्यभावः, तत्र हेत्वभावः = धूमाभावः, यथा ह्रदः' इति व्यतिरेकव्याप्त्यभिलापकः शब्दः । तथा च हेतुसाध्ययोः व्याप्तिरन्वयव्याप्तिः, साध्याभावहेत्वभावयोर्व्याप्तिः व्यतिरेकव्याप्तिरिति निष्कर्षः।। **लिङ्गम्** गमको हेतुः । तत् लिङ्गम् त्रिविधम् । व्याप्तिविशिष्टं हि धूमादिकं वह्न्यादिगमकम्, न केवलं धूमादीति सूचनाय हेतुपदं विहाय लिङ्गपदमुक्तम् । हेतुविशेषणस्य व्याप्तेः त्रिविधत्वात् लिङ्गं त्रिविधमित्युक्तम् । कुत्रचित् हेतावन्वयव्याप्तिः, व्यतिरेकव्याप्तिश्चेति द्वयमपि विशेषणतया भासते । अतस्तादृशं लिङ्गमन्वयव्यतिरेकीत्युच्यते । यत्र हेतावन्वयव्याप्तिमात्रं वर्तते तल्लिङ्गं केवलान्वयीत्युच्यते । यत्र हेतौ व्यतिरेकव्याप्तिमात्रं विशेषणतया भासते तत् लिङ्गं केवलव्यतिरेकि । दृष्टान्तः - 'पर्वतो वह्निमान् धूमात्' इत्यत्र 'यत्र धूमः, तत्र वह्निः यथा महानसं' इत्यन्वयव्याप्तिः। 'यत्र वह्निर्नास्ति, तत्र धूमोऽपि नास्ति, यथा महाह्रद' इति व्यतिरेकव्याप्तिः । एवं धूमे लिङ्गे द्वयमप्यस्तीति धूमोऽन्वयव्यतिरेकिलिङ्गम् । इदं स्वार्थानुमाने । परार्थानुमाने **त्वन्वयव्याप्तिक्रमः** 'पर्वतो वह्निमान्' इति प्रतिज्ञा । 'धूमात्' इति हेतुः। 'यत्र धूमस्तत्र वह्निः, यथा महानसम्' इत्युदाहरणम् । 'वह्निव्याप्यधूमवांश्चायम्' इत्युपनयः । 'वह्निव्याप्यधूमवत्त्वात् पर्वतो वह्निमान्' इति निगमनम् । परार्थानुमाने **व्यतिरेकव्याप्तिक्रमः** 'पर्वतो वह्निमान्' इति प्रतिज्ञा । 'धूमात्' इति हेतुः । यो न वह्निमान्, स न धूमवान्, यथा महाह्रदः' इत्युदाहरणम्। 'वह्न्यभावव्यापकीभूतस्य धूमाभावस्याभाववानयम्' इति वा, 'वह्न्यभावव्याप-कधूमाभाववान्नायम्' इति वोपनयः । 'वह्न्यभावव्यापकधूमाभावस्याभावात्,

लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निः यथा महानसः इत्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रदः इति व्यतिरेकव्याप्तिः । अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात् पटवत् इति । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च । व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलम् । न चेयं तथा । तस्मान्न तथेति ।

आलोक-व्याख्या

न वह्न्यभाववानयम्' इति निगमनम् । 'न वह्न्यभाववानयम्' इति चेत् वह्निमत्त्व एव पर्यवसानम्, वह्न्यभावाभावस्य वह्निरूपत्वात् । एवमेव सर्वत्र अन्वयव्यतिरेकव्याप्त्युपपादनं द्रष्टव्यम् ।।

'घटोऽभिधेयः, प्रमेयत्वात्' इत्यत्र 'यत्र यत्र प्रमेयत्वम्, तत्र तत्राभिधेयत्वम्' इति स्वार्थानुमानेऽन्वयव्याप्तिः । अभिधेयत्वप्रमेयत्वयोः केवलान्वयित्वेनाभावाप्रसिद्ध्या व्यतिरेकव्याप्तिर्नास्ति । परार्थानुमाने 'घटः अभिधेयः' इति प्रतिज्ञा 'प्रमेयत्वात्' इति हेतुः । प्रमेयत्वं यत्र, तत्राभिधेयत्वम्, यथा पटे' इत्युपनयः । 'अभिधेयत्वव्याप्यप्रमेयत्ववांश्चायं घटः' इत्युपनयः। 'अभिधेयत्वव्याप्यप्रमेयत्ववत्त्वात् अभिधेयत्ववांश्चायं घटः' इति निगमनम्।।

केवलव्यतिरेकिणं दर्शयति - **यथा पृथिवीत्यादि** । पृथिव्या गन्धवत्त्वं लक्षणमुक्तम् । लक्षणं चेतरवैलक्षण्यसाधकम् । पृथिवी इतरेभ्यः = जलादिभ्यो भिद्यते । अतः सा इतरेभ्यो भिन्ना = विलक्षणा भवति ।

अत्र यद्गन्धवत्तदितरभिन्नम् इत्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ।

आलोक-व्याख्या

कुतः? गन्धवत्त्वात् इति हेतुः । तथा च 'पृथिवी जलादिभिन्ना, गन्धवत्त्वात्' इति प्रयोगः कर्तव्यः । अत्र 'यत्र यत्र गन्धवत्त्वम्, तत्र जलादिभेदः' इत्यन्वयव्याप्तिर्न संभवति । गन्धवत्याः पृथिव्याः पक्षत्वात् । अन्यत्र कुत्रापि गन्धाभावात् हेतुसाध्ययोर्व्याप्तिः = अन्वयव्याप्तिर्न संभवति । किन्तु 'यत्र साध्याभावः, तत्र हेत्वभावः' इति व्यतिरेकव्याप्तिरेव भवति । अत्र साध्यो जलादिभेदः । साध्याभावः = जलादिभेदाभावः । हेतुः = गन्धवत्त्वम् । हेत्वभावः = गन्धवत्त्वाभावः। यत्र जलादिभेदाभावः, जलादौ वर्तते, तत्र गन्धवत्त्वाभावोऽपि वर्तत इति व्यतिरेकव्याप्तिः।।

व्यतिरेकव्याप्त्यनुगुणान् पञ्चावयवान् प्रदर्शयति - **यथेत्यादि** । 'पृथिवी जलादिभिन्ना' इति प्रतिज्ञा । 'गन्धवत्त्वात्' इति हेतुः । 'यत्र जलादिभेदाभावः, तत्र गन्धवत्त्वाभावः, यथा जलादिकम्' इत्युदाहरणम् । 'न चेयं पृथिवी जलादिभेदाभाव-व्यापकगन्धाभाववती, अपि तु गन्धवती' इत्युपनयः । 'जलादिभेदाभावव्यापकगन्धाभाव-स्याभावात् जलादिभेदाभाववती न, किन्तु जलादिभेदवत्येव' इति निगमनम् ।।

ननु कुतोऽन्वयव्याप्तिर्नास्ति? यत्र गन्धवत्त्वम्, तत्र पृथिव्यां जलादिभेदो वर्तत एव किलेत्याह - **अत्रेत्यादि** । **पृथिवीमात्रस्य** - सर्वपृथिव्याः । तथा च कृत्स्नपृथिव्याः पक्षत्वात्, सपक्षस्याभावात् अन्वयदृष्टान्तो नास्ति, 'पर्वतो वह्निमान् धूमात्' इत्यादौ महानसादिवत् । अतोऽन्वयव्याप्तेरभावात् केवलव्यतिरेकि ।।

'पक्षधर्मता' इत्यत्र पक्षो नाम कः? इति प्रश्ने, पक्षस्य वक्तव्यत्वात्, तत्प्रसङ्गादन्वयव्याप्तिव्यतिरेकव्याप्त्युपयोगितया सपक्षविपक्षयोरप्यवश्यं

सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः ।

आलोक-व्याख्या

ज्ञेयत्वात्तेषां लक्षणान्याह - **सन्दिग्धेत्यादि** । सन्दिग्धं च तत् साध्यं च सन्दिग्धसाध्यम् । सन्दिग्धसाध्यम् अस्मिन्नस्तीति सन्दिग्धसाध्यवान् इति विग्रहः । सन्दिग्धमित्यत्र संपूर्वकदिहधातोः संशयोऽर्थः । क्तप्रत्ययस्य विषयतावानर्थः । प्रकृते प्रकारतावान् इत्यर्थः। प्रकारतावतश्चाभेदसंबन्धेन साध्येऽन्वयः । तथा च **संशयनिरूपितप्रकारतावदभिन्नसाध्य-निष्ठाधेयतानिरूपिताधिकरणतावान् पक्ष** इत्यर्थः । साध्यनिष्ठा-धेयतानिरूपिताधिकरणत्वं प्रकृते संदेहविशेष्यत्वे पर्यवस्यति । तथा च **साध्यनिष्ठप्रकारतानिरूपकसंशयनिरूपितविशेष्यताश्रयः पक्ष** इति शाब्दबोधः । साध्यप्रकारकसंदेहविशेष्यत्वं पक्षत्वमिति लक्षणम् । वह्निमपेक्षमाण आरण्यकः कश्चित् 'पार्श्वस्थःपर्वतो वह्निमान् न वा' इति संदेग्धि । यदा तत्र धूमं पश्यति, तदा 'पर्वतो धूमवान्' इति पक्षधर्मताज्ञानं जायते । अनन्तरं व्याप्तिं स्मरति । अनन्तरं 'वह्निव्याप्यधूमवानयं पर्वतः' इति परामर्शः । ततः 'पर्वतो वह्निमान्' इत्यनुमितिः । अत्र प्रथमं 'पर्वतो वह्निमान्, न वा' इति संशयस्य जननात्, तत्र संशये साध्यस्य वह्नेः प्रकारत्वात्, पर्वतस्य च विशेष्यत्वात् साध्यप्रकारकसंदेहविशेष्यत्वादुक्तानुमितौ पर्वतः पक्ष इत्युच्यते।।

नव्यास्तु अपवरके स्थितस्य घनगर्जनश्रवणे सति **'गगनं मेघवत्, घनशब्दवत्त्वात्'** इत्यनुमानं हठाज्जायते । अत्र पूर्वं 'गगनं मेघवन्न वा?' इति संशयस्याभावात् अनुमितिर्न स्यात् । अतः साध्यनिश्चयाभावमात्रं पक्षता । 'साध्यसंशयः पक्षता' इति तूत्सर्गमात्रम् । पूर्वं निश्चये सति अनुमितेरप्रसरात्, साध्यनिश्चस्यानुमितिं प्रति प्रतिबन्धकत्वात्, प्रतिबन्धकाभावस्य कार्यसामान्यं प्रति कारणत्वात् साध्यनिश्चयाभाव एव पक्षता । यत्र पूर्वं साध्यनिश्चयो नास्ति, स पक्ष इत्युच्यते । साध्यनिश्चय एव साध्यसिद्धिरित्युच्यत

निश्चितसाध्यवान् सपक्षः । यथा तत्रैव महानसः ।
निश्चितसाध्याभाववान् विपक्षः । यथा तत्रैव महाह्रदः ।

आलोक-व्याख्या

इति । साध्यनिश्चयाभाव एव - 'सिद्ध्यभावः पक्षता' इति संक्षेपेणोच्यते । परन्त्वत्राप्यस्ति क्लेशः । उत्कटेच्छेतरसर्वकार्यं प्रति प्रतिबन्धिकेति सर्वसंमतम्। सर्वकार्यं प्रतीति चेत् प्रतिबन्धकं प्रत्यपीच्छा प्रतिबन्धिका । एवञ्च सिद्धिरूपप्रतिबन्धकसत्त्वेऽपि 'पर्वते वह्निमनुमिनुयाम् = अनुमानेन साधयेयम्' इतीच्छायां सत्यां तु पर्वते वह्न्यनुमितिर्भवत्येव । तदा सिद्ध्यभावरूपपक्षताया अभावेऽप्यनुमितिः। कथमिति चेत्, इच्छाविरहकाल एव सिद्धिः = सिषाधयिषाविरहविशिष्टसिद्धिरेव प्रतिबन्धिका । साधयितुमिच्छा सिषाधयिषा प्रकृते अनुमितीच्छा । सिषाधयिषाविरहविशिष्टसिद्धेः प्रतिबन्धकत्वे, प्रतिबन्धकाभावस्य कार्यसामान्यकारणत्वात् सिषाधयिषाविरहविशिष्ट-सिद्ध्यभावोऽनुमितिं प्रति कारणम् । स एव पक्षतेत्युच्यते । घनगर्जितेन मेघानुमानस्थलेऽपि एतादृशसिद्ध्यभावरूपपक्षताऽस्त्येव । यत्र साध्यसंशयानन्तरमनुमितिः, तत्रापि पूर्वं साध्यसंशयस्यैव सत्त्वेन, सिद्धेरभावात् उक्तसिद्ध्यभावरूपपक्षताऽक्षतैवेति कुत्रापि नानुपपत्तिः ।।*

पक्षलक्षणानन्तरं सुगमं सपक्षादिलक्षणमिति, तदाह - **निश्चितेत्यादि**।

टिप्पणी

*साध्यनिश्चयः अनुमितिं प्रति प्रतिबन्धक इत्युक्तम्। साध्यनिश्चयो द्विविधः -- सामानाधिकरण्येन, अवच्छेदकावच्छेदेन च। पुरोवृत्तिपर्वतमात्रे वह्निसाधने सामानाधिकरण्येन साध्यनिश्चयो भवति। धूमवान् पर्वतः सर्वोऽपि वह्निमान् भवेदेवेति साधने पर्वतत्वावच्छेदेन वह्निसाधनात्, इयमवच्छेदकावच्छेदेनानुमितिरित्युच्यते । 'कुसुमं पृथिवी, गन्धवत्त्वात्' इत्यादिरप्यववच्छेदकावच्छेदेनानुमितिः।

एवं सिद्धिरपि अवच्छेदकावच्छेदेन सिद्धिः, सामानाधिकरण्येन सिद्धिरिति

आलोक-व्याख्या

निश्चितसाध्यवानित्यादिकं पूर्ववदेव ज्ञेयम् । तथा च **साध्यप्रकारक-निश्चयविशेष्यत्वं सपक्षत्वम्** । एवमेव **साध्याभावप्रकारकनिश्चयविशेष्यत्वं विपक्षस्य लक्षणमिति** स्पष्टम्। 'वह्निमान् धूमात्' इत्यत्र पर्वतः पक्षः, महानसादिः सपक्षः, महाह्रदादिर्विपक्षः ।।

टिप्पणी

द्विविधा । पक्षतावच्छेदकावच्छेदेन सिद्धिरेव अवच्छेदकावच्छेदेन सिद्धिरित्युच्यते । पक्षतावच्छेदविशिष्टे यत्र कुत्रचित् सिद्धिः पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि पक्षतावच्छेदकावच्छेदेनानुमितेरविरोधात्, सामानाधिकरण्येन साध्यसिद्धिः= 'पुरोवर्तिपर्वतो वह्निमान्' इति सिद्धिः'पुरोवर्तिपर्वतो वह्निमान्' इत्यनुमितिं प्रत्येव प्रतिबन्धिका । ततश्चोभयविधसिद्धिः सामानाधिकरण्येनानुमितिं प्रति प्रतिबन्धिका । अवच्छेदकावच्छेदेनानुमितिं प्रति, अवच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका ।

एवं 'पर्वतो धूमवान्' इति पक्षधर्मताज्ञानानन्तरमेव व्याप्तिस्मरणादिक्रमेणानुमिति-र्जायते । तदा पर्वतप्रत्यक्षहेतोः पर्वतचक्षुस्संयोगस्यापि सत्त्वेन, पर्वतप्रत्यक्षं जायेत वा, वह्न्यनुमितिर्जायेत वा ? इति प्रश्ने वह्न्यनुमितिरेव जायते, न तु पर्वत प्रत्यक्षमित्येवानुभवः । अतः भिन्ने विषये अनुमितिसामग्र्येव प्रबला, न तु प्रत्यक्ष-सामग्री । समाने विषये तु प्रत्यक्षसामग्र्येव प्रबला। एवमनङ्गीकारे कुत्राप्यनुमितिरेव न स्यात्। सर्वत्र चक्षुस्सन्निकर्षरूपसामग्र्यास्सत्त्वेन अन्ततः त्वक्संयोगरूपसामग्र्याः भूप्रदेशादिप्रत्यक्षसामग्र्यास्सत्त्वेन, कुत्रापि अन्यज्ञानमेव न स्यात् । कुत्रापि ज्ञानद्वयं युगपन्न संभवति । **'युगपद् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्'** इति हि सूत्रम् । बाह्येन्द्रियापेक्षया मनसः प्रबलत्वात्, येनेन्द्रियेण मनस्संयुक्तं भवति तदिन्द्रियप्रत्यक्षमेव जायेत । इदमेव मनसोऽवधानमित्युच्यते। 'अवहितमना नासम्, अतो न ज्ञातम्' इत्याद्यनुभवदर्शनात् । अत एव पुण्याहादिकर्मप्रयोगकाले ''स्वामिनोऽवहितमनसो भवत'' ''अवहितमनसः स्मः'' इति प्रश्नप्रतिवचनादिकं दृश्यते। अतस्समाने विषये प्रत्यक्षसामग्री प्रबला, भिन्ने विषये तु परोक्षसामग्री प्रबला इति नियम आवश्यकः। अयं नियमः शाब्दबोधस्थलेऽपि

आलोक-व्याख्या

एवं अनुमितिः साङ्गा निरूपिता । अनुमितिर्यथार्थानुभवविशेषः । तस्या हेतुः व्याप्तिज्ञानम्, व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपपरामर्शो वा । तत्र व्याप्तिर्नाम का? पक्षत्वं नाम किम्? सपक्षत्वम्, विपक्षत्वम् च किम् ? इत्यादिकं सर्वं निरूपितम् । प्रत्यक्षे प्रमाभ्रमविभागो यथा, तथानुमितावपि प्रमाभ्रमविभागो वर्तते । प्रत्यक्षे तत्कारणा-नामिन्द्रियादीनां दोषाद् भ्रमो भवति । तथैवानुमितौ तद्धेतुभूतव्याप्तिपक्षधर्मतादि-वैकल्यरूपदोषाद् भ्रमो भवति । **व्याप्तिपक्षधर्मतादिविशिष्टत्वं सद्धेतूनां लक्षणं** चेत्, **व्याप्तिपक्षधर्मताद्यन्यतमशून्यत्वं दुष्टहेतूनां स्वरूपम्** । यथा 'पर्वतो वह्निमान्, धूमात्' इत्यत्र धूमः सद्धेतुः, तथा 'पर्वतो धूमवान्, वह्नेः' इत्यत्र

टिप्पणी

समानः। अत एव 'परोक्ष' पदम् । परं तु इच्छायाः सर्वकार्यं प्रति उत्तेजकत्वात्, तत्तदिच्छायाःइतरसर्वकार्यं प्रति प्रतिबन्धकत्वात् इतरेच्छाविरहः सर्वत्रावश्यकः। एतत्प्रतिबन्धकत्वमेव 'कामिनीजिज्ञासादिवत्' स्वातन्त्र्येण प्रतिबन्धकत्वमुच्यते । अत एव तद्वत्तावुद्धिं प्रति तदभावावच्छेदकतया गृहीतधर्मवत्तानिश्चयः, ज्ञानविशिष्टज्ञानत्वावच्छिन्ना स्वातन्त्र्येणान्यविषयिणी इच्छा च इति ज्ञानस्थले प्रतिबन्धकत्वं चतुर्विधम्; मणिमन्त्रौषधादीनां तु वस्तूत्पत्तिस्थले प्रतिबन्धकत्वमिति विशेषोऽवगन्तव्यः । ज्ञानमपि हि किञ्चिद्वस्तु, अतो ज्ञानोत्पत्तिं प्रत्यपि एषां प्रतिबन्धकत्वमावश्यकमित्येतत्तु उत्सर्गरूपो वर्तेतैव । अत एव प्राचीने काले जल्परूपकथासु जयपराजयप्रधानासु मन्त्रबलेन वाग्बन्धादिकथाः श्रूयन्ते स्म । अयमंशः मुकुन्दमालास्तोत्रेऽति प्राचीने **'भक्तापायभुजङ्गगारुडमणिः' 'जिह्वे! श्रीकृष्णमन्त्रम्'** 'व्यामोहप्रशमौषधम्--श्रीकृष्णदिव्यौषधम्' इत्यादि दृश्यते। जैनबौद्धादयः मन्त्रादिसिद्धिबलात् वैदिकान् वादे जित्वा स्वमतप्रचारं कुर्वन्त आसन्; आल्वार् (विष्णुभक्ताः) शिवभक्ताश्चावतीर्य तान् दैवबलात् जित्वा पुनः वैदिकमतं स्थापयामासुः इत्यादिकं (क्रैस्त पञ्चमशताब्देरारभ्याष्टमशताब्दि पर्यन्तकाले) चरित्रं दृश्यत इत्यादिकं 'सत्यसिद्धौ' विस्तरेण प्रतिपादितम् ॥

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।

आलोक-व्याख्या

वह्निर्दुष्टो हेतुः । 'यत्र धूमस्तत्र वह्निः' इति वह्निधूमयोर्नियतं साहचर्यं वर्तते । धूमवह्न्योस्तु न तथा साहचर्यं नियतम्, तप्तायोगोलके वह्नेस्सत्त्वेऽपि धूमस्यादर्शनात् । एवमन्येऽपि हेतुदोषास्सन्ति । अतस्सद्धेतुनिरूपणानन्तरमसद्धेतवोऽप्यवश्यं निरूपयितव्याः । असद्धेतव एव हेत्वाभासा इत्युच्यन्ते ।।

तान् संकलय्य विभज्य प्रदर्शयति - **सव्यभिचारेत्यादि ।** हेतुवदाभासन्त इति हेत्वाभासा इति हेत्वाभासपदमत्र दुष्टहेतुपरम्, यतः सव्यभिचारादिपदं दोषविशिष्टपरम् । 'हेतोराभासाः' इति व्युत्पत्त्या तु हेत्वाभासपदं हेतुदोषपरम् ।। व्याप्तिपक्षधर्मताद्यन्यतमशून्यत्वं दुष्टहेतूनां लक्षणम् । निष्कृष्टं लक्षणं तु— **अनुमितितत्करणान्यतरप्रतिवन्धकयथार्थज्ञानविषयत्वम्।** 'ह्रदो वह्निमान्' इति बाधस्थले अनुमितितत्करणान्यतरप्रतिबन्धकं यत् यथार्थज्ञानमिति चेत् ? 'वह्न्यभाववान् ह्रदः' इत्याकारकं ज्ञानम् । **तद्वत्तावुद्धि प्रति तदभाववत्तानिश्चयस्य प्रतिवन्धकत्वात्** 'ह्रदो वह्निमान्' इत्यनुमितिं प्रति 'ह्रदः वह्न्यभाववान्' इति निश्चयस्य प्रतिबन्धकत्वम् । तच्च यथार्थज्ञानम्। तद्विषयत्वं वह्न्यभाववद्ह्रदे वर्तत इति वह्न्यभाववद्ह्रदो बाधः । तादृशबाधितार्थसाधकतया 'धूमात्' इति हेतोः प्रयोगात् हेतुस्तत्र बाधित इत्युच्यते । 'धूमवान् वह्नेः' इत्यत्र तु, साध्यो धूमः । तदभाववान् तप्तायःपिण्डः, तद्वृत्तित्वं हेतौ वह्नौ वर्तत इत्ययं हेतुर्व्यभिचारीत्युच्यते, एतज्ज्ञानं च, व्याप्तिज्ञानं प्रत्येव प्रतिबन्धकम् । 'साध्याभाववदवृत्तिर्हेतुः' इति व्याप्तिज्ञानं प्रति प्रतिबन्धकम्, न तु अनुमितिं प्रति प्रतिबन्धकम् । तदर्थं लक्षणे तत्करणप्रतिबन्धकत्वनिवेशः । 'पर्वतो वह्निमान् धूमात्' इत्यादावपि 'वह्न्यभाववद्वृत्तिर्धूमः' इत्याकारकभ्रमात्मकज्ञाने जाते, व्याप्तेः प्रतिबन्धात्,

सव्यभिचारोऽनैकान्तिकः । स त्रिविधः - साधारणा-साधारणानुपसंहारिभेदात् । तत्र साध्याभाववद्वृत्तिः साधारणः । यथा पर्वतो वह्निमान् प्रमेयत्वात् । अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् । सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः । यथा शब्दो नित्यः शब्दत्वात् । अत्र शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्ति ।

आलोक-व्याख्या

अनुमितिकरणप्रतिबन्धकत्वं जातमिति, भ्रमात्मकज्ञानमादाय हेतोर्दुष्टत्वा-पत्तिरित्यतो यथार्थपदं ज्ञाने विशेषणम् । 'वह्न्यभाववद्वृत्तिर्धूमः' इति ज्ञानस्य भ्रमत्वात् तदादाय धूमस्य न दुष्टत्वसंभवः । बहु विजृम्भितं नव्यतर्कपण्डितैरत्र। तत्त्वन्यत्र ।।

पञ्चधाविभक्तेषु दुष्टहेतुष्वाद्यं लक्षयति- **सव्यभिचारोऽनैकान्तिक इति।** 'धूमवान् वह्नेः' इति प्रयोगे कृते हि, हेतुर्वह्निः धूमवति महानसादौ वर्तते, धूमाभाववति तप्तायःपिण्डेऽपि वर्तते । अतोऽयं हेतुर्धूमधूमाभाव-साधारणः । तेनान्यतरकोटिनिर्णयो न संभवति । अतोऽयं दोषोऽनैकान्तिक इति साधारणादीनां त्रयाणामनुगतं सामान्यलक्षणम् । एकान्तिकः - अन्यतरकोटिनिर्णयावसानः । तद्विपरीतोऽनैकान्तिकः। विचारस्यान्तो हि निश्चयः। निश्चये जाते न हि विचारो वर्धेत ।।

साध्याभाववद्वृत्तित्वं प्रथमस्य साधारणस्य लक्षणम् । 'पर्वतो वह्निमान्, प्रमेयत्वात्' इत्यत्र, साध्यो वह्निः । तदभावः - वह्न्यभावः । तद्वान् ह्रदादिः । तद्वृत्तित्वं प्रमेयत्वे हेतौ वर्तते । अतः प्रमेयत्वहेतुः साधारणः । सव्यभिचारपदस्य साधारणादित्रयसाधारणत्वेऽप्ययमेव 'व्यभिचारी' इति बहुलं व्यपदिश्यते ।।

द्वितीयमसाधारणं लक्षयति - **सर्वेत्यादि** । सर्वेभ्यस्सपक्षेभ्यः,

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वात्। अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति। साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कार्यत्वात् (कृतकत्वात्) घटवत्। (अत्र कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्।)

आलोक-व्याख्या

सर्वेभ्यो विपक्षेभ्यश्च व्यावृत्तः - सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारण इत्युच्यते। हेतोस्सपक्षवृत्तित्वे एवान्वयव्याप्तिर्ग्रहीतुं शक्यते। विपक्षव्यावृत्तत्वं तु सद्धेतोर्गुणः। अथापि पक्षमात्रवृत्तित्वबोधनार्थम्, तेनासाधारण्यसंज्ञाया औचित्यार्थं च तदुक्तम्। अतश्च **सर्वसपक्षव्यावृत्तत्वमात्रं** लक्षणं बोध्यम्।।

अनुपसंहारी - **अन्वयेत्यादि**। अन्वयदृष्टान्तोऽपि नास्ति, व्यतिरेकदृष्टान्तोऽपि नास्ति यत्र, सोऽनुपसंहारी। यथा 'सर्वम् अनित्यम्, प्रमेयत्वात्' इत्यत्र सर्वस्यापि पक्षत्वात्, सपक्षविपक्षौ कथं स्याताम्। असाधारणे सपक्षविपक्षौ स्तः, परन्तु हेतुस्तेभ्यो व्यावृत्तः। अत्र तु सपक्षविपक्षावेव न स्तः। एतत्सूचनाय वा पूर्वं विपक्षोऽपि क्रोडीकृतः। अतश्च व्याप्तिग्रहणस्थलमेव नास्ति।।

विरुद्धः - साध्याभावव्याप्तः। वस्तुतः साध्यव्याप्यो हेतुः स्यात्। एतद्विरुद्धतयात्र हेतुः साध्याभावव्याप्तः प्रकृते इति विरुद्धो हेतुरिति संज्ञा। 'शब्दः नित्यः, कार्यत्वात्' इत्यत्र कार्यत्वं हि साध्यस्य नित्यत्वस्याभावेनानित्यत्वेन व्याप्तम् - यत्र यत्र कार्यत्वम्, तत्र सर्वत्रानित्यत्वमिति व्याप्तिः। यद्यप्यत्र साध्याभाववद्वृत्तित्वं हेतोर्वर्तत इति व्यभिचारदोषोऽप्यस्ति, अथापि '**दुष्टसंकरेऽपि दोषासंकरः**' इति न्यायात् दोषौ एकत्र भवतः। लोके मूर्खः कश्चित् चौर्यं कृत्वा तदाच्छादानार्थम् असत्यं वक्ति। तत्र

यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः । यथा शब्दो नित्यः श्रावणत्वात्, शब्दोऽनित्यः कार्यत्वात् घटवत् ।

आलोक-व्याख्या

एकस्मिन् पुरुषे चौर्यमेको दोषः, असत्यवदनमपरो दोष इति एकस्मिन्नेव दोष-द्वयप्रसक्तावपि दोषयोर्भेदो वर्तत एव । पुरुषैक्यमात्रात् दोषैक्यम्, पापैक्यं वा न भवति । तद्वत् एकस्मिन्नेव हेतौ दोषद्वयसंभवेऽपि दोषैक्यं कदापि न भवतीत्युक्तन्यायस्यार्थः । विरुद्धहेतुप्रयोगे साध्याभावसाधके हेतुः, भ्रान्त्या साध्यसाधकतयोपन्यस्त इति वादिनोऽज्ञानातिशयो ज्ञाप्यते।।

यस्येत्यादि । प्रतिपक्षः - प्रतिपक्षसाधको हेतुः । तेन सहितो यः, स सप्रतिपक्षः, सत्प्रतिपक्ष इति वा कथ्यते । सन् प्रतिपक्षो यत्रेति बहुव्रीहिः। **वादिप्रतिवादिनोश्चर्चायाः 'कथा' इति संज्ञा** । तत्र वादी स्वपक्षसाधनाय 'शब्दो नित्यः, श्रावणत्वात्, शब्दत्ववत्' इति प्रयुङ्क्ते । श्रावणत्वं नाम श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वम् । यत्र श्रावणत्वं वर्तते, तत्र नित्यत्वं वर्तते, यथा शब्दत्वे । **'येनेन्द्रियेण'** इत्यादिन्यायेन शब्दः श्रोत्रेन्द्रियेण गृह्यते चेत्, शब्दत्वमपि श्रोत्रेण गृह्यत इति व्याप्तिरस्ति । एवं वादिना परार्थानुमाने प्रदर्शिते, प्रतिवादिना उक्तहेतोरप्रयोजकत्वं प्रदर्शनीयम्। अथवा प्रतिप्रयोगो वा कर्तव्यः । नो चेत् वादिनो जयः स्यात् । प्रतिप्रयोगश्चैवम् 'शब्दोऽनित्यः, कार्यत्वात्, घटवत्' इति । यत्र यत्र कार्यत्वम्, तत्र सर्वत्रानित्यत्वमिति व्याप्तिरस्ति । एवं पञ्चावयववाक्ये प्रयुक्ते परस्याप्यनुमितिर्भवति 'शब्दोऽनित्यः' इति । अत्र हेतावप्रयोजकत्वेऽप्रदर्शितेऽनुमानद्वयमपि परस्परं प्रतिहतं सत्साध्यसाधकं न भवति । वादिनोः कस्यापि जयो न भवति । अत्र प्रथमो हेतुः सत्प्रतिपक्षदोषयुक्तः 'सप्रतिपक्षितः' इत्युच्यते । एतादृशकथायां परार्थानुमानस्य प्रयोगः सार्थकः।।

असिद्धस्त्रिविधः – आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा – गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्द-माश्रयः। स च नास्त्येव।

आलोक-व्याख्या

असिद्ध इति । पक्षहेत्वादीनां स्वरूपस्यैवासिद्ध्या व्याप्तेरप्यसंभवादेषामसिद्ध इति नाम । आश्रयः - पक्षः । स एव यत्राप्रसिद्धः, स **आश्रयासिद्धः** । गगनवृत्तित्वविशिष्टं ह्यरविन्दमप्रसिद्धम् । अप्रसिद्धपक्षकत्वाद्धेतुरप्यसिद्ध इत्युच्यते । एवमेव 'काञ्चनमयपर्वतो वह्निमान्, धूमात्' इत्युक्ते पर्वते काञ्चनमयत्वाप्रसिद्ध्याऽऽश्रयासिद्धो हेतुः । तथा च **पक्षतावच्छेदकाभाववत्पक्ष आश्रयासिद्ध** इति लक्षणम् । पक्षे यत् विशेषणम्, तत् पक्षतावच्छेदकमित्युच्यते । गगनसंबन्धः, कांञ्चनमयत्वं चोक्तस्थले पक्षतावच्छेदकम् । यद्यप्यरविन्दत्वम्, पर्वतत्वञ्च धर्मितावच्छेदकविधया पक्षे विशेषणत्वात् पक्षतावच्छेदकमेव । तच्च विशेष्येऽरविन्दे, पर्वते च वर्तते, अथापि विशेषणान्तरस्य गगनसंबन्धस्य, काञ्चनमयत्वस्य च विशेष्येऽभावात्, विशिष्टस्यैव पक्षत्वादप्रसिद्धिर्भवत्येवेति दोष एव ।।

यद्यपि **चाक्षुषत्वं** गगनारविन्दवन्नाप्रसिद्धम्, दृष्टान्ते रूप एव प्रसिद्धत्वात्, परन्तु हेतोः पक्षवृत्तित्वं प्रधानं स्वरूपम् । तच्च चाक्षुषत्वे नास्ति । अतो हेतुस्वरूपस्यासिद्ध्या **स्वरूपासिद्धिरि**त्युच्यते । 'पर्वतो वह्निमान्, काञ्चनमयधूमात्' इत्यादिप्रयोगे तु हेत्वसिद्धिर्दोषः । हेतुतावच्छेदकाभावावान् हेतुः हेत्वसिद्धः । हेत्वसिद्धिस्तु स्वरूपासिद्धेरन्यो दोषः । एवम् 'पर्वतः काञ्चनमयवह्निमान्, धूमात्' इति प्रयोगे 'साध्यतावच्छेदकाभाववत्साध्यम्' साध्याप्रसिद्धिरिति दोषोऽपि ज्ञेयः । अनयोस्सुज्ञत्वात्पृथगनुक्तिः ।।

स्वरूपासिद्धो यथा – शब्दो गुणः चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्। सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। (यथा) पर्वतो धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनसंयोग उपाधिः। यत्र धूमः तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता। यत्र वह्निः तत्रार्द्रेन्धनसंयोग नास्ति, अयोगोलक आर्द्रेन्धनसंयोगाभावात्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्।

आलोक-व्याख्या

सोपाधिकः— उपाधिसहितः। तादृशो हेतुः **व्याप्यत्वासिद्धः** इत्युच्यते। व्याप्यः = व्याप्त्याश्रयः। व्याप्यत्वं व्याप्तिः। व्याप्तेरसिद्धिरित्यर्थः। उपाधेर्लक्षणम् - **साध्येत्यादि**। साध्याधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम् = साध्यव्यापकत्वम्। साधनाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वम् = साधनाव्यापकत्वम्। यथा 'पर्वतो धूमवान् वह्नेः' इति प्रयोगे आर्द्रेन्धनसंयोगः = संयोगसंबन्धेनार्द्रेन्धनम् उपाधिः। अत्र साध्यः धूमः। तदधिकरणं महानसादिः। तत्र वर्तते योऽत्यन्ताभाव इति चेत्, आर्द्रेन्धन-संयोगाभावो न भवति। महानसे नियमेनार्द्रेन्धनसंयोगस्य सत्त्वात्। वह्नेरार्द्रेन्धनसंयोगे सत्येव धूमस्योत्पत्तेः। किन्तु जलाद्यभाव एव। तत्प्रतियोगि जलादिकम्, अप्रतियोगी आर्द्रेन्धनसंयोग इति साध्यव्यापकत्वम्। एवम् - साधनं वह्निः। तदधिकरणं तप्तायःपिण्डोऽपि। तत्र वर्तते योऽत्यन्ताभाव इति चेत्, तप्तायःपिण्डे धूमासंभवात्, वह्नेरार्द्रेन्धनसंयोगे सत्येव धूमोत्पत्तेः।

आलोक-व्याख्या

अतस्तप्तायःपिण्डे वर्तमानोऽभावः =आर्द्रेन्धन-संयोगाभावः । तत्प्रतियोगी =आर्द्रेन्धनसंयोग इति साधनाव्यापकत्वमपि वर्तते । अतो वह्निना धूमसाधने आर्द्रेन्धनसंयोग उपाधिः । महानसे आर्द्रेन्धनसंयोगस्य प्रत्यक्षप्रतिपन्नत्वात् वह्निसंयोगरहितस्य तस्य धूमहेतुत्वाभावात् आर्द्रेन्धनसंयोग उपाधिरित्युक्तः। एवञ्च धूमेन यथा वह्निस्साध्यते, तथा वह्निनापि धूमस्साधयितुं शक्य इति भ्रान्त्या 'धूमवान् वह्नेः' इति प्रयोगे कृते, आर्द्रेन्धनसंयुक्तवह्नेरेव धूमजनकत्वात् आर्द्रेन्धनसंयोगे विद्यमाना धूमव्याप्तिस्तत्सन्निहिते वह्नौ गृहीता भ्रान्त्या ।।

यथा जपाकुसुमसंबन्धात् 'लोहितःस्फटिकः' इति प्रतीतिः स्फटिकसंयुक्त-जपाकुसुमगतलौहित्यस्य स्फटिके भानात् औपाधिकी, तथैवात्रापि आर्द्रेन्धनसंयोगे विद्यमाना धूमव्याप्तिरार्द्रेन्धनसंयोगविशिष्टे वह्नौ भासत इति आर्द्रेन्धनसंयोग उपाधिः । **स्वस्मिन् वर्तमानं विशेषं स्वसन्निहिते वस्तुन्यारोपयितुं समर्थं वस्तूपाधिरित्युच्यते ।** यत्र यत्रोपाधिसहितं वस्तु वर्तते, तत्र सर्वत्र तद्वस्तुनि तद्व्यवहारो लोके प्रसिद्धः । तप्तायःपिण्डो दहति । तत्र दाहकत्वं वह्नेर्धर्मः, न केवलमयसः । अयसा संयुक्तो वह्निर्दहति, न त्वयः । वह्निगतं दाहकत्वं स्वसंयुक्तेऽयसि आरोपितम् । अतोऽयसो दाहकत्वमौपाधिकम् । अत एव 'अयो दहति' इति शब्दप्रयोग औपचारिकः । प्रतीतिस्त्वौपाधिकी । इदं सर्वं बुद्धिपूर्वकत्वे । अबुद्धिपूर्वकत्वे तु प्रतीतिर्भ्रान्तिरेव । शब्दप्रयोगोऽपि भ्रान्तिमूलकः ।।

एवञ्च **उप आधीयतेऽनेन (स्वस्मिन् विद्यमानं विशेषं स्वसन्निहिते येनाधीयते)** इति व्युत्पत्त्या - उपाधिः इति पदं निष्पन्नम् । जपाकुसुमं हि स्वसन्निहिते स्फटिके स्वगुणं रक्तरूपमादधत् 'लोहितःस्फटिकः' इति व्यवहारहेतुर्भवति । वह्निर्हि स्वसंयुक्तेऽयसि स्वगुणं दाहकत्वमादधत् 'अयो दहति' इति व्यवहारहेतुर्भवति । एवमार्द्रेन्धनसंयोगः स्वस्मिन् विद्यमानां

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः । यथा वह्निरनुष्णः पदार्थत्वात् । अत्रानुष्णत्वं साध्यम्, तदभाव उष्णत्वं त्वाचप्रत्यक्षेण गृह्यत इति बोध्यम् ।

इति तर्कसंग्रहे अनुमानपरिच्छेदः ॥

आलोक-व्याख्या

धूमव्याप्तिं आर्द्रेन्धनसंयुक्ते वह्नौ भासयति । अतो धूमव्याप्तिर्वह्नौ वर्तत इति भ्रान्त्या प्रयुङ्क्ते 'धूमवान् वह्नेः' इति । तथा च साध्यव्यापकत्वे सति साधनाव्यापकत्वं तदनुगुणमुपाधेर्लक्षणमुक्तम् । साध्यव्यापकत्वमात्रस्य लक्षणत्वे 'वह्निमान् धूमात्' इत्यादावालोकवत्त्वमुपाधिः स्यात् । यत्र यत्र वह्निः, तत्रालोको वर्तत इति साध्यव्यापकत्वात् । तदर्थं साधनाव्यापकत्वमुक्तम् । एवं सति आलोकवत्त्वस्य धूमव्यापकत्वात् साधनाव्यापकत्वाभावान्न तस्योपाधित्वम् । साधनाव्यापकत्वमात्रोक्तौ - 'शब्दोऽनित्यः, कार्यत्वात्' इत्यत्र अश्रावणत्वमुपाधिः स्यात् । 'यत्र यत्र कार्यत्वम्, तत्र सर्वत्र अश्रावणत्वम्' इति व्याप्तेरभावात् । पक्षे शब्दे कार्यत्वसत्त्वेऽपि अश्रावणत्वस्याभावेन साधनाव्यापकत्वसत्त्वात् । साध्यव्यापकत्वनिवेशे तु 'यत्र यत्रानित्यत्वम्, तत्र सर्वत्राश्रावणत्वम्' इति साध्यव्यापकत्वस्यापि अश्रावणत्वेऽभावान्नोपाधित्वम् । एतादृशोपाधिविशिष्टो हेतुस्सोपाधिकत्वात् व्याप्यत्वासिद्ध इत्युच्यते।।

बाधितं निरूपयति - **यस्येत्यादि** । अत्र वाक्ये 'पक्षे' इति पूरणीयम् । यस्य हेतोः, सम्बन्धसामान्ये षष्ठी, साध्यस्याभावः पक्षे प्रमाणान्तरेण प्रत्यक्षादिना निश्चितः, स हेतुर्बाधित इत्युच्यते । तथा च **साध्याभाववत्पक्षकत्वं वाधः** इति बाधदोषस्य लक्षणम् । तादृशपक्षकत्वात् उक्तो हेतुर्बाधित इत्युच्यते । यथा 'ह्रदो वह्निमान्' इत्यत्र वह्न्यभाववद्ध्रदो बाधः । ह्रदे वह्न्यभावः प्रत्यक्षसिद्धः ।।

आलोक-व्याख्या

एवं दुष्टहेतूनां स्वरूपेऽवगते, एभिरनुमितिर्न भवति, साक्षाद्वा परम्परया वानुमितेः प्रतिबन्धात् । **तद्वत्तावुद्धिं प्रति तदभाववत्तानिश्चयः, तदभावव्याप्यवत्तानिश्चयश्च प्रतिवन्धकः** । 'भूतलं घटाभाववत्' इति निश्चयः 'भूतलं घटवत्' इति निश्चयं प्रति प्रतिबन्धकः । 'ह्रदो वह्न्यभाववान्' इति निश्चये जाते 'ह्रदो वह्निमान्' इति ज्ञानं न हि भवितुं शक्यम् । एवम् 'वह्न्यभावव्याप्यजलवान् ह्रदः' इति ज्ञाने सत्यपि 'ह्रदो वह्निमान्' इति ज्ञानं न भवति । जले विद्यमाने कथं वह्निस्स्यात् । अतस्तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयः, तदभावव्याप्यवत्तानिश्चयश्चेति द्वयं साक्षादेव प्रतिबन्धकम्। एवम् 'जलवान् ह्रदः' इति निश्चयोऽपि 'वह्न्यभावव्याप्यं जलम्' इति ज्ञानकालिको वह्निमत्ताबुद्धिं प्रति प्रतिबन्धकः । तदभावव्याप्यवत्तानिश्चयस्तु एकं ज्ञानम् । इदं तु ज्ञानविशिष्टं भिन्नं ज्ञानम् । ज्ञानविशिष्टज्ञानत्वेन इदं ज्ञानद्वयं प्रतिबन्धकमित्युच्यते । निष्कर्षस्तु **'तदभावावच्छेदकतया गृहीतधर्मवत्तानिश्चयोऽपि तद्वत्तावुद्धिं प्रतिवन्धकः'** इति । तदभावः - वह्न्यभावः । तदवच्छेदकतया गृहीतो धर्मः 'जलवत्त्वम्' । 'वह्न्यभावव्याप्यं जलम्' इति एकं ज्ञानम्, 'जलवान् ह्रदः' इत्यपरं ज्ञानम् । अत्र जलवत्त्वं वह्न्यभावव्याप्यतया गृहीतम् । अतस्तदभावावच्छेदकतया गृहीतधर्मवत्ता-निश्चयोऽपि तद्वत्ताबुद्धिं प्रति प्रतिबन्धकः ।।

एवं मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वमपि अतिरिक्तमङ्गीकार्यम् । मणिसहितेन वह्निना दाहो न जायते । मणेः सत्तैव दाहं प्रति प्रतिबन्धिका। एवं मन्त्रविशेषोऽपि । आदिना ओषधिविशेषो विवक्षितः । एते हि कार्यं प्रति साक्षादेव प्रतिबन्धकाः । तद्वत्ताज्ञानमप्येकं कार्यम् । एतत्प्रति तदन्यविषयिण्युत्कटेच्छापि प्रतिबन्धिकैव । 'वह्निव्याप्यधूमवानयं पर्वतः' इति परामर्शसमकालमन्यविषयिणी उत्कटेच्छा यदि भवेत्, तदा 'पर्वतो

आलोक-व्याख्या

वह्निमान्' इत्यनुमितिर्न स्यात् । इदमेव प्रतिबन्धकम् **'कामिनीजिज्ञासादिवत्स्वातन्त्र्येण प्रतिबन्धकम्'** इत्युच्यते । तरुणस्य हि पुरुषस्य कामिनीविषयिणी तीव्रेच्छा - दिदृक्षादिरूपा यदि भवेत्, तदा सा तीव्रेच्छा इतरकार्यप्रतिबन्धिका यतः, तत एवानुमितिं प्रत्यपि प्रतिबन्धिका । तथा च **तद्वत्तावुद्धिं प्रति** १) **तदभाववत्तानिश्चयः** २) **तदभावव्याप्यवत्तानिश्चयः** ३) **तदभावावच्छेदकतया गृहीतधर्मवत्तानिश्चयः** ४) **स्वातन्त्र्येण चेति** प्रतिबन्धकत्वं चतुर्विधम् । आद्यं त्रयं ज्ञानरूपम् । अन्तिमं तु न ज्ञानरूपम्। किन्तु वस्तुरूपम् । अत एवेदं चतुर्थं 'स्वातन्त्र्येण प्रतिबन्धकम्', 'मणिमन्त्रादिन्यायेन प्रतिबन्धकम्', 'कामिनीजिज्ञासादिवत्प्रतिबन्धकम्' इत्यादिशब्दैर्व्यवह्रियते । प्रतिबध्यं तु ज्ञानं संशयरूपं निश्चयरूपं च । अत एव प्रतिबध्यकोटौ 'ज्ञान'पदम्, 'बुद्धि'पदमेव वा प्रयोज्यम् । प्रतिबन्धककोटौ तु 'निश्चय' पदमेव प्रयोज्यमित्यत्यन्तमवधेयम् ।।

प्रकृते - सव्यभिचारेषु **आद्यं** साध्याभाववद्वृत्तित्वरूपसाधारणदोषज्ञानम्, साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानं प्रति प्रतिबन्धकत्वात् अनुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वाद्धेत्वाभासत्वम् । **असाधारण्यं** तु हेतोः पक्षमात्रवृत्तित्वरूपम् । तद्ज्ञानं व्याप्तिज्ञानं प्रति प्रतिबन्धकम् । सपक्षसत्त्वेऽपि हेतुस्तत्र न वर्तत इति व्याप्तिग्रहसंभवात् । **अनुपसंहारी** तु, सर्वस्यापि पक्षत्वात्, सपक्षविपक्षयोरभावात्, अन्वयव्याप्तिर्वा व्यतिरेकव्याप्तिर्वा ग्रहीतुं न शक्यत एवेति व्याप्तिग्रहणासंभवाद्दुष्टः ।।

विरुद्धो हेतुः, साध्याभावव्याप्तत्वज्ञानात् साध्यव्याप्तिविघटक इति व्याप्तिज्ञानप्रतिबन्धकः । अथवा साध्याभावव्याप्यवत्तानिश्चयविधयानुमितिप्रतिबन्धको वा? **सत्प्रतिपक्षितो** हेतुस्तु साध्याभावव्याप्यत्वात्, तद्वत्ताबुद्धिं प्रति तदभावव्याप्यवत्तानिश्चयविधया साक्षादेव साध्यवत्ताबुद्धिं प्रति प्रतिबन्धकः।

आलोक-व्याख्या

परन्तु हेतुप्रतिहेतुद्वयसत्त्वात् परस्परं तत्तदभावव्याप्यवत्ताबुद्ध्योः प्रतिबन्धकत्वादनुमितिप्रतिबन्धकः ।। **असिद्धौ - आश्रयासिद्धिस्तु** पक्षस्यैवाप्रसिद्ध्या पक्षे साध्यवत्तानिश्चयासंभवात्परपरयानुमितिप्रतिबन्धः । एवमेव साध्याप्रसिद्धिहेत्वप्रसिद्ध्योरपि ज्ञेयम् । **स्वरूपासिद्धेस्तु** पक्षे हेतुमत्ताज्ञानरूपपक्षधर्मताज्ञानविघटकत्वात्परामर्शप्रतिबन्धः फलम् ।।

व्याप्यत्वासिद्धेस्तु - सोपाधिकत्वात्, प्राचीनमते अनौपाधिकसम्बन्धरूपत्वाद्व्याप्तेः साक्षाद्व्याप्तिज्ञानप्रतिबन्धः फलम् । **नवीनमते** तु बाधोन्नायकतया साक्षादनुमितिप्रतिबन्धः फलम् । उन्नायकत्वं नामानुमापकत्वम् - अनुमितिजनकत्वम् । अथवा व्यभिचारोन्नायकतया व्याप्तिज्ञानप्रतिबन्धः फलम् । 'हेतुः साध्यव्यभिचारी, साध्यव्यापकोपाधिव्यभिचारित्वात्, यो यद्व्यापकव्यभिचारी, स तद्व्यभिचारी । यथा घटत्वव्यापकपृथिवीत्वव्यभिचारि जलत्वं घटत्वव्यभिचारि' इति सामान्यव्याप्तिः । अथवा 'धूमवान् वह्नेः' इत्यादिस्थले वह्निः धूमव्यभिचारी, धूमव्यापकार्द्रेन्धनसंयोग-व्यभिचारित्वात्, यो यद्व्यापकव्यभिचारी, स तद्व्यभिचारी, यथा घटत्वव्यापकपृथिवीत्वव्यभिचारि जलत्वं घटत्वव्यभिचारि इति विशेषव्याप्तिः । बाधोन्नायकत्वं नाम तदभावसाध्यकानुमितिजनकत्वम् । यथा 'धूमवान् वह्नेः' इत्यादौ 'अयोगोळकं धूमाभाववत्, धूमव्यापकार्द्रेन्धनसंयोगाभावात्, यत् यद्व्यापकाभाववत्, तत् तदभाववत्, यथा घटत्वव्यापकपृथिवीत्वाभाववत् जलं घटत्वाभाववत्' इत्यनुमानं बोध्यम् । एवञ्च हेतोर्दुष्टत्वज्ञाने जाते, तादृशहेतोरनुपादेयत्वनिश्चयः, अदुष्टहेतोरुपादेयत्वनिश्चयश्च भवतीति हेत्वाभासज्ञानमपि विवेकहेतुतया तत्त्वज्ञानोपयोगीति मन्तव्यम् ।।

।। **इत्यनुमानखण्डः** ।।

अथोपमानखण्डः

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसंबन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम् । तथा हि - कश्चिद्गवयशब्दार्थमजानन् कुतश्चिदारण्यकपुरुषात् गोसदृशो गवयः इति श्रुत्वा वनं गतो गोसदृशपिण्डं पश्यन् वाक्यार्थं स्मरति। तदनन्तरमयं गवयपदवाच्यः इत्युपमितिरुत्पद्यते ।

इति तर्कसंग्रहे उपमानपरिच्छेदः समाप्तः ।

आलोक-व्याख्या

अथोपमानखण्डः

क्रमप्राप्तमुपमानं निरूपयति - **उपमितीति** । उपमितेः करणम् - उपमितिकरणम् । करणं नाम करणतावत् = असाधारणकारणतावदित्यर्थः। उपमितेरित्यत्र षष्ठ्याः कार्यत्वमर्थः । तत्र च प्रकृत्यर्थस्याधेयतासंबन्धेनान्वयः। कार्यतायाश्च निरूपितत्वसंबन्धेन असाधारणकारणतायामन्वयः । तथा च **उपमितिनिष्ठकार्यतानिरूपितासाधारणकारणतावत् उपमानम्** - इति शाब्दबोधः । लक्षणं तु— **उपमितिनिष्ठकार्यतानिरूपितासाधारण-कारणतावत्त्वम्** इति ।।

उपमितिर्नाम केत्यत्र - **संज्ञेत्यादि** । गोसदृशस्यारण्यकप्राणिनः 'गवयः' इति संज्ञा । संज्ञी तु प्राणिविशेषः । 'गवयपदं गोसदृशप्राणिवाचकम्' इत्यर्थनिर्णयः - गवयपदवाच्यनिर्णय उपमितिशब्दार्थः । स च निर्णयः शब्दार्थयोर्वाच्यवाचकभावसंबन्धज्ञानमूलक इति वाच्यवाचकभावसंबन्धज्ञानम्

आलोक-व्याख्या

- संज्ञासंज्ञिसंबन्धज्ञानम् उपमानपदार्थो नवीनमते । एतच्च संबन्धज्ञानं गोगवययोः सादृश्यज्ञानमूलकम् । प्राचीनमते एतदेवोपमानपदार्थः । संज्ञासंज्ञिसंबन्धिज्ञानं मध्ये व्यापारः, अनुमितौ परामर्श इव । एवञ्चोपमानं शक्तिग्राहकं प्रमाणमवगन्तव्यम् । अत एव शब्दप्रमाणात्पूर्वं परिगणितम् । तत्प्रकारं वर्णयति - **तथा हीत्यादिना** ।।

नन्वेवं शक्तिग्राहकस्याप्युपमानस्य वस्तुग्राहकप्रमाणानां प्रत्यक्षादीनां मध्ये गणनं कथमिति चेत्, सत्यम् । लोकातीतवस्तुवाचकानां वैदिकानामिन्द्रादिपदानां शक्तिग्रह उपमानादेव वक्तव्यः । एवं परोक्षाणां परदेशानां प्रतिदिनं क्रियमाणो व्यवहारादिरुपमानमूलक एव । यथा भोजनस्य तृप्तिसाधनत्वज्ञानमनुमानरूपमप्यतिपरिचयात् प्रत्यक्षसदृशं भवत्येवमुपमानमपि । अतो वेदप्रामाण्यहेतुत्वात्, दैनन्दिनव्यवहाराणां बहूनां प्रामाण्यनिर्वाहार्थमुपमानस्यैवाश्रयणीयतयांशतो वस्तुग्राहकत्वमप्यस्त्युपमानस्य। नो चेत्प्रायस्सर्वैर्मूकैर्भवितव्यमिति मत्वा उपमानमपि स्वतन्त्रं प्रमाणं परिगणितमिति मन्तव्यम् ।।

अंशतः पारतन्त्र्यं तु प्रत्यक्षादेरप्यनिवार्यम् । सर्वप्रमाणमूर्धन्यमपि ऐन्द्रियकं प्रत्यक्षप्रमाणमालोकादिसापेक्षमेव । तावता प्रत्यक्षं स्वविषये स्वतन्त्रमित्येव सर्वसंमतम् । एवं शब्दानुमानयोरपि प्रत्यक्षोपजीव्यत्वस्यानिवार्यत्वेपि स्वविषये स्वातन्त्र्यमवर्जनीयमेव । एवमेवोपमानमपि केवलशक्तिग्राहकप्रमाणमिति स्थितेऽपि पारलौकिकानां स्वर्गापवर्गादिविषयाणां शब्दैकसमधिगम्यत्वेन तद्विषयकव्यवहारः स्वतन्त्र इव भाति विदुषाम्। अत्रत्यमर्यादाया अतिसूक्ष्माया अपरिचयादेव उच्चावचाः वादविवादाः वर्धन्त इत्यपि न तिरोहितं विदुषाम् । अतः अक्षपादोक्तिरत्यन्तसाधीयसीति प्रामाणिकैर्मन्तव्यम् ।।

।। **इत्युपमानखण्डः** ।।

अथ शब्दखण्डः

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं तु पदसमूहः ।

आलोक-व्याख्या

अथ शब्दखण्डः

क्रमप्राप्तं शब्दप्रमाणं निरूपयति - **आप्तेत्यादि** । आप्तस्य वाक्यम् आप्तवाक्यम् । सम्बन्धसामान्ये षष्ठी । स च प्रकृते तदुच्चरितत्वरूपः। तथाच— **आप्तोच्चरितत्वे सति वाक्यत्वं शब्दप्रमाणलक्षणम्** । अनेन जातं च प्रमात्मकं ज्ञानं शाब्दबोध इत्युच्यते । यद्यपि वञ्चकवाक्यजन्यं ज्ञानं भ्रमः स्यात्, परन्तु 'यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम् - प्रत्यक्षानुमानोपमानशब्दभेदात्' इत्येवोक्तेः, यथार्थानुभवस्यैवायं विभागः । अतश्चाप्तोच्चरितवाक्यमेव शाब्दप्रमितेः करणभूतः शब्द इत्यनाप्तवाक्यस्य प्रमाकरणत्वमेव नास्तीति नातिव्याप्तिः ।।

आप्तो नाम कः? **यथार्थवक्तेति** । **'आप्तो यथादृष्टार्थवक्ता'** इत्यपि दृश्यते । स्वेन यथा दृष्टं तथैव वदेच्चेदाप्त इति । परं तु तदीयदर्शने यदि भ्रान्तिस्स्यात्तदा का गतिः? इति प्रश्नो भवति । तदानीं तस्य विप्रलंभकत्वाभावेऽपि आप्तत्वं कथं स्यात्, वस्तुस्थित्या तेनान्यथाकथनादिति चेत्, अत एव 'यथादृष्टार्थवक्ता' इति परित्यज्य 'यथार्थवक्ता' इत्युक्तम् । यत्र स्वयंभ्रान्तोऽपि तदजानन्नेव सत्यं मत्वा वक्ति, तदा स नाप्तः, नापि

शक्तं पदम् ।

अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः ।

आलोक-व्याख्या

विप्रलम्भकः, तस्य विप्रलिप्साया अभावात्, नापि यथार्थवक्ता, किन्तु यथादृष्टार्थवक्ता । अत एव शब्दव्यवहारे महान् भारो वर्तते, श्रोतुरपि भारोऽनिवार्यः । प्रामाण्यं प्रति यथार्थवक्तृत्वमेव हेतुः ।।

आप्तलक्षणमुक्तम् । वाक्यं नाम किम् ? इत्यत्राह - **पदसमूह इति** । तर्हि पदं नाम किम्? इत्यत्र - **शक्तं पदमिति** । शक्तिविशिष्टोऽकारादिवर्णसमुदायः पदमित्यर्थः ।।

ननु नैयायिकैः शक्तेरतिरिक्ताया अनङ्गीकारात् 'शक्तम्' इति कथमुच्यते ? इत्यत्र **अस्मादित्यादि** । **ईश्वरसङ्केतः शक्तिरिति** *शक्तेः स्वरूपम् । **'अस्मात् पदादयमर्थो वोद्धव्यः'** इति ईश्वरसङ्केतस्याभिलापकः = प्रदर्शकः शब्दः । लोके हि गवादिशब्दाः सर्वदेशकालेषु सर्वेषामपि सास्नादिमत्प्राणिविशेषबोधजनका दृश्यन्ते । कथमेवमविसंवादेन शब्दप्रयोगः,

टिप्पणी

***शक्तिग्राहकप्रमाणानि** -- कस्य पदस्य कुत्र शक्तिः ? इति कथं ज्ञायते इति चेत्— ईश्वरेच्छैव तत्र नियामिकेत्युक्तं किलेति चेत्, ईश्वरेच्छां सामान्यजनाः कथं जानीयुरिति चेत् -- सत्यम् - परिगणितानि शक्तिग्राहकान्येवम् —

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च ।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।। इति । **अस्यार्थः**— शक्तिग्रहं व्याकरणोपमानादिभिः वृद्धाः प्रवदन्तीत्यन्वयः । शक्तिर्नाम प्रकृते पदानां बोधनसामर्थ्यम् ।

१) **व्याकरणात्** शक्तिग्रहः धातुप्रकृतिप्रत्ययानां भवति । यथा **भू सत्तायाम्** इत्यादिना भ्वादिधातूनां सत्ताद्यर्थे शक्तिर्ज्ञायते । एवं **घटम्** इत्यादौ द्वितीयाविभक्त्यादीनां कर्मत्वाद्यर्थे शक्तिरित्यपि **कर्मणि द्वितीया** इत्यादिव्याकरणात् ज्ञायते ।

आलोक-व्याख्या

शाब्दबोधश्च ? पूर्वपूर्वपुरुषाणां परम्परया तथा प्रयोगवशादिति चेत्, प्रथमप्रयोगः कस्येति वक्तव्यम् । **'गावो वा एतत्सत्रमासत'** इत्यादिषु वैदिकप्रयोग एव प्रथमप्रयोग इति चेत्, वेदस्येश्वरोपदेशरूपत्वात्, ईश्वर एवैतादृश-बोधजनकेच्छया एतानि पदानि प्रयुक्तवानिति ज्ञायते । यथा गुणवृद्ध्यादिसंज्ञाः पाणिनिना तत्तदर्थबोधेच्छया संकेतिता इदानीमपि तथैव प्रयुज्यन्ते । ततश्च 'गुणवृद्ध्यादिपदं तत्तदर्थबोधजनकं भवतु' इति पाणिनीच्छापूर्वकं यथा,

टिप्पणी

२) **उपमाना**च्छक्तिग्रहप्रकारश्चोपमानखण्डे प्रादर्शि ।

३) **कोशः** नामलिङ्गानुशासनादिः । **पुलोमजा शचीन्द्राणी** इत्यादिकोशात् पुलोमजादिपदानाम् इन्द्रपत्न्यादौ शक्तिर्ज्ञायते । इन्द्रादिपदानां तु वस्तुत उपमानादेव शक्तिरित्यादिकं लोकादेव ज्ञायते । यथा वा एतल्लोके राजानोऽधिपतयः, तथेन्द्रादयोपीत्येव वक्तव्यम् ।।

४) **आप्तवाक्यम्** — आप्तानां मित्रादीनां वाक्यादपि पाकशासनादिपदानामिन्द्रादौ शक्तिग्रहः ।।

५) **व्यवहारः**— हानोपादानादिः । **गामानय ,गां नय** इत्यादि वृद्धवाक्यं शृण्वन् पार्श्वस्थो बालः, गवानयनादिकर्मणि प्रवृत्तं तत्पुत्रम्, गवानयनादिकं च पश्यन्, तत्तत्पदानामावापोद्वापादिकं च जानन् तत्तत्पदानां तत्तदर्थे शक्तिं जानाति । बाला ह्यतिसूक्ष्ममतयः, सदा कुतूहलिनः, जिज्ञासापरायणास्सहजत एव । अत एव बाल्ये पदानां आनयनादिकार्यान्वित एव शक्तिग्रहात्, कार्यान्वित एव शक्तिरिति केचित् । चैत्रः कीदृशः ? चैत्रस्सुन्दरः इत्यादौ कार्यविशेषाभावेऽपि चैत्रादिपदानां व्यक्तिविशेषबोधजनकत्वदर्शनात्, कायावतेऽपि शक्तिरस्त्येवेति लोकव्यवहारनिर्वहणचतुरा नैय्यायिकाः ।।

६) **वाक्यस्य शेषात्**— वाक्यशेषादित्यर्थ : । यथा **गामानय** इत्यादौ गोपदस्य वृषभसाधारणस्य गोपदस्य, अद्य भूकर्षणं कर्तव्यम् इति समनन्तरमेव वाक्ये प्रयुक्ते

आलोक-व्याख्या

तथैव गवादिपदान्यपि तदुच्चारयितुरीश्वरस्येच्छया तत्तदर्थबोधनसमर्थानि भवन्तीति 'अस्मात्पदादयमर्थो बोद्धव्य इती'श्वरेच्छैव शक्तिपदार्थः । नातिरिक्ता शक्तिः ।।

ननु नदीवृद्ध्यादिपदेषु पाणिनीच्छाया एव दर्शनादीश्वरेच्छाया अदर्शनात्कथं तत्पदानां बोधकत्वं जातमिति चेत्, **'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।।'** इति दर्शनात् **'तेन विना तृणाग्रमपि न चलति'** इति न्यायात्, पाणिनिना संज्ञाकरणमपीश्वरेच्छाधीनमेवेति परम्परयेश्वरेच्छा तत्रापि वर्तत इति न दोषः। अत ईश्वरेच्छैव शक्तिः ।।

टिप्पणी

वृषभे शक्तिग्रहः लोके । वेदे तु **यवमयश्चरुर्भवति** इति वाक्ये यवः क इति संशये, तद्वाक्यशेषभूतात् **अथान्या ओषधयो म्लायन्ते, अथैते मोदमानास्तिष्ठन्ते** इति वाक्यात् दीर्घशूकविशिष्टे धान्ये शक्तिग्रहः । शूकपदस्य तु **शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे** इत्यादिकोशात् धान्यानामग्रे वर्तमानः कण्टकतुल्योऽवयवः ।।

७) **विवृतिः**— विवरणम् । तदा तदा व्याख्याकारादिभिः लक्षणादिमुखेन क्रियमाणं विवरणं प्रसिद्धम् । आप्तवाक्यं तु पर्यायपदादिशब्दः । विवृतिस्तु - प्रश्नोपप्रश्नादिपूर्वकं शब्दार्थनिश्चयहेतुः ।।

८) **सान्निध्यात्सिद्धपदस्य** = प्रसिद्धपदसान्निध्यमित्यर्थ : । बहुपदघटिते वाक्ये एकपदं विनेतरेषां सर्वेषां शक्तिग्रहे सति तदेकपदस्येतरपदसमभिव्याहारवशाच्छक्तिग्रहो भवति । यथा **शृणु, सहकारतरौ मधुरं पिको रौति** इति सन्निहितपुरुषोक्ते वाक्ये पिकपदव्यतिरिक्तानामर्थे ज्ञाते, तद्वशात् **पिक**पदस्य पक्षिविशेषे शक्तिग्रहो भवति । एवमौचित्यवशात्सर्वं ज्ञेयम् ।।

टिप्पणी

कर्त्राख्याते बोधः । कर्माख्याते तु 'चैत्रेण तण्डुलः पच्यते' इत्यादौ 'चैत्रसमवेत-कृतिजन्यविक क्लित्याश्रयः तण्डुलः' इति, प्रथमान्तमुख्यविशेष्यक एव शाब्दबोधः । 'चैत्रेण सुप्यते' इत्यादिभावाख्यातस्थले तु 'चैत्रकर्तृकः=चैत्रसमवेतकृतिजन्यः स्वापः' इति धात्वर्थमुख्यविशेष्यकबोधः । भावाख्यातातिरिक्तस्थले तु प्रथमान्तमुख्यविशेष्यक एव शाब्दबोध इति संक्षेपः । अधिकं व्युत्पत्तिवादादौ ॥ (प्रकृते तर्कसंग्रहे लक्षणवाक्यानां शाब्दबोधप्रक्रियायाः अध्ययेननेतरत्सर्वं सुगमम् ।।)

अथ समासस्थले शाब्दबोधप्रक्रिया संग्रहेण प्रदर्श्यते — विग्रहवाक्य-समस्तवाक्ययोस्समानविषयकत्वमुत्सर्गः । यथा 'नीलोत्पलम्' इति समस्तपदम् । 'नीलमुत्पलम्' इति व्यस्तप्रयोगः । 'नीलं च तत् उत्पलं च' इति कर्मधारयः। 'नीलाभिन्नम् उत्पल'मित्युभयत्रापि शाब्दबोधः । अत एव कर्मधारये न लक्षणा । एवं 'रामलक्ष्मणौ' इतीतरेतरद्वन्द्वेऽपि न लक्षणा । 'रामश्च लक्ष्मणश्चेति' विग्रहः । अत्रापि रामस्य लक्ष्मणस्य च बोधः । समासेऽपि तावानेव बोध **इति नवीनाः** ॥

इदमप्रौढमतीनाम् बालानामालोचनम्, न प्रौढमतीनाम् । 'समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्था' इति किलाह महर्षिः इत्येकाक्षरस्याव्ययार्थश्चतुर्विधो वर्तते लोकानुभव एव । तेषु समुच्चयान्वचययोर्न समासः, असमर्थत्वात् । इतरेतरयोगसमाहारयोरेव समासः इत्यादिकं सरलमतिभिः न ज्ञातुं शक्यम् । इतरेतरयोगो नाम परस्परसौहार्दरूपं मिलनम् । अतोऽर्थस्वारस्यसत्त्वात् सोऽपि समासस्यार्थः । 'यथेन्द्र-शत्रुः स्वरतोऽपराधात्' इति वर्ण्यमानायामपि संस्कृतौ सूक्ष्मभावतरङ्गाणां स्थानं स्पष्टं प्रदर्शनमावश्यकम्, येन शब्दश्रवणेनैवान्तरङ्गाशयः स्पष्टं ज्ञातुं शक्येत । अधिक-मन्यत्र । एवञ्चार्थभेदस्य सत्त्वात्, सोऽपि तत्र विवक्षित एव । ततश्चेतरेतरयोगद्वन्द्वेऽपि उत्तरपदे विलक्षणसंयोगविशिष्टे लक्षणा आवश्यकी । नो चेत्, समहारेऽपि लक्षणा न स्यात् ।।

बहुव्रीहिसमासेऽन्यपदार्थस्य प्राधान्यात् लक्षणाऽनिवार्या । 'पीतम् अम्बरं यस्य', पीताम्बरो हरिः । अत्र विग्रहवाक्ये अम्बरपदमेव प्रमथमान्तत्वात् विशेष्यम्।

आलोक-व्याख्या

एवैतादृशशङ्का युज्यते । एतन्मते हि शक्तिः स्वरूपयोग्यतैव । परन्तु शब्दे द्विविधा सा । एका शब्दसाक्षात्कारहेतुभूता, अन्या तु अर्थबोधहेतुभूता । आद्या तु श्रोत्रेण शब्दग्रहणेनैव कृतकृत्या । अनस्मिन् विषये तु उक्तमत्रेश्वरेच्छायास्तस्यास्तथा व्यवस्थितत्वादिति नानुपपत्तिः ।।

ननु गवादिपदसमूह एव चेत् वाक्यम्, तर्हि **'गौरश्वः पुरुषो हस्ती'** इत्यादिपदसमूहादपि कश्चन बोधः स्यात् । भवत्येव तत्र गवाद्यर्थानां बोध इति चेत्, नायं बोधः । किन्त्वर्थस्य स्मरणमात्रम् । शाब्दबोधो नाम शब्दजन्यः परस्परान्वितार्थविषयको यथार्थानुभवः । चतुर्विधयथार्थानुभवेषु हि 'शाब्दः' इति विभागः प्रादर्शि । 'गौरश्वः' इत्यादिवाक्याच्छाब्दबोधो न

टिप्पणी

यच्छब्दार्थः हरिः । 'यस्य हरेः अम्बरं पीतरूपवत्, सः हरिः पीताम्बर' इति खलु वाक्यस्यार्थो वक्तव्यः । एवञ्च 'यत् सम्बन्धी अम्बरं पीतरूपवदभिन्नम्' इति विग्रहवाक्यात् बोधः । समासवाक्यात्तु 'पीतरूपविशिष्टाभिन्नाम्बरसम्बन्धी हरिरि'ति बोधः । एवं समासघटकपदार्थापेक्षया बाह्यस्यार्थस्य प्राधान्यात् इतरसमासापेक्षया बहुव्रीहिर्जघन्य इत्युच्यते । गत्यन्तराभाव एव स आश्रयणीय इति भावः ।।

'माता च पिता च पितरौ' इत्यादिविरूपैकशेषसमासे पितृपदस्य मातापित्रोः लक्षणेति स्पष्टमेव । इदं विरूपैकशेषसमासे । 'घटश्च घटश्च घटौ', 'घटश्च घटश्च घटश्च घटाः' इत्यादि सरूपैकशेषे तु विभक्त्यैव घटद्वयस्य, बहूनां घटानां च बोधात् न लक्षणा आवश्यकी ।।

'उपकुम्भम्', 'अर्धपिप्पली' त्यादौ उत्तरपदे कुम्भपदे, पिप्पलीपदे च कुम्भसमीपे, पिप्पल्यर्धे च लक्षणा, पूर्वपदं तात्पर्यग्राहकमात्रम् । एवं च समासे कुत्रापि न शक्तिः। अत एव न लक्षणापि, शक्यसम्बन्धस्याभावात् । वाक्ये शक्तिर्नास्ति, लक्षणा तु वर्तत इति अर्थवादवाक्यानां प्राशस्त्ये लक्षणायाः वक्तव्यत्वादिति **मीमांसकाः** । उभयमप्यस्तीति **वैय्याकरणा** इत्याद्यन्यत्र विस्तरः ।।

आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः ।
पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा । अर्थाबाधो योग्यता ।

आलोक-व्याख्या

भवितुमर्हति, किन्तु विशकलितपदार्थस्मृतिरेव । एवम् **'अग्निना सिञ्चति'** इति वाक्ये श्रुतेऽपि शाब्दबोधो न जायते, बाधितार्थकत्वात् । एवं **प्रातः घटपदमुक्त्वा सायम् 'आनय'** इति पदप्रयोगेऽपि शाब्दबोधो न भवति, पदानामत्यन्तं व्यवधानात् । एवं कोशादावपि पदानामर्थोपस्थितिमात्रं भवति। एषु स्थलेषु वाक्ये श्रुतेऽपि शाब्दबोधः कुतो न जायते? इति शङ्कायाम्, तेषु स्थलेषु शाब्दबोधानुत्पत्तेः कारणान्याह - **आकाङ्क्षेत्यादिना** । एवञ्चोक्त-स्थलेषु पदज्ञाने सत्यपि, सत्यपि च शक्तिज्ञाने आकाङ्क्षाद्यन्यतमकारणाभावान्न शाब्दबोधः । सकलकारणसन्निधाने सत्येव कार्योदयसंभवात् । 'गौरश्वः पुरुषो हस्ती' इत्यत्र तेषां पदानां परस्परमाकाङ्क्षाया अभावान्न शाब्दबोधः। यथा 'भूतले घटः' इत्युक्ते घटभूतलयोराधाराधेयभावात् आधारस्याधेयाकाङ्क्षा, आधेयस्याधाराकाङ्क्षा च वर्तते, तथा न हि गोपदार्थस्याश्वपदार्थस्य च परस्परमाकाङ्क्षा काचिद्वर्तते । अत आकाङ्क्षाभावान्न शाब्दबोधः। अत एव कोशान्न शाब्दबोधः, परस्परमाकाङ्क्षाभावात् ।।

आकाङ्क्षायाः स्वरूपमाह - **पदस्येत्यादि** । पदस्य - कस्यचित्पदस्य पदान्तरम् - अन्यत् समीपस्थं पदम्, तद्व्यतिरेकस्तदप्रयोगः । तत्प्रयुक्तम्-तन्निबन्धनम् — तत्पदे सति बोधः, तदभावे च न बोध इत्येवंरूपम्, अन्वयाननुभावकत्वम् - परस्परान्वयविशिष्टविषयकशाब्दबोधाजनकत्वं यदा भवति, तदा तयोः पदयोराकाङ्क्षा । यथा क्रियापदे श्रुते, कर्त्राकाङ्क्षा, कर्तृवाचकपदे प्रयुक्ते, क्रियाकाङ्क्षा च भवति । तद्वाचकपदाभावे च शाब्दबोधो न भवति । एवं सकर्मकधातुश्रवणे कर्माकाङ्क्षा, विशेष्यविशेषणवाचकपदादीनां परस्परमाकाङ्क्षादि च ज्ञेयम् ।।

योग्यता - अर्थाबाधः । प्रयुक्तशब्दश्रवणेनोपस्थितानामर्थानां

पदानामविलम्बेनोच्चारणं सन्निधिः ।

आकाङ्क्षादिरहितं वाक्यं न प्रमाणम् । यथा गौरश्वः पुरुषो हस्ती इति वाक्यं न प्रमाणम्, आकाङ्क्षाविरहात् ।

अग्निना सिञ्चतीति वाक्यं न प्रमाणं योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात् ।

आलोक-व्याख्या

परस्परबाधाभावः। परस्परबाधे सति बोधो न जायते । अत एव 'वह्निना सिञ्चति' इति वाक्ये श्रुते वह्नेः सेचनसाधनत्वं प्रतीयते । तच्च बाधितम् । जलं हि सेचनसाधनम् । अतः सेचनस्य वह्निकरणकत्वस्य च बाधात् योग्यताया अभावात्तेन वाक्येन शाब्दबोधो न भवति ।।

सन्निधिः - पदानामविलम्बेनोच्चारणमावश्यकम् । तदभावादेव, प्रातः 'गाम्' इत्युच्चार्य, सायम् 'आनय' इत्युक्ते तयोरन्वयबोधो न भवति। तयोः पदयोस्सान्निध्याभावात् ।।

एवं वक्तुरिच्छारूपं **तात्पर्यज्ञानमपि** शाब्दबोधे कारणम् । **'सैन्धवमानय'** इति वाक्ये श्रुते, सैन्धवपदस्य अश्वः, लवणं द्वयमप्यर्थः। केनाभिप्रायेणायं शब्दःप्रयुक्तः? इति जिज्ञासायाम्, प्रकरणादिवशाद्वक्तुरिच्छां ज्ञात्वा तदनुगुणमर्थं निर्धारयति । भोजनप्रकरणं चेत् सैन्धवपदस्य लवणमर्थः । प्रयाणप्रकरणं चेत् तत्पदस्याश्वोऽर्थ इति । इदं च तात्पर्यज्ञानं नानार्थकपदस्थल एव कारणम्, न तु सर्वत्र । 'घटमानय' इत्यादौ हि घटपदस्यार्थान्तराभावादिति केचिन्मन्यन्ते । परन्तु पदानां शक्तिर्हि घटत्वादिरूपसामान्यधर्मावच्छिन्ने घटसामान्ये । न तु एकस्मिन् घटे, घटान्तरविषयकशाब्दबोधानुत्पत्तिप्रसङ्गात् । एवं घटसामान्ये शक्त्योपस्थापिते - घटविशेषनिश्चयस्तु वक्तुरिच्छानुरोधेनैव । अतस्सर्वत्रैव शाब्दबोधे तात्पर्यज्ञानं

वाक्यं द्विविधं -- वैदिकं लौकिकं चेति। वैदिकमीश्वरोक्तत्वात् सर्वमपि प्रमाणम्। लौकिकं त्वाप्तवाक्यं प्रमाणम्। अन्यदप्रमाणम्।

आलोक-व्याख्या

कारणमित्येव युक्तम्। न हि 'घटमानय' इत्युक्ते घटव्यक्तिनिश्चयः तत्तात्पर्यज्ञानमन्तरा सम्भवी ।।

ननु **पदानां शक्तिः** किं **जातौ ?** उत **व्यक्तौ** ? यदि व्यक्तौ शक्तिः, तर्हि शक्तिग्रहणवेलायां गोपदस्य एकस्यामेव गवि शक्तिग्रहणात्, अन्यगोविषयकबोधो न स्यात्। अतो जातावेव शक्तिः। 'गामानय' इत्युक्ते गोः आनयनान्वयासंभवादन्वयानुपपत्त्या व्यक्तिबोध इति **मीमांसकाः**। परन्तु 'गौरस्ति' इत्यत्र तथानुपपत्तेरभावात् व्यक्तिबोधो न स्यात्। गोपदश्रवणसमनन्तरमेव गोत्वविशिष्टबोधानुभवात्, **जातौ तद्व्यञ्जकाकृतौ, जात्याश्रयव्यक्तौ चेति त्रिष्वपि शक्तिरिति तार्किकाः ।।**

ननु तर्हि 'गंगायां घोषः' इति वाक्यात् कथं बोधः ? गंगापदस्य हि नदी अर्थः। घोषः= आभीरपल्ली। सा कथं गङ्गायां स्यात् ? एवं 'राजवीथ्यां गृहं वर्तते' इत्यत्र वीथीपदस्य सञ्चारमार्गोऽर्थः। संचारमार्गे गृहं कथं स्यात् ? इति चेत्, न। एतादृशस्थले लक्षणया बोधात्। लक्षणया गङ्गापदस्य गङ्गातीरमर्थः, वीथीपदस्य वीथीपार्श्वभागोऽर्थः। **लक्षणा नाम शक्यार्थसंबन्धः।** गङ्गापदस्य शक्यार्थः गङ्गानदी, तत्सम्बन्धस्तीरे वर्तते। एवं वीथीपदस्य वीथीमार्गोऽर्थः। तत्संबन्धः तत्पार्श्वभागस्य वर्तत इति बोधो भवति। ततश्च शक्तिलक्षणान्यतरसंबन्धः शाब्दबोधहेतुः। शक्तिः, लक्षणा च वृत्तिपदेनोतच्येते ।।

वाक्यं विभजते - **वाक्यमिति**। **ईश्वरोच्चरितत्वादिति**। तात्पर्यज्ञानस्य शाब्दबोधं प्रति कारणतया, तात्पर्यस्य च वक्तुरिच्छारूपत्वात्,

वाक्यार्थज्ञानं शाब्दज्ञानम् । तत्करणं शब्दः ।

इति तर्कसंग्रहे शब्दपरिच्छेदः समाप्तः ॥

आलोक-व्याख्या

वेदवाक्यजन्यबोधे तद्वक्त्रभावे शाब्दबोधो न स्यात् । अतो वेद ईश्वरेणैवोपदिष्टः । तर्हि 'वेदोऽपौरुषेयः' इति प्रसिद्धिः कथमिति चेत्, मानवबुद्धिमूलकत्वाभावाद्वेदस्य, लोके शब्दानां सर्वेषां मानवबुद्धिमूलकत्वात्, वेदस्य मनुष्यकृतत्वाभावात् तथा व्यवहारः । अत एव **'श्रुतिस्स्मृतिर्ममैवाज्ञा'** इत्यादीश्वरवचनमपि संगच्छते । निगमयति - **वाक्येत्यादि** ॥

ननु ईश्वरेच्छामूलकपाणिन्यादिसंकेततः प्रकृतिप्रत्ययानां शक्तिग्रहो भवेत् । तयोरन्वयः केन संकेत्यते ? 'घटमानय' इत्युक्ते घटपदस्य घटोऽर्थः । द्वितीयायाः कर्मत्वमर्थः । कर्मत्वस्य घटवृत्तित्वं कथं ग्राह्यम् ? प्रकृतिप्रत्ययातिरिक्तस्तयोर्मध्ये न हि कश्चन शब्दः श्रूयते । प्रत्यक्षे तु घटभूतलयोः, रूपघटयोर्वा आधाराधेयभावश्चक्षुषैव दृश्यते । आधेयता किं संबन्धावच्छिन्नेति निर्णयस्तु शास्त्रात् । न ह्येवं शब्दानुमानस्थले संबन्धः साक्षाद्वर्तते । न हि व्याप्तिज्ञानमन्तरा धूमदर्शनमात्रात् वह्न्यनुमितिर्भवेत् । न वा शक्तिज्ञानमन्तरा पदात् पदार्थबोधो भवेत्, पदजन्यपदार्थोपस्थितेश्शाब्दबोधं प्रति कारणत्वात् । अतः प्रकृतिप्रत्ययार्थयोस्संबन्धः केन बोध्यते, तद्वाचकशब्दादर्शनादिति चेत्; न , तत्तत्समभिव्याहारवशादेव संबन्धो बोध्यते, न तु शक्त्या । अतश्च घटपदशक्त्या घटरूपार्थो बोध्यते । द्वितीयया च कर्मत्वं बोध्यते । तयोराधाराधेयभावस्तु, घटपदोत्तरम् अम्प्रत्ययश्रवणात्, परस्पराकांक्षायोग्यतादिवशात् भासते । एवं कर्मत्वस्यानयनस्य च संबन्धो निरूपकत्वरूपस्तादृशादौचित्यादेव भासते । एवं शाब्दबोधस्यौचित्यमूलकत्वादेव कदाचिदन्योद्देशेन प्रयुक्तात् शब्दात् समीचीनशाब्दबोधाजननेनार्थभ्रान्त्या वादविवादा अपि दृश्यन्ते । अनुमितिस्थले

आलोक-व्याख्या

संबन्धो यथाविनाभावः, न तथास्ति तादृशः शब्दार्थयोरविनाभावः, कस्याप्यननुभवात् । एवञ्च प्रथमं प्रकृतिप्रत्ययाद्यैरर्थोपस्थितिः तत्तच्छक्त्या । अनन्तरमाकांक्षाद्यौचित्यवशात् संबन्धग्रहणम् । **अयमेवाभिहितान्वयवादः,** पदैरभिहितानामर्थानाम् अनन्तरमन्वयभानात् । **तथा च प्रकारतया विशेष्यतया वार्थवोधं** प्रत्येव पदजन्यपदार्थोपस्थितिः कारणम्, न त्वन्वयोपस्थितिं प्रत्यपि। सर्वेषामनुभवोऽप्येवमेवेति **सिद्धान्तिनः** ।।

प्राभाकरास्तु -- अन्वयांशेऽपि पदानामस्त्येव शक्तिग्रहः । अतश्च घटपदस्य कर्मत्वान्वितघट एव शक्तिः । अम्प्रत्ययस्यापि घटान्वितकर्मत्व एव शक्तिः । एवं कर्मत्वस्यानयनान्वयस्यापि भानात्, आनयनान्विते कर्मत्व एव अम्प्रत्ययस्य शक्तिः । एवमानयनपदस्यापि कर्मत्वान्वित एवानयने शक्तिरिति बहुधा वर्णयन्तः क्लिश्यन्ति स्वयम्, क्लेशयन्ति चेतरान् । परस्परमन्वितानामेवार्थानां पदैर्बोधनात् **अयमेवान्विताभिधानवाद** इत्युच्यते। एवं सति हि कस्य पदस्य केन साकं समभिव्याहार इत्यनिमयात् कस्यापि पदस्य शक्तिग्रह एव न स्यात् । 'घटमानय' 'पटमानय' 'गामानय' इत्यादिसमभिव्याहारा ह्यनन्ताः । एवं घटमानय, घटं नय, घटं पश्य इत्येवंरूपाः क्रियापदसमभिव्याहारा अप्यनन्ताः । घटपदस्य आनयनान्वितघटे, नयनान्वितघटे, दर्शनान्वितघटे च शक्तिः । एवम् अम्प्रत्ययस्य घटान्वितकर्मत्वे, पटान्वितकर्मत्वे, गवान्वितकर्मत्वे च शक्तिरिति अतिगौरवम् । पदार्थानां पुनःपुनः भानात्पौनरुक्त्यमित्याद्यनन्ता दोषाः । अत औचित्यमूलकमेवान्वय-भानमिति युक्तः पन्थाः।।

इति शब्दखण्डः

एवम् - 'यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात्' इति विभक्तस्य यथार्थानुभवस्य विचारस्समाप्तः । अथ प्रप्रथमम् 'स च

एवं यथार्थानुभवो निरूपितः । अयथार्थानुभवस्त्रिविधः -- संशयविपर्ययतर्कभेदात् । एकस्मिन्धर्मिणि विरुद्धनानाधर्म-वैशिष्ट्यज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वा इति ।

आलोक-व्याख्या

द्विविधो यथार्थः, अयथार्थश्चेति विभक्तयोर्मध्ये, अथायथार्थानुभवनिरूपणोपोद्घाततया तस्य संगत्यर्थमाह - **एवमित्यादि ।।**

प्रथमोद्दिष्टं संशयं निरूपयति - **एकस्मिन्नित्यादि** । विरुद्धाश्च ते नानाधर्माश्च विरुद्धनानाधर्माः । ते प्रकारा यत्र, तत् विरुद्धनानाधर्मप्रकारकम् । 'एकस्मिन्' इति धर्मिविशेषणम् । 'धर्मिणि' इत्यत्र सप्तम्या विशेष्यत्वमर्थः । प्रकृत्यर्थस्याधेयतासंबन्धेनान्वयः । विरुद्धत्वं परस्परासमानाधिकरणत्वम् । ततश्च विरुद्धनानाधर्मप्रकारकं नाम परस्परासमानाधिकरणनानाधर्मनिष्ठप्रकारतानिरूपकम् इत्यर्थः । ततश्च— **एकधर्मिनिष्ठविशेष्यता-निरूपकम्, परस्परविरुद्धनानाधर्मनिष्ठ-प्रकारतानिरूपकं च ज्ञानं संशय** इत्यर्थः।। एवञ्च **एकधर्मावच्छिन्न-विशेष्यतानिरूपकत्वे सति, परस्परविरुद्धनानाधर्मावच्छिन्न-प्रकारताशालित्वे सति ज्ञानत्वं संशयलक्षणम्** । ज्ञानत्वमात्रोक्तौ विपर्यये प्रमायाञ्चातिव्याप्तिः, तयोरपि ज्ञानत्वात् । अतो नानाधर्मप्रकारकत्वं विशेषणम्। शुक्तौ 'इदं रजतम्' इति विपर्यये रजतत्वमात्रप्रकारकत्वात् नानाधर्मप्रकारकत्वाभावात् नातिव्याप्तिः। एवमपि 'भूतलं घटवत् पटवच्च' इति समुच्चयात्मकज्ञाने, 'भूतलं घटपटवत्' इति समूहालम्बनज्ञाने च एकस्मिन् धर्मिणि नानाधर्मप्रकारकत्वादतिव्याप्तिरित्यतः विरुद्धेति । समुच्चये समूहालम्बने च विरोधस्याभानान्नातिव्याप्तिः ।।

ननु संशयस्यायथार्थानुभवावान्तरविभागरूपत्वात्, तदभाववति तत्प्रकारकत्वरूपसामान्यलक्षणस्य जागरूकत्वे प्रमात्मकसमुच्चये समूहालम्बने

मिथ्याज्ञानं विपर्ययः । यथा शुक्ताविदं रजतम् इति ।

व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात् इति ।

आलोक-व्याख्या

वा कथमतिव्याप्तिप्रसक्तिरिति चेत्, न । शुक्तौ 'इदमेकं रजतम्' इति भ्रमे एकत्वरजतत्वरूपनानाधर्मप्रकारकत्वस्य सत्त्वात् विपर्ययेऽतिव्याप्तिः । अतो विरुद्धत्वविशेषणम् । एकत्वरजतत्वयोर्विरोधाभावाद्व्यावृत्तिः । एवमपि अतिव्याप्तिर्दुर्वारैव, रङ्गे रजतत्वावगाहित्वेनायथार्थत्वापरित्यागात् 'रङ्गरजते दृष्ट्वा 'इमे रजतरङ्गे' इति भ्रमे विरुद्धनानाधर्मप्रकारकत्वसत्त्वात् अतिव्याप्तिवाराणाय 'एकस्मिन् धर्मिणि' इति । तत्र 'इमे' इति नानाधर्मिकत्वान्नातिव्याप्तिः ।।

मिथ्येत्यादि । एतल्लक्षणं च पूर्वमेवोक्तम् - 'तदभाववति तत्प्रकारकानुभव इति । ननु तत् अप्रमाया लक्षणम् । अप्रमैव मिथ्याज्ञानमुच्यते। स एव चायथार्थानुभवः । अयं च त्रिविध उक्तः - संशयविपर्ययतर्कभेदादिति। तदभाववति तत्प्रकारकत्वं त्रयाणामपि सामान्यं लक्षणम् । एवं चेत् विपर्ययस्य लक्षणं संशये तर्के चातिव्याप्तं किलेति चेत्, सत्यम् । **संशयतर्कभिन्नत्वे सति तदभाववति तत्प्रकारकत्वं विपर्ययस्य लक्षणमिति** विशेषलक्षणं वक्तव्यमिति न कश्चन दोषः । ननु तर्हि विपर्ययो निश्चयरूपः । निश्चयत्वं च संशयान्यज्ञानत्वम् । एवञ्चान्योन्याश्रयः - संशयान्यज्ञानत्वं विपर्ययत्वम्, विपर्ययान्यज्ञानत्वं संशयत्वमितीति चेत्, प्रमाया अपि निश्चयरूपत्वात् विपर्ययत्वनिश्चयत्वयोः पर्यायत्वाभावान्न दोषः अथवा निश्चिनोमीति अनुभवसिद्धजातिमत्त्वमेव निश्चयत्वम् । अथवा 'तदभाववद्विशेष्यकत्वे सति परस्परविरुद्धधर्माप्रकारकानुभवो विपर्यय इति नान्योन्याश्रयः ।।

तर्कस्य लक्षणम् - **व्याप्येत्यादि । व्याप्यस्यारोपेण व्यापक-**

आलोक-व्याख्या

स्यारोपणं तर्कः। यथा 'पर्वतो वह्निमान्, धूमात्' इति प्रयुक्ते, कश्चित् पृच्छति 'धूमस्य सत्त्वमात्रेण, वह्निसत्त्वं कथं निश्चीयते' इति । एवं **प्रश्नस्याप्रयोजकशङ्केति संज्ञा** । 'हेतुरस्तु साध्यं मास्तु' इति शङ्काप्रयोजकशङ्का । हेतोः सत्त्वं साध्यस्य सत्त्वे न प्रयोजकम्, यदि साध्यं विनापि हेतुः स्यात्पक्षे इति शङ्काया आशयः । तस्योत्तरं वक्ति - **'यदि साध्यं न स्यात्, तर्हि हेतुरपि न स्यात्'** इति । प्रकृते 'यदि वह्निर्न स्यात्, तर्हि धूमोऽपि न स्यात्' इति । जगति यत्र कुत्रापि वह्न्यभावेऽपि धूमो दृष्टः किम् ? अतो वह्न्यभावे धूमोऽपि न स्यादेव । 'धूमो यतो दृश्यते, तर्हि वह्निरपि स्यादेव, न तु वह्न्यभावः' इति प्रदर्शनेन प्रकृतहेतोः अप्रयोजकत्वशङ्का= साध्यासाधकत्वशङ्का निवर्तते । अतोऽप्रयोजकशङ्कानिवारकस्तर्क इत्युच्यते । पर्वते वह्नेर्धूमस्य च सत्त्वात् 'यदि वह्निर्न स्यात्' इति कल्पयित्वा वक्तव्यम् । एतादृशकल्पनात्मकं ज्ञानम् **'आरोपः'** इत्युच्यते । एवं 'धूमोऽपि न स्यात्' इत्यारोप एव । धूमस्य सत्त्वेन तथा वक्तुमशक्यात्। एतदारोपसूचनार्थमेव 'स्यात्' इत्युच्यते। अत्र वह्न्यभावो व्याप्यः, धूमाभावो व्यापकः। **आक्षेप्ता पृच्छति** - 'धूमोऽस्तु' इति । अतस्तस्य पर्वते धूमाभावो नेष्टः । **प्रतिवक्ता वदति**, 'यदि पर्वते धूम एव स्यात्, न तु धूमाभावः, तर्हि तत्र वह्निरेव स्यात्, न तु वह्न्यभावः। अत्र वह्न्यभाव एवाक्षेप्तुरिष्टः । तत उच्यते 'यदि वह्न्यभावः स्यात्, तर्हि धूमाभाव एव स्यात्, न तु धूमः' इति । अतो यदि व्याप्यो वह्न्यभावः स्यात्, तर्हि व्यापको धूमाभाव एव स्यात् । 'यत्र वह्न्यभावस्तत्र धूमाभावः' इति व्याप्तेः सत्त्वात् । अतश्च यदि धूमः स्यात्, तर्हि वह्निरप्यावश्यक इति प्रदर्शनमेव तर्कस्य कृत्यम् । **आरोपो नाम, वस्तुतस्तथाऽभावेऽपि तथात्वकल्पनम्** । बाधकालिकमिच्छाजन्यमिदं ज्ञानम् **'आहार्यम्'**

स्मृतिरपि द्विविधा । यथार्थाऽयथार्था चेति । प्रमाजन्या यथार्था । अप्रमाजन्या अयथार्था ।

आलोक-व्याख्या

'उपनीतभानम्' इत्यप्युच्यते । अत एव वह्न्यभावस्य बाधज्ञाने सत्यपि, इच्छया बलात्कारेणोत्पाद्यते एतादृशं ज्ञानम् । एतादृशस्थले तदभाववत्तानिश्चये सत्यपि तद्वत्ताबुद्धिरुत्पद्यते । अत एव प्रतिबध्यप्रतिबन्धकभावकोटावुभयत्रानाहार्यत्वविशेषणम्। आहार्यज्ञानं तु न कुत्रापि प्रतिबन्धकम्, प्रतिबध्यं वा । प्रतिबन्धककोटौ 'अनाहार्य'पदं स्पष्टम् । प्रतिबध्यकोटौ तु **'लौकिकसन्निकर्षजन्य'**पदमेतदर्थकम् । बलात्कारेणाह्रियमाणत्वात्, तत् आहार्यज्ञानं न लौकिकसन्निकर्षजन्यम् । अधिकमन्यत्र ।।

एवं 'ज्ञानं द्विविधम्— स्मृतिः, अनुभवश्च' इति विभक्तयोः मध्येऽनुभवस्यैव स्मृतिं प्रति कारणत्वात् प्रथममनुभवविचारं परिसमाप्य, स्मृतौ वक्तव्यं वक्ति - **स्मृतिरपीत्यादि** । एवञ्च स्मृतेः प्रमात्वमप्रमात्वं वा तद्धेतुभूतज्ञानाधीनमिति, स्मृतावेतद्विभागो न मुख्यः। स्मृतौ प्रमात्वस्याङ्गीकारे, तद्धेतुभूतस्य संस्कारस्य प्रमाकरणत्वप्राप्त्या प्रमाणत्वं स्यात् । न चास्तु का हानिरिति वाच्यम्, तर्हि अयथार्थस्मृतेरपि प्रमाणजन्यत्वात्, प्रमात्वापत्तिः। अस्तु तर्हि संस्कारेऽपि विभाग इति वाच्यम्, करणे तथा विभागासंभवात् । न हीन्द्रियादौ तथा विभागो वक्तुं शक्यते । इन्द्रियं हि प्रमाकरणम्, न तु अप्रमाकरणम्। तर्हि शुक्तौ 'इदं रजतम्' इति ज्ञानमिन्द्रियमन्तरापि स्यादिति चेत्, 'इदम्' इत्यंशस्येन्द्रियान्वयव्यतिरेकानुविधानात्, तावत्येवेन्द्रियव्यापारस्योपरमः । 'रजतम्' इत्यंशस्तु ज्ञानलक्षणारूपालौकिकसन्निकर्षवशाद्भवतीत्यादिकमन्यत्र द्रष्टव्यम् । आहत्यातीन्द्रिये संस्कारे द्वैविध्यस्याभावात्, तज्जन्यस्मृतावपि द्वैविध्यं तद्धेतुभूतानुभवाधीनम् इति, विभागप्रदर्शनं

आलोक-व्याख्या

स्वरूपकीर्तनमात्रम् ।।

इत्येवं बुद्धिर्निरूपिता । **प्रमात्वमप्रमात्वं वा किं स्वतोग्राह्यम्,** उत **परतः**? इति संशये प्रमात्वं स्वतः, अप्रमात्वं तु परत इति **पूर्वोत्तरमीमांसकौ** । उभयमपि स्वत इति **सांख्याः** । अप्रमात्वं स्वतः, प्रमात्वं तु परत इति **वौद्धाः** । उभयमपि परत इति **सिद्धान्तिनः** । तत्राप्रामाण्यमेव स्वत इत्यप्रामाणिकेभ्यो रोचेत । प्रामाण्यं स्वतश्चेदनन्तरम् 'ममोत्पन्नं ज्ञानं प्रमा, न वा'? इति संशयो न स्यात् । उभयोः स्वतस्त्वमनुभवविरुद्धम्, अप्रयोजकं च । अत उभयं परत इति सिद्धान्त एव शोभनः ।।

ज्ञानं कथं गृह्यते ? इत्यत्रैव विवादे शोभमाने, ज्ञानस्यावान्तरविभागे प्रमायां प्रमात्वं कथं स्वयं गृह्येत ? **ज्ञानं स्वप्रकाशम्** इति उभौ मीमांसकौ। **अनुव्यवसायगम्यमिति** सिद्धान्तिनः, मीमांसकैकदेशी मिश्रश्च । **नित्यानुमेयमिति** भट्टः । एवं सति प्रमात्वं स्वत इति शपथः कथम्? प्रथमं हि विषय एव गृह्यते, अनन्तरं तु ज्ञानम्, तदनन्तरं च प्रमात्वम् । न हि प्रमात्वं जातिः, येन सहैव गृह्यते । किन्तु तद्वति तत्प्रकारकत्वम् । तच्च प्रवृत्तिसार्थक्ये सति निश्चीयत इति सर्वेषामप्यनुभवः । **'ममोत्पन्नं ज्ञानम् प्रमा, सफलप्रवृत्तिजनकत्वात्'** इत्यनुमानेन खलु प्रामाण्यम् = प्रमात्वं गृह्यते । अतश्च विषयग्राहकसामग्री ज्ञानम्, ज्ञानग्राहकसामग्री अनुव्यवसायः, प्रामाण्यग्राहकसामग्री तु उक्तानुमानम् । एवञ्च विषयग्रहणसमये विषयिणोऽग्रहणवत्, विषयिग्रहणसमये तद्गतप्रामाण्यमपि न गृह्येतेत्येव युक्तम्।

टिप्पणी

प्रामाण्यवादः -- ज्ञानानां प्रामाण्यं स्वतः? उत परतः? इत्यत्र बहु विप्रतिपद्यन्ते विपश्चितः । ननु भोः! किमर्थमेवं क्लिश्यन्ति विपश्चित्तमाः?**यत् येन**

टिप्पणी

गृह्यते, तन्निष्ठा जातिरपि तेनैव गृह्यते इति प्रसिद्धो नियमः।ज्ञानं हि मनोजन्येनानुव्यवसायेन गृह्यते। ज्ञानत्ववत् प्रमात्वमपि गृह्येतेति कः क्लेश इति चेत्; ज्ञानत्वं ज्ञान-पदशक्यतावच्छेदकतयैव सिद्ध्येत् । प्रमात्वं तु न तथा वक्तुं शक्यम्। ममोत्पन्नं ज्ञानं प्रमा, न वा ? इति संशयस्तु सर्वेषां कदाचित् दृश्यते । प्रमात्वं यदि गृहीतम् ? तर्हि कथं संशयः? प्रमात्वं हि तद्वति तत्प्रकारत्वं, नाखण्डः कश्चित् धर्मः । तत्तु प्रथमं न गृह्येतैवेति युक्तो विचारः । तत्र -

(१) **प्रामाण्यं स्वतः, अप्रामाण्यं परत** इति वैदिकाः।

(२) **अप्रामाण्यं स्वतः, प्रामाण्यं तु परत** इति बौद्धाः।

(३) **उभयमपि परत** इति नैयायिकाः।

(४) **उभयमपि स्वत** इति सांख्याः।

वैदिकानां वादस्तु वेदप्रामाण्यसंरक्षणसंभ्रमादिति स्पष्टम् । अत एव विचारक्षेत्रे नागच्छति । **तर्काप्रतिष्ठानात्** (ब्र.सू.२-१-११) इति हि वैदिकाः। मानवास्तु बुद्धिजीविन इति प्रसिद्धम् । बौद्धास्तु विकल्पानामप्रामाण्यम्, स्वलक्षणज्ञानमेव प्रमाणमिति मन्वानाः तथात्वभिनिविष्टाः । इदं च लोकानुभवविरुद्धत्वादेवौदासीन्यमर्हति। सांख्यैस्तु अन्तःकरणवृत्तिरेवार्थरूपेण परिणमत इत्यङ्गीकारात्, ज्ञानं स्वांशे प्रमाणमेव सर्वेषाम् । भ्रमस्थलेऽपि '**मम ज्ञानमेव नोत्पन्नम्**' इत्यनुभवति सर्वोऽपि । अतः स्वांशे तत् स्वतः प्रमाणमेव सर्वेषाम्। अत इदमपि न विचारार्हम् ।एवं हि प्रमाभ्रमविभागोऽपि न स्यात् । एवं सति स्वपक्षपरपक्षविभागोऽपि न स्यात् । अतश्च परिशेषात् न्यायनय एव विचारार्हः।।

वस्तुतस्त्वयं विचारो वेदप्रामाण्यस्योदर्करूप इत्येवं मन्यन्ते । वेदा हि वैदिकानां परमं प्रमाणम् । न हि तत्प्रामाण्ये कश्चिद्वैदिकः कदापि संशेते । मातापितृसहस्रेभ्योऽपि हिततमा वेदा इति महात्मानोऽद्यापि घोषयन्त्येव । तदेतदसहमाना मध्यकालिकबौद्धा एव वेदप्रामाण्यापहारायैव ज्ञानानामप्रामाण्यमेवौत्सर्गिकमाशेरते । तदिदं '**स्वस्य नेत्रद्वयनाशेऽपि तवैकमेव वा नेत्रं नश्यतु**' इत्याशंसातुल्यमेव । न ह्येतावतापि वेदा न हि नष्टाः, न वा क्षीणाः। न हि चक्षुषो निमीलनेन ललाटन्तपो जगच्चक्षुः नश्यति । अतोऽवैदिकानामिमं श्रद्धामूलकं वादमुपेक्ष्य वस्तुतत्त्वं विचारयामः।।

टिप्पणी

को वा मतिमान् स्वस्योत्पन्नं ज्ञानमप्रमेति जानन् कुत्रचित्प्रवर्तेत। अतश्च ज्ञानानामप्रामाण्यं स्वतश्चेत् जगत्सर्वं निष्क्रियं संपद्येत । एवमेव प्रामाण्यस्य स्वतस्त्वे उत्तरकाले संशयविचारादिकमर्थहीनं स्यात् । दार्ढ्याय तथेति चेत्, स्वतः प्रामाण्यं सङ्केतमात्रं स्यात् । वस्तुतस्तु स्वतःप्रामाण्यवादो वेददृष्ट्यैव, वेदप्रामाण्यस्य प्रश्नानर्हत्वाद्वैदिकानाम् ।

ननु स्वतः प्रामाण्यस्योत्सर्गत्वाभावे मानवानां प्रतिदिनं दृश्यमाना असंख्याकाः प्रयत्नाः कथं स्युरिति चेत्, न, अप्रामाण्यज्ञानाभावमात्रादेव तदुपपत्तेः, तथैव दर्शनाच्च। व्यवहारे तु वक्तृपुरुषे आप्तत्वज्ञानादेव प्रवर्तन्ते सर्वेऽपीति सर्वानुभवसिद्धम् । अतश्च ममोत्पन्नं ज्ञानं प्रमा, सफलप्रवृत्तिजनकत्वात् इत्यनुमानादेव प्रामाण्यं गृह्यत इत्येव स्वरसम् । वेदस्य नित्यसर्वज्ञेश्वरोपदिष्टत्वादेव निर्दुष्टत्वम् । पुरुषबुद्धिमूलकत्वाभावादेवापौरुषेयत्वम् । अत एव भ्रमप्रमादविप्रलंभाद्यसंभवोऽपि सिद्धः ।।

एवञ्च **'व्यवहारे न्यायनयः'** इत्येव प्रामाणिकम्। एतदर्थमेवायमवतीर्णो विद्यास्थानेषु परिगणित इत्यादिकं न्यायमञ्जर्यां विस्तरेण द्रष्टव्यम् । अत एव **'व्यवहारे भट्टनयः'** इति सङ्केतमात्रं ज्ञेयम् । भट्टोऽपि हि तार्किकमीमांसकः, न तु शुद्धमीमांसकः।

ज्ञानानां प्रामाण्यं स्वतो वा परतो वेति विचार्यते । 'स्वतः' इत्यस्यार्थः कः? 'परतः' इत्यस्यार्थः कः?। अत्रापि विभागो वर्तते — प्रामाण्यं स्वत एवोत्पद्यते वा, परत एवोत्पद्यते वा? इति प्रामाण्योत्पत्तौ विकल्पः। प्रामाण्यज्ञप्तिः- प्रामाण्यनिश्चयः स्वतो वा? परतो वा? इति ज्ञप्तौ विकल्पः। घटादयः खलु बाह्याः पदार्थाः चक्षुरादिभिः गृह्यन्ते । अत्र ग्रहधातोः ज्ञानमर्थः । इदं च ज्ञानं व्यवसाय इत्युच्यते । एवम् उत्पन्नं ज्ञानम् अनन्तरं मनसा गृह्यते। अस्य 'अनुव्यवसायः'इत्यर्थः। व्यवसायमनुजातः- अनुव्यवसायः। तेन ज्ञाने गृह्यमाणे तद्गतं प्रामाण्यम् अप्रामाण्यं वा केन गृह्यते? स्वत एव गृह्यते इति केचन । यदि स्वतः, तर्हि अनन्तरं 'ममोत्पन्नं ज्ञानं प्रमा, न वा?' इति संशयो न स्यात् । संशयदर्शनात् प्रामाण्यं न स्वतः; किन्तु परत इति नैयायिकाः।

टिप्पणी

पदार्थाः खलु सामान्यविशेषस्वरूपाः। अतस्तेषां सामग्र्यामपि सामान्यसामग्र्यः, विशेषसामग्र्य इति भिद्यन्ते । यथा पटसामान्यसामग्री तन्तवः। पटविशेषस्य पीतपटस्य तु पीततन्तवः। एवं ज्ञानसामान्यसामग्री आत्ममनस्संयोगादिरूपा । ज्ञानविशेषस्य प्रत्यक्षादेः इन्द्रियादिरूपा सामग्री भिद्यते । एवं ज्ञानविशेषरूपः प्रमा, भ्रमश्च । अतश्च ज्ञानसामान्यसामग्र्यतिरिक्ता प्रमाभ्रमसामग्री का? इति विचार एव उत्पत्तिविचारः कथ्यते । उत्पन्नस्य प्रमात्मकज्ञानस्य प्रमात्वम्, प्रामाण्यं कथं गृह्यत इति विचारो ज्ञप्तिविचार इति कथ्यते ।

अत्र 'स्वतः' 'परतः' इत्यस्य कोऽर्थः? अत्रापि प्रामाण्यं ज्ञाने कथमुत्पद्यते? किं स्वतः? उत परतः? एवं प्रामाण्यस्योत्पत्तौ, प्रमाण्यस्य ग्रहणे च विकल्पः। एवं ज्ञाने प्रामाण्यं स्वत एवोत्पद्यते स्वत एव गृह्यते च इति स्वतस्त्ववादः। परत एवोत्पद्यते इति, परत एव = अनुमानादेव गृह्यत च इति परतस्त्ववादः। अतश्च प्रामाण्यं ज्ञानग्राहकसामग्रीजन्यमिति उत्पत्तौ स्वतस्त्वम्, ज्ञानग्राहकसामग्रीग्राह्यत्वमेव ज्ञप्तौ स्वतस्त्वम् ।

ननु! यदि ज्ञानग्राहकसामग्रीग्राह्यत्वमेव प्रामाण्ये स्वतस्त्वम्, प्राभाकरमतेऽपि अप्रामाण्यस्य परत एव ग्रहणाङ्गीकारात्, 'इदं ज्ञानम् अप्रमा, विफलप्रवृत्तिजनकत्वात्' इत्यप्रामाण्यग्राहकानुमितिसामग्र्या पक्षभूते ज्ञाने अप्रामाण्यस्यैव ग्रहणात् कथं प्रामाण्यं ज्ञानग्राहकसामग्रीग्राह्यम्? इति चेत्, 'तदप्रामाण्याग्राहक' इति ज्ञानग्राहकसामग्र्यां विशेषणेन व्यभिचाराभावात् । उक्तानुमितिसामग्र्या अनुमितौ प्रामाण्यग्रहणेऽपि पक्षभूते ज्ञानेऽप्रमाण्यग्रहणेन व्यावृत्तेः। तच्छब्दस्य यस्मिन् विषयिणि अनुमित्यात्मिके प्रामाण्यं स्वतो गृह्यते, सोऽर्थः। पक्षभूतज्ञान एव तत्सामग्र्या अप्रामाण्यं गृह्यते, अनुमितौ तु प्रामाण्यमेव गृह्यते ।

ननु नैयायिकमते '**इदं ज्ञानं प्रमा, सफलप्रवृत्तिजनकत्वात्**' इत्याकारानुमिति-सामग्र्या (पक्षविधया) ज्ञानग्राहकत्वात्, प्रामाण्यग्राहकत्वाच्च, ज्ञानग्राहकसामग्रीग्राह्यत्वरूपं स्वतस्त्वं वर्तत इति अपसिद्धान्त इति चेत्;न, ज्ञानग्राहकसामग्र्यां यावत्त्वस्य

टिप्पणी

विशेषणेनादोषात् । यावत्त्वं च साकल्यरूपम् । तादृशसकलसामग्रीग्राह्यत्वमर्थः। उक्तप्रामाण्यग्राहकसामग्र्या, पक्षविधया ज्ञानग्राहकत्वेऽपि, ज्ञानग्राहकसकलसामग्र्यन्तर्गतया 'अहं घटज्ञानवान्' इत्याद्यनुव्यवसायसायमग्र्या प्रामाण्याग्रहणान्न काप्यनुपपत्तिः। तथा च तदप्रामाण्याग्राहकज्ञानग्राहकयावत्सामग्रीग्राह्यत्वं स्वतस्त्वम्, तदभाव एव परस्त्वम् ।।

ज्ञानग्राहिका च सामग्री **प्राभाकरमते**, ज्ञानोत्पत्तिहेतुभूता स्वप्रकाशसामग्री। तयैव प्रामाण्यस्य ग्रहणात्, ज्ञानग्राहकसामग्रीग्राह्यत्वरूपं स्वतस्त्वं सङ्गच्छते ।।

भाट्टमते च, ज्ञानं न स्वप्रकाशम्, किन्तु ज्ञाततालिङ्गकानुमानगम्यम् '**अहं घटज्ञानवान्, घटविषयज्ञाततायाः**' इत्यनुमानमेव ज्ञाने प्रमाणम् । तथा तदप्रामाण्याग्राहिकया ज्ञानग्राहिकया च तादृशानुमितिसामग्र्या प्रामाण्यस्यापि ग्रहणात्, प्रामाण्यस्य स्वतस्त्वं सङ्गच्छते ।।

मिश्रमते च - नैयायिकमतवदेव ज्ञानं न स्वप्रकाशम्, न वा भाट्टवत् अनुमित्या ग्राह्यम्, हेतुज्ञानादीनामुपपादयितुमशक्यत्वात्। किन्तु, ज्ञानम् अनुव्यवसायेनैव गृह्यते । परं तु प्रामाण्यस्याप्यनुव्यवसायेनैव ग्रहणात्, ज्ञानग्राहकसामग्रीग्राह्यत्वरूपं स्वतस्त्वं सिद्धम् ।।

सिद्धान्ते - ज्ञानसामग्री अन्या, ज्ञानग्राहकसामग्री अन्या, प्रामाण्यग्राहकसामग्री चान्येति परतस्त्वसिद्धिः।।

यदा चक्षुस्संयोगादिना 'अयं घटः' इत्यादिज्ञानं जायते, तदा घटमात्रमेव तेन ज्ञानेन गृह्यते, न तु घटज्ञानम् । ज्ञानं ह्यान्तरम्, घटस्तु बाह्यः। उभयविषये व्यापारद्वयस्य युगपदसंभवात्, प्रथमं जायमानं ज्ञानं घटमात्रविषकम्, विषयस्य च बाह्यत्वात्, विषयाभिमुखत्वमेव ज्ञानस्य स्वरसम् । ज्ञानं त्वान्तरमनन्तरम् अनुव्यवसायेनैव गृह्यते । अनेनैव, युगपद्विषयस्य विषयिणश्चाग्रहणात्, ज्ञानानां स्वप्रकाशत्वमपि गतम्, किन्तु अनुव्यवसायेनैव ज्ञानं गृह्यते । विषयस्य घटादेः ग्रहणम्, विषयिणो ज्ञानस्य ग्रहणम् इति ग्रहणद्वयासंभवात् अननुभवाच्च, उभयोःप्रत्येकमेव ग्रहणम् । एवं

टिप्पणी

विषयविषयिणोर्युगपदग्रहणादेव, प्रामाण्यस्यापि प्रत्येकमेव ग्रहणम्। स्वतोग्रहणेऽनन्तरं प्रामाण्यसंशयतद्विचारादेरसंभवात् । अतः सफलप्रवृत्तिजनकत्वानुमाननैव प्रामाण्य-ग्रहणम् ।।

ननूत्पन्ने ज्ञाने प्रामाण्यनिश्चयाभावे, कथं प्रवृत्तिर्भवेत्? प्रवर्तन्ते च पुरुषास्सर्वे। अतः प्रामाण्यनिश्चयः प्रथममावश्यकः। अत एव प्रामाण्यं स्वत इत्येव वक्तव्यमिति चेत्, प्रवृत्तेः साफल्ये सत्येव प्रामाण्यनिश्चयसंभवात्, पूर्वं तदसंभवात् प्रामाण्यनिश्चयः प्रवृत्तिं प्रति न हेतुः। किन्तु अप्रामाण्यनिश्चयाभाव एव । प्रामाण्यसंशये सत्यपि 'पश्यामः' इति धैर्येणापि कदाचित् प्रवृत्तिर्भवति । परन्तु, साध्यस्य फलस्य, प्रवृत्त्या जायमानस्य क्लेशस्य च तुलनं कृत्वा विवेकिनः प्रवर्तन्ते । अत एवाविचार्यप्रवर्तनं बाल्यमित्युच्यते ।

गुरुलाघवमर्थानाम्, आरंभं कर्मणाम्, फलम् ।
दोषं वा यो न जानाति स वाल इति होच्यते'।। इति बाललक्षणमुच्यते वाल्मीकिना (वा.रा.अयो. ६३-७)। बहुवित्तव्यवसायसाध्ये महायज्ञादौ तु वेदप्रामाण्ये दृढनिश्चयादेव प्रवृत्तिः। अतो वेदानां स्वतः प्रामाण्यमनिवार्यमिति मीमांसकाः। परन्तु वेदस्य शब्दरूपत्वात्, शब्दप्रामाण्यस्य वक्तृपुरुषे आप्तत्वज्ञानाधीनत्वात्, वेद ईश्वरप्रोक्त इति नैय्यायिकाः। **'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्'** (न्या.सू.२-१-६९) इत्यक्षपादः। ईश्वरस्य कुत्रापि स्खलनं न स्यादित्यर्थः । तर्हि तत्पक्षं कथं खण्डयन्तीतर इति चेत्, **'न हि निन्दां निन्द्यं निन्दितुं प्रवृत्ता, किन्तु प्रकृतं प्रशंसितुम्'** इति न्यायादेवेदं स्वमतप्रशंसार्थमिति ग्राह्यम् । कथमन्यथा

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।।(म.भा.)

इति व्यासवचनं,

पुराणतर्कमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।(या.शि.) इति याज्ञवल्क्यवचनं

सर्वेषामनुकूलतया वेदनीयं सुखम् ।
प्रतिकूलतया वेदनीयं दुःखम् ।

आलोक-व्याख्या

युगपद्ग्रहणद्वयस्याननुभवात् । अनन्तरं संशयदर्शनाच्च प्रामाण्यमप्रामाण्यं च परत इत्येव स्वरसम् ।।

सर्वेषामित्यादि । अनुकूलत्वं स्वत इष्टत्वम् । **एतच्चान्येच्छानधीनेच्छाविषयत्वम्** । 'सुखं मे भूयात्' इति हि सर्वोऽपि अपेक्षते । अपेक्षैवेच्छा । सुखसाधनेष्वपि धनादाविच्छायास्सत्त्वात्, इच्छाविषयत्वमात्रोक्तौ धनादावतिव्याप्तिः । अतोऽन्येच्छा-नधीनेच्छाविषयत्वमुक्तम् । सुखसाधनत्वादेव धनादाविच्छा, न तु स्वतो धने । ततश्चान्येच्छाधीनेच्छाविषयत्वमेव, न त्वन्येच्छानधीनेच्छाविषयत्वम् । अतश्च 'सर्वेषाम्' इति पदमेतदर्थसूचकम्, न तु लक्षणे निवेश्यम्, प्रयोजनाभावात् । ननु लुब्धा धनं स्वतः पुरुषार्थं मन्यन्ते । अतस्तत्रातिव्याप्तिरिति चेत्, तत्रापि लुब्धानां धनदर्शनेन, स्मरणेन वान्तस्सुखं भवतीति, धनज्ञानमेव सुखम्, न तु धनमिति न दोषः । अत एवार्थस्यापि पुरुषार्थेषु गणना । ननु तर्हि सुखमनुकूलज्ञानमेवेति ज्ञानेऽन्तर्भाव्यमिति चेत्, न , सुखेऽपि 'वेदनीयम्' इति वेद्यत्वांशसत्त्वात्, ज्ञानसामान्यस्य पुरुषार्थत्वासंभवात्, सुखस्य तु पुरुषार्थत्वादतिरिक्तत्वस्यावश्यकत्वात् । न

टिप्पणी

वा? ।। अतश्च प्रामाण्यं ज्ञप्तौ सफलप्रवृत्तिजनकत्वेन हेतुना, अप्रामाण्यं ज्ञप्तौ च विफलप्रवृत्तिजनकत्वेन हेतुनेति परत एवोभयमपि । एवमेव प्रामाण्यस्योत्पत्तावपि स्वतस्त्वपरतस्त्वविचारो वर्तते । ज्ञानोत्पत्तिसामग्र्यैव प्रामाण्यमपि सहैवोत्पद्यते इति स्वतस्त्ववादिनः। किन्तु एवं सति अप्रमात्वस्यापि स्वतस्त्वप्रसङ्गात्, गुणकृता प्रमात्वोत्पत्तिः, दोषकृता चाप्रमात्वोत्पत्तिरित्येव सुवचम् । अस्य विस्तरो न्यायकुसुमाञ्जलौ द्वितीयस्तबके ।।

इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।
***विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः ।**

आलोक-व्याख्या

च मुमुक्षूणां सुखस्य त्याज्यत्वोक्तेः, तद्दृष्ट्यानुकूलत्वं मुक्तिसुखेऽतिव्याप्तमिति वाच्यम्, वैषयिकसुखस्यैव तेषां त्याज्यत्वोक्तेः, आत्मसुखस्य तेषामुपादेयत्वात् । सुखस्यैव तत्तद्व्यक्तिभेदेन भिन्नत्वात्, तत्तद्व्यक्तिदृष्ट्यैव सुखलक्षणस्य वक्तव्यत्वान्न दोषः । एवमेव 'प्रतिकूलतया वेदनीयं दुःखम्' इत्यत्रापि सर्वेषामिति वर्तते । इतरत् सुखवदेव ज्ञेयम् ।।

केचित्तु **सुखत्वदुःखत्वादिकं जातिविशेष** इति तत्तज्जातिमत्त्वमेव सुखादीनां लक्षणमिति लाघवाद्वदन्ति । परन्तु तदा **'वृद्धस्य तरुणी विषम्'** इति न्यायात्, एकस्य सुखमन्यस्य दुःखं न स्यात्, जातिसाङ्कर्यप्रसङ्गात् । न हि घटोऽन्यं प्रति अघटः स्यादित्यादिकमन्यत्र द्रष्टव्यम् ।।

इच्छा काम इति व्याख्यानम् । अपेक्षितत्वप्रकारकज्ञानजन्यः, आत्मनः प्रयत्नं प्रति हेतुरिच्छा । 'जानाति, इच्छति, यतते' इति हि क्रमः। **क्रोधो द्वेष** इति स्थूलदृष्ट्या । इच्छायाः प्रतिघाते कोपः, ततो द्वेष इति क्रमः । प्रतिकूलत्वज्ञानजन्य आत्मगुणो द्वेषः । एव प्रयत्नोऽपि आत्मगुणः, प्रवृत्तिहेतुः । लोके प्रवृत्तेः क्रियात्वात्, आत्मनि विभौ क्रियाया असंभवात्, शरीरादिप्रवृत्तिहेतुभूतो गुणविशेषः **प्रयत्नः** । बुद्धीच्छाद्वेषप्रयत्नाः सविषयका गुणाः ।।

विहितेत्यादि । आत्मगतो गुणविशेषो धर्मः । एवमधर्मोऽपि । कालान्तरभावि-सुखदुःखहेतुतया एतौ गुणौ सिद्धौ । यागादिक्रियायाः

टिप्पणी

***विध्यर्थः—** लिङ्लोट्तव्यप्रत्ययैर्विधिरभिधीयत इति सर्वविदितम् । विधेरर्थः कः? **गामानय** इत्युक्ते हि कश्चित् कञ्चित् गवानयनरूपे कार्ये प्रेरयतीति प्रतीतेः प्रेरणैव विध्यर्थ इति स्पष्टम् । अथापि शास्त्रकारा बहुधा विप्रतिपद्यन्ते । नियोगो

टिप्पणी

लिङर्थ इति जरन्मीमांसकाः । कार्यमेव लिङर्थ इति प्राभाकराः । भावनैवेति भाट्टाः। अपूर्वमिति नवीनाः । कृतिसाध्यत्वमेव स इति केचित् । इष्टसाधनत्वमेव स इत्यन्ये॥

इदमत्रावधेयम्— लोके स्वरसतया प्रतीयमानेष्वप्यर्थेषु एते पण्डिताः क्लिश्यन्ति, क्लेशयन्ति चेति कुतः ? इत्येव तटस्थाः जिज्ञासन्ते । तत्रेदमेवात्र मूलम्। एकैकशास्त्र (दर्शन) स्य प्रत्येकं क्षेत्रं भिन्नमेव । न्यायशास्त्रस्य क्षेत्रं लौकिकक्षेत्रमेव । अत एव न्यायसूत्रभाष्ययोरीश्वरानुमानादिकं न प्रदर्शितम् । अत एव प्रत्यक्षलक्षणमपि **इन्द्रियार्थसन्निकर्षोत्पन्नम्** इति विशेषितम्, ईश्वरप्रत्यक्षस्य लक्ष्यत्वमेव नास्तीत्येव गौतमस्याशयः । अत एव प्राचीने काले न्यायदर्शनस्य **लोकायतम्** इत्येव संज्ञाऽऽसीदित्यादिकमन्यत्र प्रदर्शितम् ॥

एवञ्च नानविधसंस्कारवतां चेतनानां बुद्धिभेदस्यानिवार्यतया, ,तत्तत्कक्ष्यानुरोधेन बुद्धेस्समन्वयस्य संपादनीयतया, शास्त्राणां कक्ष्या अपि भिद्येरन् । मूलस्तु एकतत्त्ववादः, तत्त्वद्वयवादः, त्रितत्त्ववाद इति त्रिविधं शास्त्रम् । एकतत्त्ववादो बौद्धानाम् । **अद्वयवादी** इति खलु बुद्धं निर्दिशति अमरसिंहः । निर्विशेषजीवतत्त्वमेकमङ्गीकृत्यैव सर्वं निर्वोढुं शक्यमिति सोऽमन्यत । तद्वदेव तत्स्थाने निर्विशेषब्रह्मैक्यवादोऽपि अनन्तरं प्रवृत्तःसर्वसमन्वयार्थमित्यपि प्रसिद्धम् । एवं सांख्याः, मीमांसकाश्च प्रकृतिपुरुषरूपतत्त्वद्वयवादिन इति प्रसिद्धमेव । सविशेषब्रह्मवादिनो वैदिकास्तु प्रकृतिः, जीवः, ईश्वरश्चेति तत्त्वत्रयवादिनः । **भोक्ता भोग्यं प्रेरितारं च मत्वा** इति हि तत्त्वत्रयं वदति श्वेताश्वतरश्रुतिः । इदं सर्वं साधककक्ष्याभेदेनैव । तत्तत्कक्ष्यायां तत्तत्सत्यमेवेत्यादिकं तत्त्वमुक्ताकलापव्याख्यायां सर्वङ्कषायां सत्यसिद्धौ च विस्तरेण प्रतिपादितम् ॥ प्रकृते न्यायशास्त्रं वैदिकं त्रितत्त्ववादमेवाङ्गीकरोति । वेदोपाङ्गत्वेन परिगणितश्च । अत एवेश्वरकृतो वेद इति वदति । अत एव चेश्वरप्रेरणैव लिङर्थ इत्यङ्गीकरोति । बलवदनिष्टाननुबन्धित्वकृतिसाध्यत्वज्ञानादिकं प्रेरणायाः पोषकतयोपकरोतीत्येव तत्त्वम्। अधिकमन्यत्र ॥

बुद्ध्यादयोऽष्टावात्ममात्रगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च । नित्या ईश्वरस्य । अनित्या जीवस्य ।

संस्कारस्त्रिविधः । वेगो भावना स्थितस्थापकश्चेति ।

वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः ।

अनुभवजन्या स्मृतिहेतुर्भावना ।

आलोक-व्याख्या

क्षणिकत्वात्, स्वर्गादिसुखहेतुत्वस्य शास्त्रसिद्धत्वादेतन्निर्वाहाय मध्ये द्वारतया कल्प्यमानो **धर्मः** । एवं गोहत्यादीनां कालान्तरे नरकादिदुःख-कारणत्वनिर्वाहार्थ**मधर्म**श्चावश्यकः । विहितत्वनिषिद्धत्वे शास्त्राधीने। एतावुभावेवादृष्टपदवाच्यौ कार्यसामान्यकारणभूतौ ।।

ईश्वरस्य द्वेषादिगुणाभावात् ज्ञानेच्छायत्नेष्वेवं नित्यानित्यविभागः । एतत् त्रयव्यतिरिक्तास्तु जीवगता अनित्या एव ।।

वेगः । 'आद्यपतनासमवायिकारणं गुरुत्वम्' इति पूर्वमुक्ते लक्षणे, द्वितीयादिपतने वेगस्यापि कारणत्वं प्रदर्शितम् । अतश्च **गुरुत्वादिभिन्नत्वे सति द्वितीयादिपतनासमवायिकारणत्वं** वेगस्य लक्षणं ज्ञेयम् ।।

भावनाख्यं संस्कारं निरूपयति - **अनुभवेत्यादि । अनुभवजन्यत्वे**

टिप्पणी

सर्वं न्याय्यं युक्तिमत्त्वात् विदुषां किमशोभनम् इति वदन् भगवान् शुकः—केवलकलहप्रियाणामविदुषां पण्डितानां तु नैकमपि शास्त्रं मुक्तये कल्पते—इत्युद्घोषयति । एवं तर्हि निर्णय एव कुत्रापि न शक्य इति तु न, मन्तव्यम् मानवबुद्धीनां परस्परमत्यन्तविलक्षणत्वात्, तत्तत्कक्ष्यानुगुणमेव निर्णयः । अत एवोक्तम्—

यो विद्यया यया युक्तस्तस्य सा दैवतं परम्।
सैव पूज्यार्चनीया च सैव तस्योपकारिणी ।।

इत्येव परमं रहस्यम् अशक्तानामाप्तवाक्यमेव परमं प्रमाणम् । इत्याद्यन्यत्र विस्तरः ।

आत्ममात्रवृत्तिः ।

अन्यथाकृतस्य पुनस्तादवस्थ्यापादकः स्थितस्थापकः ।

कटादिपृथिवीमात्रवृत्तिः ।

आलोक-व्याख्या

सति स्मृतिहेतुत्वं भावनाया लक्षणम् । अनुभवजन्यत्वमात्रोक्तौ अनुभवध्वंसेऽतिव्याप्तिः । अतः स्मृतिहेतुत्वम् । स्मृतिहेतुत्वमात्रोक्तावात्मन्यतिव्याप्तिः, आत्मनस्समवायिकारणत्वात्। अतोऽनुभवजन्यत्वमुक्तम् । आत्मनो नित्यत्वान्नातिव्याप्तिः । ननु तर्हि जन्यत्वमात्रमलम्, तावतैवात्मनि अतिव्याप्तेः परिहारादिति चेत्, न , तदा कार्यसामान्यं प्रत्यदृष्टस्य कारणत्वात्, तस्य च जन्यत्वस्य 'विहितकर्मजन्यः' 'निषिद्धकर्मजन्यः' इत्यनुपदमुक्तत्वात्, अदृष्टपदवाच्यधर्माधर्मयोरतिव्याप्तिः। अतोऽनुभवजन्यत्वमावश्यकम् ।।

आत्ममात्रेति । जीवात्ममात्रवृत्तिरित्यर्थः । परमात्मा तु सदा सर्वं प्रत्यक्षत एव पश्यतीति, तस्य स्मृतिर्नास्ति । विस्तरस्त्वन्यत्र ।।

ननु पूर्वम् 'संस्कारमात्रजन्यं ज्ञानं स्मृतिः' इति स्मृतेर्लक्षणमुक्तम् । इदानीं तु अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनाख्यसंस्कारस्य लक्षणमुच्यते। एवं सति स्मृतिस्संस्कारजन्या, भावनाख्यसंस्कारस्तु स्मृतिहेतुरित्यन्योन्याश्रयदोष इति चेत्, न । अनुभवजन्यत्वे सति संस्कारत्वजातिमत्त्वमेव वा लघुलक्षणं बोध्यम् । इतरत्सर्वं स्वरूपकथनम् । संस्कारत्वजातिश्च स्मृतिजनकतावच्छेदकतया द्रव्यत्वादिवत्सिद्ध्यतीति युक्तम् ।।

अनुभवजन्या स्मृतिहेतुः' इत्यनेन भावनाख्यसंस्कारस्यानुभवस्मृत्योर्मध्यवर्तित्वमुक्तं भवति । स्मृतिं प्रति पूर्वानुभवः कारणमिति सर्वसंप्रतिपन्नम् । न तावन्मात्रम्, अनुभवस्मृत्योः समानविषयत्वमपि संप्रति-

चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुः उत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरसंनिकृष्टसंयोगहेतुराकुञ्चनम् । विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् ।

आलोक-व्याख्या

पन्नम् । तावतानुभूतस्य सर्वस्यापि स्मरणनियमादर्शनात् अनुभवानधिकविषयत्वमेव समानविषयकत्वम् । अत्र च कारणमनुभवतारतम्यमेव । अत्रापि कारणं तत्तत्पुरुषबुद्धितारतम्यमेव । इदमेव ग्रहणधारणसामर्थ्यमित्युच्यते । ग्रहणं **तादात्विकम्** । धारणं **संस्कारा-नुवृत्तिः** । संस्कारानुवृत्तावपि कदाचित् स्मरणाभावोऽदृष्टाधीनः । अदृष्टमेव संस्कारोद्बोधकम् । एवं स्मृत्यनुभवयोर्मध्यवर्तित्वकथनात् संस्कारस्य द्वारत्वं सिद्ध्यति । क्षणिकानां क्रियारूपयागादीनां कालान्तरभाविस्वर्गादिकारणत्वनिर्वाहार्थं मध्ये धर्माधर्मयोः कल्पनवदेवाशुतरविनाशिनामनुभवानामपि स्मृतिकारणत्व-निर्वाहार्थं मध्ये संस्कारकल्पना । ननु तर्हि उद्बोधकतयाभिमतधर्माधर्माविव मध्ये द्वारमास्ताम्, किमर्थमधिकगुणकल्पनेति चेत्, न । धर्माधर्मयोः फलनाश्यत्वात्, सकृत्स्मरणजननेनैव धर्माधर्मरूपसंस्कारक्षयापत्त्या पुनः कालान्तरे तत्स्मरणानुपपत्तेः । न च स्मृत्यैव पुनस्संस्कारान्तरोत्पत्त्या निर्वाहसंभवः । संस्कारस्यानुभवजन्यत्वनियमभंगप्रसङ्गात् । न चेष्टापत्तिः, पुनःपुनःस्मरणेन पूर्वसंस्कारस्यैव दार्ढ्यानुभवस्य वेदाध्ययनादावनुभवसिद्धत्वात् । पूर्वतनसंस्कारानुवृत्तेः स्पष्टमनुभवाच्च । अतो धर्माधर्माभ्यां नान्यथासिद्धिस्संस्कारस्येति संस्कारोऽत्यन्तमावश्यकः ।।

चलनात्मकमिति । 'चलति' इतिप्रतीतिसिद्धक्रियात्वरूपजातिमत्त्वं कर्मणो लक्षणम् इत्यर्थः । चलने जाते, पूर्वदेशाद्वस्तुनो विभागः । तेन पूर्वसंयोगनाशः । तत उत्तरदेशसंयोगोत्पत्तिरिति क्रमोऽवर्जनीयः ।

नित्यमेकमनेकानुगतं सामान्यम्। परं सत्ता। अपरं द्रव्यत्वादि।
***नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः।**

आलोक-व्याख्या

अतः सर्वापि क्रिया क्षणचतुष्टयमात्रावस्थायिनी ।। अधिककालानुवृत्तिव्यवहारस्तु क्रियान्तरोत्पत्तिवशादिति ज्ञेयम् ।।

नित्यमित्यादि । अनेकेषु अनुगततया वर्तमानत्वम् । समानानां भावः सामान्यमिति व्युत्पत्तिलब्धोऽयमर्थः । अनेकषु वर्तमानम् इत्यनेनैव एकत्वं लब्धमिति लक्षण एकत्वं न निवेशनीयम् । तथा च **नित्यत्वे सत्यनेकवृत्तित्वं सामान्यस्य** लक्षणम् । नित्यत्वमात्रोक्तावाकाशादावतिव्याप्तिः । अतोऽनेकवृत्तित्वम् । ननु आकाशस्यावृत्तिपदार्थत्वेन वृत्तित्वमात्रमेवालमिति चेत्, परमाण्वादिगतैकत्वादौ नित्यत्वस्य वृत्तित्वस्य च सत्त्वादतिव्याप्तिः । अतोऽनेकपदम् । अनेकवृत्तित्वमात्रोक्तौ संयोगादावतिव्याप्तिः । अतो नित्यत्वम् । संयोगस्यानित्यत्वान्नातिव्याप्तिः । एवमप्यत्यन्ताभावस्य नित्यत्वादनेकवृत्तित्वाच्चात्यन्ताभावेऽतिव्याप्तिः । अतो वृत्तित्वं समवायसंबन्धेन बोध्यम्। अभावस्य समवायसंबन्धाभावान्नातिव्याप्तिः । तथा च **नित्यत्वे सत्यनेकसमवेतत्त्वं** सामान्यस्य लक्षणम् । सामान्यं— जातिः, अखण्डोपाधिरिति द्विविधम् ।।

व्यावर्तका इति । भेदानुमितिहेतव इत्यर्थः । गुणक्रियादीनां भेदो हि तत्तदाश्रयभेदाधीनः । घटपटादीनां परस्परं भेदस्तत्तज्जात्यैव सिद्ध्यति। एकजातीययोर्घटयोर्भेदः कथं भवति ?। द्वयोर्भेदे कारणं किमित्यर्थः ।

टिप्पणी

*ननु 'नित्यद्रव्यवृत्तयः' इत्यत्र द्रव्यपदं किमर्थं ? परमाणुवदेव नित्यगुणा अपि निरवयवाः किल! तर्हि नित्यानां परमाणुगतगुणानां कथं भेदसिद्धिरिति चेत्;

आलोक-व्याख्या

घटयोरुभयोर्जातिभेदाभावात् कथं भेदः सिद्ध्यतीति प्रश्नः । कोऽयं प्रश्नः प्रत्यक्षसिद्धे विषय इति चेत् ? आशयानभिज्ञो भवान् । सिद्ध्यतीति न प्रमाणप्रश्नः । किन्तु एतद्घटः, तद्घटश्च कथं परस्परं भिन्नावभूताम्? इति कारणप्रश्नः । प्रत्यक्षेण सिद्धे भेदे कः प्रश्न इति चेत् ? पुनराशयं न जानासि । भेदः प्रत्यक्षेण ज्ञायते, न तु प्रत्यक्षेण भेदस्तयोर्जातः । घटद्वये भेदः कथं जात इति प्रश्नः । भिन्नभिन्नकपालजन्यत्वात्तयोर्भेदोऽनिवार्यः,अतः कोऽयं महान् प्रश्न इति चेत् ! आगतोऽसि समीचीनं मार्गम् । घटभेदः कपालभेदात् । कपालभेदः तदवयवभेदात् । एवं त्र्यणुक-भेदस्तदवयवद्व्यणुकभेदात् । द्व्यणुकभेदः परमाणुभेदात् । परमाणुभेदः कुतोऽभूत् ? इति प्रश्ने किमुत्तरम् ? परमाणूनाम् अवयवाभावात् । अतः परमाणूनां परस्परं भेदस्तद्गतानिर्वचनीयविशेषाख्यपदार्थभेदादेव । अयमर्थः पूर्वमुक्तः । एवमेव नित्यानामात्मादीनामपि विशेषभेदादेव भेदः, अन्यस्य वक्तुमशक्यत्वात् । **'एतत्परमाणुस्तत्परमाणुभिन्नः, एतद्विशेषात्'** इत्यनुमानस्याकारः।।

ननु विशेषाणां परस्परं भेदः कथं सिद्ध इत्यत्र - **व्यावृत्ता** इति । स्वत एव व्यावृत्ता इत्यर्थः । अन्यथानवस्थाप्रसङ्गः । अतश्च **स्वतोव्यावृत्तत्वमेव विशेषाणां लक्षणम्** । भेदनिरूपणं कर्तुमेव विशेषाख्यं

टिप्पणी

विशेषवशात् परमाणूनां परस्परभेदसिद्धौ तत्तद्गतगुणानामाश्रयभेदादेव सिद्ध्यति । शुक्लनीलादिगुणा हि भिन्ना तथैव प्रत्यक्षसिद्धाः । भिन्नयोः शुक्लपटयोर्वर्तमानयोः शुक्लरूपयोः तदाश्रयपटभेदादेव भेदः । निरवयवे द्रव्ये कारणाभावात् भेदः कथं सिद्धः? इति प्रश्न इत्यतः विशेषाः नित्यद्रव्यवृत्तयः, न तु नित्यगुणादिवृत्तय इति ज्ञेयम् ।

नित्यसंबन्धः समवायः । अयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्य एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति ।

आलोक-व्याख्या

पदार्थमङ्गीकृतवन्त इत्येते काणादा वैशेषिका इत्युच्यन्ते । भेदनिरूपका भेदवादिन इत्यर्थः ।।

नित्यत्वे सति संवन्धत्वं समवायस्य लक्षणम् । नित्यत्व-मात्रोक्तावाकाशादावतिव्याप्तिः । अतस्संबन्धत्वम् । संबन्धत्वमात्रोक्तौ संयोगेऽतिव्याप्तिः । अतो नित्यत्वम् । अस्य संबन्धस्यावश्यकतां प्रदर्शयितुम् - **अयुतसिद्धवृत्तिरिति** । 'यु अमिश्रण' इति धातुः । अमिश्रणं पृथग्भावः। युतं यथा तथा सिद्धौ इति वा, युतौ च तौ सिद्धौ चेति वायुतसिद्धौ इति विग्रहः । न युतसिद्धौ अयुतसिद्धौ । कदापि पृथक्कर्तुं वा पृथक्ज्ञातुं वा यौ न शक्यौ, तावयुतसिद्धौ । पृथक्कर्तुमशक्यौ इति कथनेनैव तत्र द्वौ वर्तेते इति स्पष्टम् । एवं सति तयोस्संबन्धो वक्तव्यः । न चेद्विशिष्टबुद्धिर्न स्यात्। यथा गुणगुणिनौ । 'रूपवान् घटः' इति खलु व्यवहरति । एतादृशव्यवहारविषयो न केवलं रूपम्, न केवलं घटः ; किन्तु मतुबर्थस्तयोस्संबन्धोऽपि । नो चेत् 'रूपघटौ' इत्येवोच्येत - यथा 'घटपटौ' इति । अतो मतुप्प्रत्ययवाच्यस्तयोः संबन्ध आवश्यकः । अतश्चेयं विशिष्टबुद्धिरित्युच्यते । अत एवानुमानम् - **गुणक्रियादिविशिष्टबुद्धिः, विशेषणविशेष्यसंवन्धविषया, विशिष्टबुद्धित्वात्, 'दण्डी' इति विशिष्टबुद्धिवत्** - इति ।।

दण्डं धरन् पुरुषो 'दण्डी' भवति । दण्डपुरुषयोस्संबन्धाभावे

आलोक-व्याख्या

'दण्डी पुरुषः' इति न स्यात्, किन्तु 'दण्डपुरुषौ' इति स्यात् । अतस्तत्र दण्डः, पुरुषः, तयोःसंबन्ध इति त्रयं विषयः । एवमेव 'गुणवान्' 'क्रियावान्' इत्यादावपि । स एव संबन्धः समवाय इत्युच्यते । अवयवावयविभावरहितयोर्द्रव्ययोरेव संयोगः, तयोः पृथक्सिद्धत्वात् । गुणगुणिनौ त्वपृथक्सिद्धौ । अतो न तयोस्संयोगः, किन्तु विलक्षणः । अयं च संबन्धो लोकप्रसिद्ध्या चतुर्षु - अवयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः, जातिव्यक्त्योश्च । शास्त्रतस्तु विशेषनित्यद्रव्ययोः । आहत्य पञ्चसु स्थलेषु समवायस्संबन्धः । अयं च संबन्धः सत्तयैव विशिष्टबुद्धिजनकः, न तु ज्ञाततया । अत एव न प्रत्यक्षः, रूपघटयोर्मध्येऽतिरिक्तस्य कस्यापि पदार्थस्य चक्षुषादर्शनात् । अथाप्युक्तेनानुमानेन स सम्बन्धो ज्ञायते । एवमनुमानसिद्धत्वादेव **'सिद्ध्यतो वस्तुनो नित्यत्वे एकत्वे च लाघवम्'** इति लाघवतर्कवशात् समवायो नित्य एकश्च, लाघवात् । अत एव समवायस्य प्रत्यक्षत्ववादोऽपि न युक्तः । अनुमानेन सिद्धावेव लाघवतर्कप्रसङ्गात् । न चास्तु समवायोऽनित्योऽनेकश्च, का हानिरिति चेत्, न । उत्पत्तिविनाशादिकल्पनस्य, तस्य हेतुकल्पनादेरावश्यकत्वात् । तेषां प्रत्यक्षतोऽदर्शनात् कल्पनासंभवात्, नित्य एकश्च समवायः ।।

ननु समवायस्याप्रत्यक्षत्वे विशिष्टबुद्धिः कथं भवेदिति चेत्, सत्तया कार्यकारिण एव संबन्धत्वात् । ज्ञातश्चेत् प्रकारो वा भवेत्, विशेष्यो वा भवेदित्येव परमं तत्त्वम् । ननु तर्हि संयोगोऽप्यतीन्द्रियः स्यात्तर्हीति चेत्, अतीन्द्रियत्वं प्रति संबन्धत्वस्याप्रयोजकत्वात् । वस्तुन ऐन्द्रियकत्वं हि तत्कारणप्रयुक्तम् । विशिष्टबुद्धौ संबन्धः सत्तयैव कार्यकारीत्येव प्राचां निर्णयः । यथा 'घटवद्भूतलम्' इत्यादौ हि घटभूतलयोः पूर्वं प्रत्येकं दर्शनात्, अनन्तरमुभयोर्मेलने 'घटभूतले' इत्यनुभवाभावात्, अतिरिक्तः कश्चन पदार्थः विशिष्टबुद्धावावश्यक इति, अवयवावयविभावरहितयोः

अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य ।

आलोक-व्याख्या

द्रव्ययोः समवायासंभवात् संयोगः सिद्ध्यतीत्यादिकं संयोगविभागप्रकरण एव गतम् । 'घटसंयोगिभूतलम्' इत्यादौ तु संयोगः प्रकार एव । संबन्धस्तु समवायः । संयोगस्तु वस्तुतो गुणः । स्वरूपसंबन्धस्तु नातिरिक्तः । समवाय एक एव संबन्धः शिष्यते ।।

'अभावश्चतुर्विधः' इति पूर्वमेव विभागस्योक्तत्वात् विभक्तानां लक्षणान्याह - **अनादिरित्यादि** । यथा 'अस्ति' इति प्रतीत्या षड्विधो भावः सिद्धः, तथा 'नास्ति' इति प्रतीतिसिद्धोऽभावः । यथा 'घटोऽस्ति' इति व्यवहारः, तथा 'घटो नास्ति' इत्यपि व्यवहारस्सर्वसंमतः । अतोऽभावपदार्थोऽप्यावश्यकः । स चाभावश्चतुर्विधः, नञश्चतुर्धा प्रयोगात् । 'घटः पटो न' इत्येकः, 'घटो नास्ति' इत्यपरः । आद्योऽन्योन्याभावः, द्वितीयोऽत्यन्ताभावः । एतदन्तरा घटस्योत्पत्तेः पूर्वं 'नास्ति घटः' इति वदन्ति । एवं घटस्य नाशानन्तरम् 'नास्ति घटः' इति वदन्ति । आद्यव्यवहारे प्रागभावः, द्वितीयव्यवहारे ध्वंसश्च विषयः । आहत्याभावश्चतुर्विध आवश्यकः।।

विभागक्रमेण लक्षयति - **अनादित्वे सति सान्तत्वं = नश्वरत्वं प्रागभावस्य** लक्षणम् । अनादित्वमात्रोक्तावाकाशादावतिव्याप्तिः । अतः सान्तत्वम् । सान्तत्वमात्रोक्तौ घटादावतिव्याप्तिः । अतोऽनादित्वम् । एतस्यानादित्वं सादित्वं च प्रदर्शयति - कार्यस्य घटादेरुत्पत्तेः पूर्वं विद्यमानः, घटोत्पत्तौ स्वयं नङ्क्ष्यन् 'भविष्यति' इति प्रतीतिसिद्धोऽभावः प्रागभाव इत्युच्यते । 'प्राक् अभावः' इति व्युत्पत्त्या प्रागभाव इति संज्ञा । 'भविष्यति' इति कथनेनैव 'इदानीं नास्ति' इत्यप्यर्थात्सिद्ध्यति । तत्र नञो विषयीभूतोऽभावः प्रागभावः ।।

सादित्वे सत्यनन्तत्वं प्रध्वंसाभावस्य लक्षणम् । सादित्वमात्रोक्तौ

सादिरनन्तः प्रध्वंसाभावः । उत्पत्तेरनन्तरं कार्यस्य । त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । यथा भूतले घटो नास्ति इति ।

आलोक-व्याख्या

घटादावतिव्याप्तिः । अतोऽनन्तत्वम्, घटादेस्सान्तत्वात् नातिव्याप्तिः । अनन्तत्वमात्रोक्तौ आकाशादावतिव्याप्तिः । अतः सादित्वम् । एतत्प्रदर्शयति— घटादेरुत्पत्तेरनन्तरं कदाचित् जायमानोऽभावः - 'घटो ध्वस्तः = नष्टः' इति प्रतीतिसिद्धोऽभावः= प्रध्वंसाभावः । 'ध्वस्तो घटः' इति प्रतीत्या तदानीं नास्तित्वं प्रतीयते। तत्र नञो विषयोऽभावः प्रध्वंसाभावः । स तु सादित्वादुत्पद्यते ।।

वस्तुतस्तु भविष्यतीति प्रतीतिसिद्धोऽभावः प्रागभावः । 'ध्वस्तः' इति प्रतीतिसिद्धोऽभावः प्रध्वंसाभावः । उभयत्रापि 'नास्ति' इति प्रतीतिरनन्तरकालिकी आर्थिकी, न प्रागभावप्रध्वंसाभावविषयिणी । अत एवाभावो द्विविध एवेति **केचित्** । उभयत्रापि 'नास्ति' इति प्रतीतिर्न - प्रामाणिकीत्येव **प्राचां मतम्** । अत एतावुभावभावौ तत्तत्समवायि-कारणवर्तिनावित्युच्येते । अत एव ध्वंसप्रागभावाधिकरणे नात्यन्ताभाव इति **प्राचीनाः** । 'घटो भविष्यति' 'घटो ध्वस्त इति व्यवहारौ हि घटविशेष-विषयौ । अतः प्रागभावप्रध्वंसाभावौ न सामान्य-धर्मावच्छिन्नप्रतियोगि-ताकौ ।।

त्रैकालिकेत्यादि । त्रैकालिकः=कालत्रयवर्ती यः संसर्गाभावः= तत्तत्संबन्धनिषेधरूपोऽभावः=अत्यन्ताभावः । 'भूतले घटो नास्ति' इत्युक्ते भूतले घटनिषेधो घटसंबन्धनिषेध एव, न तु घटस्यैव निषेधः, अन्यत्र घटस्य सत्त्वात् । अत एव 'शशशृङ्गं नास्ति' इत्यादि व्यवहारो 'घटो नास्ती'ति प्रतीतिवत् न प्रमाणिकः । प्रमेयदृष्ट्या घटनिषेधोऽन्यः,

आलोक-व्याख्या

घटसंसर्गनिषेधोऽन्यः । उभयोः पर्यायता तु स्थूलदृष्ट्या । अतोऽत्यन्ताभावः सम्बन्धावच्छिन्नप्रतियोगिताकः । प्रागभावप्रध्वंसाभावौ तु न संसर्गावच्छिन्नप्रतियोगिताकौ, तयोस्संबन्धाभानात् । यद्यपि श्वो भविष्यतो घटस्य प्रागभावः, घटोत्पत्तेः पूर्वं श्वोऽपि स्थास्यति, अद्यापि वर्तते, ह्योऽप्यासीदिति त्रैकालिक इति कश्चिद्वदेत्, परन्तु अतीतत्ववर्तमानत्वादिकं नास्मद्दृष्ट्या ज्ञातव्यम्, किन्तु तत्तद्वस्तुदृष्ट्यैव । अन्यथा सर्वमपि त्रैकालिकम्, अत एवाव्यवस्थितं च स्यात् । तत्तद्वस्तुदृष्ट्या तत्तद्वस्तुनः कालः वर्तमान एव । अत्यन्ताभावव्यवहारस्य त्रैकालिकत्वात् स एव त्रैकालिकः= नित्यः। 'घटो नास्ति' इतिव्यवहारः खलु त्रैकालिकः ।।

नित्यत्वे सत्यभावत्वं चेदत्यन्ताभावस्य लक्षणम्, अन्योन्याभावेऽतिव्याप्तिः, घटपटयोर्भेदस्यान्योन्याभावरूपस्य नित्यत्वात्, न हि घटः पटो भवेत्, न वा पटो घटः कदाचित् । अन्तत आत्मनां हि परस्परं भेदो नित्यः । नापि नित्यत्वे सति संसर्गाव-च्छिन्नप्रतियोगिताकत्वम्, अन्योन्याभावस्यापि तादात्म्यसंबन्धवच्छिन्नप्रतियोगिताकत्वात् । किन्तु **तादात्म्यातिरिक्तसंबन्धावच्छिन्नप्रतियोगिताकत्वे सत्यभावत्वमत्यन्ताभावस्य लक्षणम्** । अभावत्वमात्रोक्तावन्योन्याभावेऽतिव्याप्तिः, अत इतरदलम् । तादात्म्यातिरिक्तसंबन्धावच्छिन्नप्रतियोगिताकत्वमात्रोक्तौ घटादावतिव्याप्तिः । 'भूतले घटः' इत्यादौ हि घटभूतलयोर्वर्तमानस्य संयोगसंबन्धस्य प्रतियोगी घटः, अनुयोगि भूतलम् । एवञ्च **भूतलानुयोगिकसंयोगप्रतियोगी घटः** इत्यर्थो भवति । प्रतियोगिता घटे वर्तते । सा च संयोगस्य गुणत्वेन समवायसंबन्धावच्छिन्ना । अतस्तादात्म्यातिरिक्तसमवायसंबन्धावच्छिन्नप्रतियोगिताकत्वं घटेऽप्यस्तीत्यतिव्याप्तिः । अतोऽभावत्वम् । घटस्य भावत्वान्नातिव्याप्तिः।।

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः । यथा घटः पटो न भवति इति ।

आलोक-व्याख्या

तादात्म्येत्यादि । 'घटः पटो न' इत्युक्ते हि परस्परनिषेधः प्रतीयते। अत एवायमन्योन्याभाव इत्युच्यते । परस्परनिषेधः - परस्परभेदनिषेधः - परस्परतादात्म्यनिषेधः -- परस्परतादात्म्यसंबन्धावच्छिन्न-प्रतियोगिताकोऽन्योन्याभावः । तथा च **तादात्म्य-संवन्धावच्छिन्नप्रतियोगिताकत्वे सत्यभावत्वमन्योन्याभावस्य लक्षणम्** । अभावत्व-मात्रोक्तावत्यन्ताभावेऽतिव्याप्तिः । अतस्तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वम् । एतावन्मात्रोक्तौ 'नीलो घटः' इत्यादावभेदसंबन्धावच्छिन्नप्रकारताशालिबोधजननात्, प्रकारतायां विशेष्यतायां वा तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वसत्त्वादतिव्याप्तिः। अतोऽभावत्वम् ।।

अभावाभावः प्रथमाभावप्रतियोगिरूपः, न त्वतिरिक्तः, अन्यथानवस्थाप्रसङ्गात् । यथा घटाभावाभावो घटरूप एव, 'घटाभावो नास्ति' इत्युक्ते हि 'घटोऽस्ति' इत्येवार्थः । **भेदाभावस्तु** भेदप्रतियोगिता-वच्छेदकरूपः। यथा घटभेदः पटे वर्तते । घटभेदाभावः घट एव, नान्यत्र, अतः स घटत्वरूपः । **अभावाधिकरणकाभावप्रतियोगिकाभावः** अधिकरणीभूताभावरूपः । यथा 'घटाभावे पटाभावो नास्ति' इत्युक्ते पटाभावाभावः घटाभाववृत्तिस्तत्स्वरूप एव, अन्यथाऽनवस्थाप्रसङ्गादित्याद्यन्यत्र द्रष्टव्यम्।।

सर्वेषामित्यादि । अत्र 'पदार्थानाम्' इति कथनात् शक्तिसादृश्यादयो ग्राह्याः, न तु 'प्रमाणप्रमेय' इत्यादयः, तेषां पदार्थत्वाकथनात् । पदानि

सर्वेषामपि पदार्थानां यथायथम् उक्तेष्वेवान्तर्भावात् सप्तैव पदार्थाः इति सिद्धम् ।।

आलोक-व्याख्या

चतुर्विधानि, पदार्थाश्च चतुर्विधाः लोकसिद्धाः, इतरौ द्वौ विशेषसमवायौ शास्त्रसिद्धौ । अभावस्तु वाक्यस्यार्थः, न तु पदस्य । अभावस्य पदार्थत्वाभिमानेऽपि आहत्य सप्तैव पदार्थाः। अत एव **महर्षिकणादेन सूत्रे** 'पदार्थानाम्' इत्येव कथितम् । नैवं **महर्षिगौतमेन प्रमाणप्रमेयेत्यादिसूत्रे** पदार्थपदं प्रयुक्तम् । प्रमाणादीनि षोडश मुमुक्षुभिरवश्यं ज्ञेयानि तत्त्वानीत्येव भाष्ये व्याख्यातम् । अतश्शक्तिसादृश्यादय एवात्र ग्राह्याः । पदं किञ्चित्, पदार्थः कश्चिच्चेत्, स एष्वेवान्तर्भवतीत्यर्थः, अतिरिक्तपदस्य तदर्थस्य चाभावादित्यर्थः । अधिकमन्यत्र द्रष्टव्यम् ।।

एवं पदार्थतत्त्वज्ञानम्, पदार्थसाधर्म्यवैधर्म्यतत्त्वज्ञानं च शरीराद्यतिरिक्तात्मतत्त्वज्ञानप्रयोजकम् । एतद्विषयविमर्शनाय च प्रमाणादि-षोडशतत्त्वज्ञानमप्यावश्यकम् । इदं च तत्त्वज्ञानं केवलग्रन्थपठनान्न कदापि संभवि । अत एव काणादसूत्रे **'धर्मविशेषप्रसूतात्'** (वै.सू.१.१.४) इति साधर्म्यवैधर्म्यतत्त्वज्ञानस्य विशेषणमुक्तम् । एवं गौतमीयं सूत्रम् **'समाधिविशेषाभ्यासात्'** (न्या.सू.४-२-३८) इति । अस्य चावतरणभाष्यम् **'अथ तत्त्वज्ञानं कथमुत्पद्यत** इति' इत्यादि । सूत्रद्वयेऽपि विशेषपदप्रयोगोऽप्यवधेयः । **'अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः'** (न्या.सू.४-२-४२) **'तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः'** (न्या.सू.४.२.४६) **'ज्ञानग्रहणाभ्यासः**

आलोक-व्याख्या

तद्विद्यैश्च सह संवादः' (न्या.सू.४.२.४७) **'तं शिष्यगुरु-सब्रह्मचारिविशिष्ट श्रेयोऽर्थिरनसूयुभिरभ्युपेयात्'** (न्या.सू.४.२.४८) इत्यादीनिसूत्राण्यप्यवधेयानि । आहत्य तु -

प्रतारितास्तु सर्वेऽपि प्रायः पण्डितमानिभिः ।
ख्यातिलाभादिपूजादिपरैर्हन्त ! किमुच्यते ? ।।
आत्मापरोक्षज्ञानं क्व, क्व वा ग्रन्थात्परोक्षधीः ।
उभयोरन्तरं ज्ञेयं मेरुसर्षपयोरिव ।।
अतो भारो महानस्ति पण्डितानां विवेकिनाम् ।
आत्मा श्रेयसि योक्तव्यो नार्थकामेषु जातुचित् ।।
'उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।'
इत्येतद्वचनं नैव विस्मर्तव्यं कदाचन ।।

ननु भोः ! कोऽयमाग्रहः ? अज्ञानं वा ? प्रमाणादयः पदानामर्थास्तेऽपि पदार्था एव ।

दीपिका पठिता नैव व्याख्यैतत्कर्तृका त्वया ।
न केवलं सा पठिता, वहुधा शोधिता च सा ।।
'गतानुगतिको लोको न लोकः पारमार्थिकः ।'
इति गाथालक्ष्यभूताः प्रायो हन्त ! धियाधिकाः ।।

किं कुर्मो वयमत्र ! न हि हस्तामलकदर्शनार्थं काशी गन्तव्या । अधिकमप्रसक्तमत्र।

ग्रन्थमुपसंहरति--**काणादेत्यादि** । कणादमतं **पदार्थनिरूपणप्रधानम्** । अक्षपादप्रणीतं तु न्यायविस्तरपदवाच्यं **प्रमाणप्रधानम्** ।।

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः ।।
इति तर्कसंग्रहः संपूर्णः

आलोक-व्याख्या

कणादगौतमप्रोक्तशास्त्रे भिन्नपथे मते ।
समानतन्त्रे स्यातां तु न सांकर्यं परस्परम् ।।

न्यायशास्त्रस्य प्रमाणशास्त्रत्वात्, अर्थापत्त्यादीनामनुमानादावेवान्तर्भावात्, इतरैः प्रमाणसंख्योल्लङ्घनादिकं शास्त्राणां साङ्कर्यरूपमेवेति चत्वार्येव प्रमाणानि । अत एव प्रमाणद्वयवादो वा प्रमाणत्रयवादो वा अक्षपादाभिप्राययाननुगुणः। वेदविरोधिभिः मध्यकालिकबौद्धैः, केवलतर्कपरायणैः स्वतन्त्रं तर्कशास्त्रं प्रणीतं प्रमाणसमुच्चयप्रमाणवार्तिकादिरूपम्। तद्दृष्टान्तेनैवानन्तरकाले वैदिकैरपि स्वस्वसिद्धान्तानुगुणास्तर्कशास्त्रग्रन्थाः शिष्यानुग्रहदृष्ट्यैव रचिता इति सुगमं सूक्ष्ममतीनाम् । न्यायशास्त्रं वेदोपाङ्गभूतं लोकायतपदवाच्यं प्रमाणशास्त्रं पर्याप्तं वैदिकानां विचारप्रियाणाम् ।।

पदार्थशास्त्रं काणादम्, प्रमाणशास्त्रं गौतमम्, इत्येव वस्तुस्थितिः। **'पदार्थधर्मसंग्रहः प्रवक्ष्यते'** इत्येव च प्रशस्तपादीयं प्रशस्ततमं वचनम्। पदार्थानां सप्तत्वे च कारणमपि प्रदर्शितमेव । वर्तते तु प्रमाणप्रमेययोः परस्परापेक्षा । तावताऽन्योन्यचारितार्थ्यं वाऽन्तर्भावो वा न क्लेशेन कर्तव्यः ।।

'अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।।'
एतानि विद्यास्थानानि धर्मस्यापि विदुर्बुधाः ।
'पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।'

आलोक-व्याख्या

अत्र तर्कपदेनैते शास्त्रे क्रोडीकृते, शृणु ।
उपाङ्गभूतावेतौ हि मीमांसा न्यायविस्तरः ।
वाक्यन्यायविचारो हि मीमांसा कथिता वुधैः ।।
अर्थन्यायविचारात्मा कथितो न्यायविस्तरः ।
मानाधीना मेयसिद्धिः मानं मेयावलम्बि च ।।
विषयौ मानमेये तु तर्कशास्त्रस्य सम्मतौ ।
काणादं गौतमीयं च तर्कशास्त्रं समीरितम् ।।
सत्तर्कशास्त्रप्रविविक्षवो ये वाला महाकोमलवुद्धिमन्तः ।
आलोकनाम्नी विवृतिर्मयैषा कृता हितायैव मुदेऽस्तु तेषाम् ।।

इति नव्यमङ्गलाभिजनवरदार्यस्य कृतिषु
तर्कसंग्रहालोकः
संपूर्णः



व्याख्याता

महामहोपाध्यायः पण्डितरत्नम्

भारतराष्ट्रपतिसम्मानितः

नव्यमङ्गलाभिजनः वरदाचार्यः

विश्रान्तमुख्यसंशोधकः, प्राच्यविद्यासंशोधनालयः,

महीशूरपुरी

विरचिताः ग्रन्थाः

१. श्रीकण्ठसमालोचनम्

२. न्यायसौरभम् (न्यायमञ्जरीव्याख्या)

३. सर्वंकषा (श्रीमद्वेदान्तदेशिकविरचित-तत्त्वमुक्ताकलापव्याख्या)

४. तर्कसंग्रहालोकः, टिप्पणी च

५. सत्यसिद्धिः

अपि च एभिः बहवः महाग्रन्थाः संपादिताः, प्रबन्धाश्च लिखिताः ।।

सत्यसिद्धिः

(सत्यान्वेषणफलम्)

निष्पक्षपातसर्वदर्शनविमर्शात्मकः प्रौढो महान् ग्रन्थः 'तत्त्वमुक्ताकलापः' विमर्शन-परायणानामत्यन्तमुपकारको भवत्विति सदाशंसनया सर्वंकषाख्यविस्तृतव्याख्यया सह द्वित्रवत्सरेभ्यः पूर्वं प्राकाश्यं नीतः । मूलभूता बहवो विषया अत्र क्रोडीकृताः जिज्ञासूनां सहायार्थमेव, परिश्रमश्चाकारि नूतनाविष्कारार्थमेव । अत एव भूमिकायाः 'सत्यान्वेषणम्' इति नाम दत्त्वा समस्याः प्रदर्शिता बह्वयः, परिहारा अपि मार्गदर्शनाय सूचिताः । परन्तु, अतिसंक्षिप्तोऽभूद्विषय इति जानद्भिरपि अवसरालाभात् अधिकं न वक्तुं शक्यमभूत् । अद्य तु, दैवबलात् अवकाशलाभात्, निर्णीतरूपदित्सया सत्यान्वेषणफलभूतः 'सत्यसिद्धि'नामा ग्रन्थः प्रकाशनाय सञ्जीक्रियते यावच्छक्ति सुशीघ्रमेव । सार्धसहस्रवत्सरेभ्य एवानिर्णीता बह्वयः समस्याः अत्र सप्रमाणं ससाक्षिकं च परामृष्टाः । कुत्र दोषः ? कीदृशो दोषः ? कः परिहारः ? इत्यादिकमाश्चर्यावहं करतलामलकवत्प्रादर्श्यत्र केवलदैवानुग्रहेण ।।

पुस्तकोपलब्धिस्थानम्

आर्षग्रन्थप्रकाशनम्

सं. 2482, पम्पापतिवीथी, जयनगरम्, मैसूरु - 570 014

दूरवाणी - 0821 - 2567536, 094489-38493

ईमेल् - samskrti@hotmail.com